सुरभारती-सन्देशः

सन्देशवाहक —
श्री वासुदेव द्विवेदी, वेदशास्त्री, साहित्याचार्यः
(सस्कृत प्रचार पुस्तकमाला—सम्पादक)

सार्वभौम सस्कृत प्रचार कार्यालयः
वा रा ण सी

प्रकाशक —
सार्वभौम संस्कृत प्रचार कार्यालयः
वा रा ण सी

प्रथमावृत्ति -१०००
मूल्यम्- ५-००

मुद्रक—
बैजनाथ प्रसाद
कल्पना प्रेस
रामघटोरा रोड, वाराणसी

दिव्योऽय सुरभारत्या सन्देश प्रेपितो हित ।
अपि कार्यशत हित्वाऽध्येय श्रेयोऽभिलापिभि ॥
इय सस्कृतशिक्षाया गीता सस्कृतसेवकै ।
समस्तै श्रद्धया भक्त्या पठनीया मुहुर्मुहु ॥
सर्वसिद्धिकरी चैपा दुर्गासप्तशती यथा ।
आत्मन सस्कृतस्यापि जपनीया हितैपिभि ॥
इद कटुकमप्युग्र भैपज्य लाभकारकम् ।
निमील्य नयने पेय नून सर्वैर्मनीपिभि ॥
आद्योपान्तमिम ग्रन्थ पठिष्यति य आत्मवान् ।
स सस्कृत सस्कृतज्ञान् आत्मानञ्चोद्धरिष्यति ॥

विषय-सूची

सन्देशग्राहकस्य आत्मनिवेदनम्-संस्कृतशिक्षाया संस्कृतविदुषां संस्कृतच्छात्राणां च वर्तमानस्वरूपेण सुरभारत्याश्चिन्ता-तन्निराकरणाय विदुषां समीपे सन्देशदानस्य निश्चय -स्वप्ने सन्देशानां श्रावणम्-तेषामेव सन्देशग्राहकद्वारा पत्ररूपेण -आत्मना निवेदनञ्च— भूमिका

सन्देशदानाय सुरभारत्या उपक्रम सन्देशप्रयोजननिरूपणं च—

कटूक्तीनां कृते क्षमायाचना-एतन्निबन्धस्य साहसपूर्वक पठनाय आत्मसंशोधनाय नवनिर्माणाय च निवेदनम्— पृ० १

संस्कृतव्यवहारविषयकं प्रथमं प्रकरणम्

प्रथम सन्देश (संस्कृतविद्यालयेषु पठनपाठनयो. दैनिकव्यवहारे च संस्कृतभाषाया अप्रयोगमुद्दिश्य) संस्कृतव्यवहारस्य प्राचीनकालीना अवस्था-साम्प्रतिकी परिस्थिति -भाषणक्षमताया दिने दिने ह्रास —तन्निरोधस्य आवश्यकता-उपायनिरूपणम् — ४

द्वितीय सन्देश (आङ्गलकलाशालासु अध्यापने व्यवहारे वा संस्कृतस्य गरीयसीमुपेक्षामुद्दिश्य) सर्वथा आङ्गलभाषाया एव महत्त्वम्-सर्वत्र तस्या एव व्यवहार -तेन संस्कृतं दुर्बोधं, वक्तुमशक्यञ्चेति संस्कृतस्यापवाद -एवं नितान्त दयनीया अशोभनीया च स्थिति — ७

तृतीय सन्देश (सामान्यव्यवहारेऽपि क्लिष्टसंस्कृतभाषाया प्रयोगमुद्दिश्य) कानिचिद् उदाहरणानि-भाष्यकाराणां भाषाशैली—सरलसंस्कृतभाषाया उपहास —अत एव संस्कृतं महाकठिनमिति प्रवाद -प्रचाराय सरलसंस्कृतस्य प्रयोग आवश्यक — १०

चतुर्थ सन्देश (अनावश्यकत्वेऽपि वैदेशिकशब्दानां प्रयोगस्य बहुलतामुद्दिश्य। कानिचिद् उदाहरणानि-नवसंस्कृतशब्दानां निर्माणे संग्रहे वा अप्रवृत्ति -आङ्गलशब्देषु गौरवबुद्धि -आचार्यस्थाने "प्रिन्सिपल" शब्द रोचते-महती विडम्बना-वैदेशिकशब्दानां संस्कृतिविरोधिता— ११

पचम सन्देश (ग्राम्याणाम् अश्लीलानाम् अशुद्धशब्दानां च प्रयोगप्राचुर्यमुद्दिश्य) पूजानुष्ठानादिष्वपि संयमाभाव — १४

संस्कृतप्रचारविषयकं द्वितीयं प्रकरणम्

प्रथमः सन्देशः (संस्कृतप्रचाराय प्रयत्नस्य तदर्थं संघटनस्य च महान्तमभावमुद्दिश्य) न केवलं प्रचाराभावः प्रत्युत परित्यागोऽपि—यदि कश्चिदुत्साहस्तर्हि सोऽपि क्षणिक एव—परस्परं सहयोगस्यापि अभावः—अत एव न कश्चित् साफल्यं दुर्दशा च—तस्मात् प्रचारान्दोलनं परमावश्यकम्—प्रचारोपायाः—तदर्थं केषाञ्चित् जीवनदानस्य आवश्यकता— १६

द्वितीयः सन्देशः (पण्डितपुत्राणां संस्कृतज्ञानशून्यत्वमुद्दिश्य) संस्कृतगन्धशून्याः पण्डितपुत्राः—संस्कृतस्य प्रायेण अग्रेजीप्रचारः—महती गर्हणीया स्थितिः! पण्डितबालकानां संस्कृतशिक्षणमपरिहार्य्यम्—तदर्थं केचन नियमाः २१

तृतीयः सन्देशः (स्वकन्यानां स्वभार्याणाञ्च संस्कृतशिक्षणस्याभावमुद्दिश्य) प्राचीनविदुषीणां कवयित्रीणाञ्च चर्चा—स्त्रीभिः सह संस्कृते व्यवहाराय निवेदनम्—तदर्थं केषाञ्चिद् उपयोगिनां वाक्यानां सूची— २३

चतुर्थः सन्देशः (विदेशेषु संस्कृतप्रचारस्य कृते चिन्ताया उत्साहस्य चाभावमुद्दिश्य) विदेशेषु प्राक्कालीनस्य संस्कृतप्रचारस्य चर्चा—विदेशयात्रायै संस्कृतविदुषामाह्वानम्—श्रीमधुसूदनझामहोदयानां निदर्शनम्—विदेशयात्राया लाभाः—साम्प्रतिकं सौविध्यं च— २८

अध्ययनाध्यापनविषयकं तृतीयं प्रकरणम्

प्रथमः सन्देशः (अध्ययनाऽध्यापनपद्धतिगतान् दोषानुद्दिश्य) प्रारम्भिकशिक्षाया दोषाः—ग्रन्थानां समुचितरूपेण अध्यापनस्याध्ययनस्य वा अभावः—अर्थज्ञानस्य महती उपेक्षा—रटनस्य प्राधान्यम्—भाषाया विषयस्य वा सम्यग्ज्ञानस्य बुद्धिविकासस्य च नितान्तमभावः— ३२

द्वितीयः सन्देशः (अध्ययनाऽध्यापनादिषु अनुसन्धानात्मिकाया विवेचनात्मिकायाश्च प्रवृत्तेरभावमुद्दिश्य) केषाञ्चित् परमावश्यकानामनुसन्धेय विवेचनीयविषयाणां निदर्शनम्—संस्कृतभाषाया उत्तरोत्तरविकासेऽपि विदुषामनभिज्ञानं प्रमाणम्— ३६

तृतीयः सन्देशः (उच्चकक्षास्वपि संस्कृतभाषाया माध्यमेन अध्यापनाभावमुद्दिश्य) संस्कृतविद्वत्सु गम्भीरतायाः निरर्गलभाषणशक्तेरभावः—रसनोपयोगनम्—द्वाराणामुपरि दोषारोपः— ४२

चतुर्थः सन्देशः (शास्त्राणां प्रौढपाण्डित्यस्य दिने दिने ह्रासमुद्दिश्य) ह्रासस्य हेतवः—पदोन्नतपदे पण्डितानामुदासीनता—रक्षणोपायाश्च। ४४

पञ्चम सन्देश (संस्कृतशिक्षणपद्धतौ विद्यालयेषु च विवेचनात्मिकायां धर्मसंस्कृतिशिक्षाया अभावमुद्दिश्य) धर्मसंस्कृत्योर्विषये जिज्ञासाया अभाव –धार्मिकग्रन्थानामनुशीलनाभाव –ज्ञातव्यविषयाणां निरूपणम्–धर्मसंस्कृतिविषये परिवर्तनवादिनां प्राचीनतापोषकाणां च महत्त्वपूर्णग्रन्थानां सूची–धर्मसम्बन्धे केचन सविशेष विचारणीयविषया –फलश्रुतीनां दोष —४६

षष्ठ सन्देश. (परीक्षाबहिर्भूतानां ग्रन्थानां पठनेऽप्रवृत्तिमुद्दिश्य) बहूनां प्राचीनानां नवीनानाञ्च तादृशग्रन्थरत्नानां विवरणम्—पत्रपत्रिकाणां चर्चा–पाठशालीयपुस्तकालयेषु पुस्तकानामुपयोगविषयिणी अव्यवस्था –५१

सप्तम सन्देशः (जैन बौद्ध वाङ्मयस्याऽध्ययने श्रद्धाया रुचेश्चाऽभावमुद्दिश्य) जैन बौद्ध-वाङ्मयस्य विशालता—ऐतिहासिकदृष्ट्या च तयोर्महत्त्वम्—कतिपयग्रन्थानां सूची— ५८

अष्टम सन्देश. (सङ्गीताभिनयादिललितकलानां बहुलप्रयोगस्याभावमुद्दिश्य) कलानां महत्त्वम—सुललितगेयपद्यसवलितानां पुस्तकानां सूची—सुमधुरपद्यपाठस्य महत्त्वम्—केषाञ्चित् तादृशपद्यपाठकर्तॄणां चर्चा—सङ्गीतचर्चा–अभिनवगीतिकारा —सगीतरसिकानां चर्चा—अभिनयस्य प्रहसनस्य च महत्त्वम्—हास्यविनोदमयस्य साहित्यस्य परिचय — ६१

नवम सन्देश (अन्य-देशविदेशीय-भाषाणामध्ययने उत्कण्ठाभावमुद्दिश्य) भारतीयभाषाणां चर्चा—तासां महत्त्वम्—वैदेशिकभाषाणामध्ययनस्य आवश्यकता–संस्कृतज्ञानां कृते भारतीयभाषाणामध्ययने सारल्यम्। ६८

दशम सन्देश (भाषणे लेखने वार्तालापादौ च पाटवस्याभावमुद्दिश्य) एतत्पाटवाभावे महापण्डितानामपि दयनीया दशा—पाटवसम्पादनस्योपाया —पूजापाठादौ विशेषकालयापनस्याहितकरत्वम्— ७५

एकादश सन्देश (विद्यार्थिषु आवश्यकगुणानां तथाऽदर्शस्वरूपस्य चाऽभावमुद्दिश्य) छात्राणां दयनीय स्वरूपम्—योग्यच्छात्राणां न्यूनता—भविष्णूनां बाहुल्य, परन्तेषां प्रोत्साहनस्याभाव —छात्रेषु अध्यापकैरेव हीन भावनाया उत्पादनम्–छात्राणामादर्शस्वरूपम्–तत्सम्पादन पाठशालानां परम कर्तव्यम्–छात्राणामपि अत्र अवधानदानस्य आवश्यकता–स्वय स्वयोग्यतानिर्माणाय छात्रै प्रयतनीयम्— ७८

देशसमाजसेवाविषयक चतुर्थं प्रकरणम्

प्रथम सन्देश (धर्मप्रचारे सामाजिकदोषाणां निराकरणे च प्रवृत्तेरभावमुद्दिश्य) सामाजिकदोषाणां निरूपणम्—विद्वत्सु तन्निराकरणस्य

चिन्तनव्यवस्थानिर्माणे स्वयं पुरोगामिताया अभावः—परानुकरणप्रियता; पश्चाद्गामिता च—उदाहरणानि— पृ० ११४

षष्ठः सन्देशः (वर्तमानयुगस्य नवीनविचाराणां परिज्ञाने तथा तेषां हेयोपादेयबुद्ध्या परीक्षणे च नितान्तमौदासीन्यमुद्दिश्य) नवविचाराणां बाहुल्यं प्राबल्यं च—प्राचीनविचाराणां शनैः शनैः दौर्बल्यं नाशश्च—बहूनां संस्कृतपण्डितानामपि क्रान्तिकारिणो विचाराः—तेन पण्डितेषु महान् व्यामोहः क्षोभश्च—परन्तु प्राचीननवीनयोः युक्तायुक्तत्वविचारणायां अप्रवृत्तिः असामर्थ्यञ्च-विचारणायां महती आवश्यकता— ११७

सप्तमः सन्देशः (पण्डितेषु छात्रेषु च परिश्रमापेक्षया प्रतिग्रहादिद्वारा द्रव्यार्जने विशेषप्रवृत्तिमुद्दिश्य) प्रतिग्रहस्य निन्दनीयता—परिश्रमद्वारा जीविकोपार्जनस्य महत्त्वम्—तस्य विविधोपायप्रदर्शनम्—छात्रेष्वपि वृत्तिग्रहणस्य क्षेत्रभोजनस्य च दुष्प्रवृत्तिः—परिश्रमद्वारा वृत्तिसम्पादनस्य आवश्यकता—कानिचित् तथाविधानि कार्याणि— १२१

अष्टमः सन्देशः (तमालपत्रस्य भक्षणमुद्दिश्य) श्रुतिस्थाने मुखे मुखे "सुर्ती"—महती हानिः—तथापि सर्वत्र तमालपत्रस्य अप्रतिहतः प्रवेशः—न केवलं स्वयं भक्षणं प्रत्युत शिष्याणां शिक्षणमपि—वर्जनस्य प्रतिज्ञा— १२६

नवमः सन्देशः (निवास-वस्त्र-शयनादिषु स्वच्छताया परिष्कारस्य चाऽभावमुद्दिश्य) उदाहरणानि—कामसूत्रे गृहपरिष्कारस्य महत्त्वम्—सामाजिकदृष्ट्यापि स्वच्छताया आवश्यकता—केचन पालनीया नियमाः—परन्तु तेषामुपेक्षा—निदर्शनानि—मालिन्येन ऋषित्वं नायाति—मध्यममार्गस्य अवलम्बनमुचितम्— १२७

दशमः सन्देशः (संस्कृतशिक्षितानां जीवने प्रायेण आध्यात्मिकोत्कर्षस्य मनोबलस्य चाऽभावमुद्दिश्य) आध्यात्मिकानां गुणानां सूची—तत्रापि मनःशुचितायाः महत्त्वम्—संस्कृतशिक्षायां धर्माऽध्यात्मप्रधानतायाः कीर्तनम्—परं व्यवहारे तददर्शनम्—दम्भादीनां बाहुल्यम्—व्यवहारशुद्धेरभावः—संस्कृतशिक्षायाः विशिष्टं फलं किम्?—कर्तव्यानां निर्देशः— १३०

एकादशः सन्देशः (दीनताया हीनतायाश्च समाजव्यापिनीं भावनामुद्दिश्य) एतद्भावनादूरीकरणाय संस्कृतभाषायाः संस्कृतपण्डितानां च महत्त्ववर्णनम्। संस्कृतस्य संस्कृतपण्डितानाञ्च उपरि विधीयमानानामाक्षेपाणां विस्तृता चर्चा—तेषां विस्तृतं समाधानम्—संस्कृतशिक्षायाः संस्कृतशिक्षितानां च निर्दोषत्वस्य महत्त्वस्य च साधनम्—संस्कृताध्ययनस्य सार्थकत्वसमर्थनम्—संस्कृतशिक्षायाः विज्ञानस्य च अविरोधः—संस्कृते वैज्ञानिकं साहित्यम्—प्राचीन-

भारते भौतिकविज्ञानस्य प्रयोगः—आधुनिकविज्ञानस्य महत्त्वम्—परन्तु केवलस्य विज्ञानस्य अनर्थकारिता—संस्कृते शास्त्रविज्ञानयोः समन्वयः—भारतीयजीवनस्य सर्वाङ्गपूर्णता—पाश्चात्यसभ्यतायाः दोषाः—पण्डितसमाजे स्वाभिमानस्य आत्मविश्वासस्य च प्रतिष्ठायाः आवश्यकता— १३४

द्वादशः सन्देशः (वाराणसेयसंस्कृतविश्वविद्यालयस्य सर्वाङ्गपूर्णतां सर्वावयवानवद्यताञ्च उद्दिश्य) संस्कृतविश्वविद्यालयस्य वर्तमानं मनोरमं स्वरूपम्—तत्रापि उत्कर्षाधानस्य आवश्यकता—केचन उपयोगिनः प्रस्तावाः—अधिकारिभ्यो निवेदनम्— १४७

त्रयोदशः सन्देशः (विदुषां कृते अन्यान्यपि कानिचिदावश्यकानि कार्याणि उद्दिश्य) संस्कृतस्य ह्रासे अन्येषामपि बहूनामुत्तरदायित्वस्य चर्चा—तेषां स्वकर्तव्यपालनं प्रति उद्बोधनस्य आवश्यकता—स्वसमाजस्यापि संशोधनस्य आवश्यकता—संस्कृतसेविनां प्रोत्साहनस्य आवश्यकता—अन्यत् सर्वं कर्तव्यं देशकालानुसारं स्वयमेव पण्डितैश्चिन्तनीयं सम्पादनीयं च— १५७

उपसंहारः—एतद् संनिवेदनेन सन्देशदानेन च गुरुभारस्य कामं निर्वृतिः सन्तोषश्च—सन्देशानां पालनाय अखिलभारतीयपण्डितानामाह्वानम्—एतद्ग्रन्थस्य प्रशस्तिः—अप्रियोक्तीनां कृते क्षमायाचना—संस्कृतविद्वत्समाजस्य पुनरभ्युदयाय भगवतोऽभ्यर्थना— १७२

परिशिष्टम् 'क' पुस्तके चर्चितानां व्यक्तीनां संक्षिप्तपरिचयः— १७६

परिशिष्टम् 'ख' पुस्तके चर्चितानां संस्थानां तथा स्थानानां परिचयः। १८४

परिशिष्टम् 'ग' साम्प्रतमुपलभ्यमाना संस्कृतपत्रपत्रिकाः। १८६

परिशिष्टम् 'घ' संस्कृतविषयप्रधानाः काश्चन शोधपत्रिकाः। १८७

परिशिष्टम् 'ङ' भारतस्य महत्त्वविषये छन्दोबद्धा केचन महत्त्वपूर्णा कथाः। १८८

शुद्धिपत्रम्। १८९

पुस्तकप्रकाशने आर्थिकसाहाय्यकारिणां चिरस्मरणीया नामावलिः। १९१

सन्देशवाहकस्य आत्मनिवेदनम्

शास्त्रान्तरेपु कुशलेष्वपि कालयोगात्
दोपानवेक्ष्य तदपायकराननेकान् ।
वाणी विपरणहृदयाऽपि हिताय तेपा
कल्याणिनी करुणयाऽकुलिता बभूव ॥१॥

नो यद्यपीह गुणदोपमये प्रपञ्चे
सम्भाव्यते क्वचिदशेप—गुणावतार ।
लोके तथापि विदुपामिह दोपलेशोऽ
प्यालोकितो वितनुते विपुल विपादम् ॥२॥

प्रायो जनाश्च सुगुणानपहाय पु सा
दोपस्य लेशमपि भूरि विशेपयन्ति ।
तस्मादवेक्ष्य मनसा स्वयमात्मदोपान्
तेपा स्वतोऽपनयने सुधियाऽवधेयम् ॥३॥

कस्यापि कोऽपि हितकृन्न जनस्य जन्तु
स्वात्मैव बन्धुरखिलस्य जनस्य लोके ।
आशामुदस्य मनुजेन तत परेपा
यत्न स्वय निजसमुद्धरणे विधेय ॥४॥

इत्थ विचिन्त्य बहुधा सुवियामशेप—
दोपक्षयाय पुनरभ्युदयाय चैपाम् ।
देवी दयार्द्रहृदया सविधेऽथ तेपा
सन्देशदानमुचित किल निश्चिकाय ॥५॥

यद्यप्रिय भवतु वा कटु वा नितान्त
वक्तव्यमेव समये सुधिया हित यत् ।
नून व्रणेपु परिणामहितावहापि
शल्यक्रिया भवति कि सुखदा कदाऽपि ॥६॥

को वा परस्य निखिलेन निरीक्षितेन
छिद्रेण लाभ इति नैव बुधेन वाच्यम् ।
छिद्रं परस्य यदि तस्य विघातकं स्यात्
सम्मून्यमेव सुजनेन हिताय तूर्णम् ॥७॥

कश्चित् परोऽयमिति वा कथमभ्युपेत
शिक्षा यदीह "वसुधैव कुटुम्बकं" न ।
आसेतुशीतगिरिवर्तिबुधान् समस्ता—
नात्मानमेव ननु सत्यमहन्तु जाने ॥८॥

इत्थं विनिश्चयवती बहुदु खिनी सा
मामेव बाहकपदे विनियोजयन्ती ।
स्वप्ने प्रकाशित - मनोगत - सर्वमाया
सन्देशजातमिदमश्रुमुखी बभाषे ॥९॥

उल्लङ्घ्यतामथ कथन्नु मया विशेषा
वाग्देवताकथित एव निदेश आद्य ।
उन्येत चेत्थं यथाकथितं बुधेभ्यो
नून कदाचन कृपाऽरुणलोचना स्यु ॥१०॥

सर्वे विपक्षे विहितेऽपि खलु प्रयत्ने
दास्यन्ति तत्र किमु वा सुधियोऽवधानम् ।
केचित् कठोरहठवादपरा ध्यमीषां
प्राय परस्य वचनं न समाद्रियन्ते ॥११॥

आशङ्कयाऽहमनया चलितोऽपि चेत
स्वस्थ विधाय बहुधा विमृशन्नरोपम ।
मत्या हितानि सुधियामथ शारदाया
आदेशपालननिविष्टमना अभूवम् ॥१२॥

सेयं श्रीगुरुभारतीमुदिता स देशवाणी मया
कल्याणाय मनीषिणामनुपमं पद्यैरुपस्थापिता ।
मन्ये पण्डितमानवा सुमनसो विज्ञाय सार्थं हितं
सन्देशोऽतु सर्वपुरतु निरतां नून निदद्वारग ॥१३॥

सन्देशेषु पुनर्मयाऽपि कतिचिद् भावा निजा योजिता

पुष्ट्यै स्वानुभवेन चेद्, अनुचित ज्ञेय न विद्वज्जनैः ।

य स देशितुराशय सुनिपुणैर्वाचा विलासैर्निजे

सुस्फीत कुरुते स एव कुशल सन्देशवाहो मत ॥१४॥

देशेपूत्तरदक्षिणेपु सुचिरादाहिण्डता सर्वतो

विद्वद्भि सह सङ्गतीर्विदधता विद्यालयान् पश्यता ।

यज्ज्ञात खलु साध्वसाधु सकल वृत्त तदावेदित

सत्य सस्कृत-सस्कृतज्ञविबुधश्रेयोधिया केवलम् ॥१५॥

दूत कश्चन विप्रिया अपि गिर सन्देशभूता वदन्

नीतिज्ञैरनुमन्यते न च पुनर्दुर्वाच्यता गच्छति ।

तन्मन्येऽयमपि प्रसन्नमनसा सन्देशहारी जनो

विद्वद्भि सदसद्विवेककुशलैर्मर्पिष्यते सर्वथा ॥१६॥

प्रार्थ्यन्ते च पुनर्निव धमखिल दृष्ट्वा धिया स्वस्थया

स्वाभिप्रायनिवेदनाय सुधिय सर्वे मया सादरम् ।

येनाय परिमार्जित प्रगुणितो भूयात् सदा सस्कृत-

चेत्रे निर्मलमार्गदर्शकमहादीपप्रकाशोपम ॥१७॥

भ्राम भ्राम पुनरहमित शीघ्रमेवाविराम

ग्रामे ग्रामे सकलविदुपा पादमूलोपविष्ट ।

वाणीमेतामनुदिनमनुप्राणिनीं श्रावयिष्ये

विद्वद्वर्गा मुहुरपि यथा वन्द्यता यातु लोके ॥१८॥

मन्ये सर्वे स्वपरगणना-मान-मात्सर्यदोषै—

रस्पृष्टान्त करणसुभगा सद्गुणग्राहिणश्च ।

विद्वद्वर्या सरस-करुणा स्नेह-सौहार्द - पूरे—

दूरे दूरेऽप्यसमसमये मत्सहाया भवेयु ॥१९॥

———

को वा परस्य निखिलेन निरीक्षितेन
छिद्रेण लाभ इति नैव बुधेन वाच्यम्।
छिद्रं परस्य यदि तस्य विघातकं स्यात्,
संसूच्यमेव सुजनेन हिताय तूर्णम् ॥७॥

कश्चित् परोऽयमिति वा कथमभ्युपेयः
शिक्षा यदीह "वसुधैव कुटुम्बकं" न।
आसेतुशीतगिरिवर्तिबुधान् समस्तान्
नात्मानमेव ननु सत्यमहन्तु जाने ॥८॥

इत्थं विनिश्चयवती बहुदुःखिनी सा
मामेव वाहकपदे विनियोजयन्ती।
स्वप्ने प्रकाशित - मनोगत - सर्वभावा
सन्देशजातमिदमश्रुमुखी बभाषे ॥९॥

उल्लङ्घ्यतामथ कथन्नु मया विशेषो
वाग्देवताकथित एष निदेश आद्यः।
उन्येत चेदथ यथाकथितं बुधेभ्यो
नूनं कदाचन रुषाऽरुणलोचनाः स्युः ॥१०॥

सर्वे विपश्चि विहितेऽपि खलु प्रयत्ने
दास्यन्ति तत्र किमु वा सुधियोऽवधानम्।
केचित् कठोरहठवादपरा अमीषां
प्रायः परस्य वचनं न समाद्रियन्ते ॥११॥

आशङ्कयाऽहमनया चलितोऽपि चेतः
स्वस्थं विधाय बहुधा विमृशन्नशेषम्।
मत्वा हितानि सुधियामथ शारदायाः
आदेशपालननिविष्टमना अभूवम् ॥१२॥

सेयं श्रीसुरभारतीसमुदिता सन्देशवाणी मया
कल्याणाय मनीषिणामनुपदं पद्यैरुपस्थापिता।
मन्ये पण्डितवान्यया सुमतयो विज्ञाय लाभं निजं
सन्देशेषु भवेयुरेषु नितरां नूनं निरुद्धादराः ॥१३

सन्देशेषु पुनर्मयाऽपि कतिचिद् भावा निजा योजिता
पुष्ट्यै स्वानुभवेन चेद्, अनुचित ज्ञेय न विद्वज्जनै ।
य स देशितुराशय सुनिपुणैर्वाचा विलासैर्निजे
सुस्फीत कुरुते स एव कुशल स-देशवाहो मत ॥१४॥

देशेपूत्तरदक्षिणेषु सुचिरादाहिण्डता सर्वतो
विद्वद्भि सह सङ्गतीर्निदधता विद्यालयान् पश्यता ।
यज्ज्ञात खलु साध्यसाधु सकल वृत्त तदावेदित
सत्य सस्कृत-सस्कृतज्ञनिवुभश्रेयोधिया केवलम् ॥१५॥

दूत कश्चन विप्रिया अपि गिर सन्देशभूता वदन्
नीतिज्ञैरनुगन्यते न च पुनर्दुर्वाच्यता गच्छति ।
तन्मन्येऽयमपि प्रसन्नमनसा सन्देशहारी जनो
विद्वद्भि सदसद्विवेककुशलैर्मर्पिष्यते सर्वथा ॥१६॥

प्रार्थ्यन्ते च पुनर्निव-धमखिल दृष्ट्वा धिया स्वस्थया
स्वाभिप्रायनिवेदनाय सुधिय सर्वे मया सादरम् ।
येनाय परिमार्जित प्रगुणितो भूयात् सदा सस्कृत-
क्षेत्रे निर्मलमार्गदर्शकमहादीपप्रकाशोपम ॥१७॥

भ्राम भ्राम पुनरहमित शीघ्रमेवाविराम
ग्रामे ग्रामे सकलविदुषा पादमूलोपविष्ट ।
वाणीमेतामनुदिनमनुप्राणिनी श्रावयिष्ये
विद्वद्वर्गो मुहुरपि यथा वन्यता यातु लोके ॥१८॥

मन्ये सर्वे स्वपरगणना-मान-मात्सर्यदोषै—
रस्पृष्टान्त करणसुभगा सद्गुणग्राहिणश्च ।
विद्वद्वर्या सरस-करुणा-स्नेह-सौहार्द - पूर्ण-
दूरे दूरेऽप्यसमसमये मत्सहाया भवेयु ॥१९॥

माङ्गलिकसूक्तयः

वयं राष्ट्रे जागृयाम पुरोहिताः ।

—यजुर्वेद ६।२३

सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

—कठोपनिषद्–शान्तिपाठ

सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे सं जानाना उपासते ॥

—ऋग्वेद १०।१९१।२

आम्नायं बहुभिरवाप्यते तपोभि—
रेतल्लब्ध्वा न रतिपरेण हेलनीयम् ।
स्वाध्याये तपसि दमे च नित्ययुक्तः
क्षेमार्थी कुशलपरं सदा यतस्व ॥

—महामुनिर्वेदव्यास

परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।
सङ्गतं श्रीसरस्वत्योर्भूयादुद्भूतये सताम् ॥

—महाकवि कालिदास

अङ्गणवेदिर्वसुधा
कुल्या जलधिः स्थली च पातालम् ।
वल्मीकश्च सुमेरुः
कृतप्रतिज्ञस्य वीरस्य ॥

—महाकविबाणभट्ट

यादृशाः शङ्कराचार्य चाणक्य सायणस्तथा ।
तिलको मालवीयश्च तादृशाः सन्तु पण्डिताः ॥

—सन्देशवाहक

सुरभारती-सन्देशः

तत्रादौ सन्देशदानाय सुरभारत्या उपक्रम सन्देश-प्रयोजन-निरूपण च ।

अयि भो पण्डिता वृद्धा नवीना शास्त्रिणस्तथा ।
विद्यालय-महाविद्यालयाना शिक्षकास्तथा ॥१॥
शाब्दकास्तार्किकाश्चैव साहित्याध्यापकास्तथा ।
ज्योतिर्विदो वैदिकाश्च वैद्या पौराणिका अपि ॥२॥
अथ चाङ्गलकालेज प्राध्यापकधुरन्धरा ।
विश्वविद्यालयाना च विभागपतयस्तथा ॥३॥
औत्तरा दाक्षिणात्याश्च पूर्वपश्चिमजा पुन ।
स्थलजा पर्वतीयाश्च सर्वे सम्मान्यपण्डिता ॥४॥
अह चिरपरिज्ञाता भवता सुरभारती ।
विनिवेद्य किमप्यद्य निवेदयितुमुत्सहे ॥५॥
तद्दत्त्वा समय कञ्चिद् अवधान पुरस्सरम् ।
आकर्णयिष्यथ मन्तश्चेत् महतीय कृपा भवेत् ॥६॥
अह बहुविधै कष्टै पीड्यमानाऽधुना भृशम् ।
चिन्तया च विशुष्यन्ती क्षय यामि दिने दिने ॥७॥
न च तद् वातज कष्ट कफज पित्तज न वा ।
न वा दैवकृत तत्र भव त खलु कारणम् ॥८॥
भवतामेव दोषा हि शोषणे मम कारणम् ।
यन्निवेदयितु तु सादयमद्य ममोद्यम ॥९॥

सन्ति यद्यपि भूयासस्तादृशा अपि पण्डिता ।
अनवद्यैर्गुणैर्येषा प्रसीदामि निरन्तरम् ॥१०॥
तेषामगाध पाण्डित्य चरित्र चापि निर्मलम् ।
व्यवहारो मनोहारी सर्वमेव सुखावहम् ॥११॥
तथाप्यधिकसख्येषु कतिचिद्दापदर्शनात् ।*
नितान्त दु खिता भूत्वा इदमद्य निवेदये ॥१२॥
न चेदमपमानाय निन्दायै दूषणाय वा ।
वचन मम मन्यध्व मनागपि, मनीषिण ॥१३॥
इद तु कथ्यते सर्वं भृश पीडितया मया ।
वस्तुतो भवतामेव समुद्धाराय केवलम् ॥१४॥
भवतामेव भूत्यर्थं भवतामेव वृद्धये ।
भवतामेव मानार्थं निखिलोऽय मम श्रम ॥१५॥
भवन्त सुखिन सन्तु भवन्त सन्तु पूजिता ।
तथा यशस्विन सन्तु इत्येको मे मनोरथ ॥१६॥
तस्माद् यदप्रिय किञ्चिन्मुखान्मे निर्गत भवेत् ।
प्रीत्या तदपि सोढव्य कटुक भेषज यथा ॥१७॥

यतो हि—

यो दोष प्रकटीकुर्यात् त्रुटिं वा परिदर्शयेत् ।
स च मित्र रिपुर्वापि सम्मान्यो भूतिमिच्छता ॥१८॥
इय च परमा विद्या अय च परमो गुण ।
इदमभ्युन्नतेर्मूल यत् स्वदोषानुचिन्तनम् ॥१९॥
अणीयासमपि स्वीय दोष ज्ञात्वा तु ये जना ।
प्रयतन्ते तमुद्धर्तु तेषामभ्युदयो ध्रुव ॥२०॥

---

* अस्मिन् विषये म० म० श्री रामावतार शर्म्मणा, श्री मदाचार्य शालिग्राम शास्त्रिणा तथा म० म० श्री गिरिधरशर्मचतुर्वेदि महोदयाना मपि लेखा अवलोकनीया ।

अथ च—

अथ ये तु श्रमेऽशक्ता वर्षीयांसो मनीषिणः ।
कृतकृत्या निवृत्ताश्च न तान् किञ्चिदह ब्रुवे ॥२१॥
पर ये पण्डिता प्रौढा शक्ता सर्वेषु कर्मसु ।
यौवन वा नव येषाम् उद्दामोत्साहसयुतम् ॥२२॥
ते कथ खलु निश्चेष्टैरलसैर्लक्ष्यवर्जितै ।
उपहासास्पदैर्भूत्वा स्थेय कापुरुषैरिव ? ॥२३॥
अत स्वीयसमाजस्य आत्मनश्च हितैषिभि ।
पण्डितैर्निखिलैरेता श्रोतव्यास्त्रुटयोऽव्यथम् ॥२४॥
श्रुत्वा सर्वमिद धैर्याद् अवधार्य तथाऽसकृत् ।
नव्य-भव्य स्वरूपस्य निर्माणे सन्तु तत्पराः ॥२५॥

आयात पण्डितवरा उपविश्य सार्ध
श्रुत्वा विचिन्त्य च समस्तमिम निबन्धम् ।
मिथ्याभिमान-रहिता द्रुतमात्मशुद्धौ
बद्धादरा भवत सम्मिलितप्रयत्ना ॥२६॥

आत्मन. समीक्षणम् आत्मन परीक्षणम् ।
आत्मनो निरीक्षण श्रेयसो हि लक्षणम् ॥२७॥

संस्कृत-व्यवहार-विषयकम्
प्रथमं प्रकरणम्
प्रथमः सन्देशः
(संस्कृतविद्यालयेषु पठन पाठनयो दैनिक-व्यवहारे च संस्कृतभाषाया अप्रयोगमुदिश्य)

इदमेव च मे तावत् प्रथम क्लेशकारणम् ।
भवन्त पाठशालासु यद् वदन्ति न संस्कृतम् ॥१॥
मां परित्यज्य यद् यूय यथेच्छ देश्यभाषया ।
पाठशालास्वपि बूथ तन्मे कष्टतर महत् ॥२॥
अहन्तु भवतामेव पूर्वजै ख्यातकीर्तिभि ।
लालिता पालिता पूर्वं पोषिता परिवर्द्धिता ॥३॥
शाश्वतव्यवहारेण स्वाध्यायाभ्यसनैस्तथा ।
प्रापिता दूरदेशेषु चरमामुन्नतिं गता ॥४॥
पर सम्प्रति सैवाह तेषामेव कुलोद्भवै ।
भवद्भिर्व्यवहारेभ्य कर्णमर्द बहिष्कृता ॥५॥
भवन्तो मम माहात्म्य वर्णयन्तोऽन्यसन्निधौ ।
स्वय नैव वदन्तीति कियतीय विडम्बना ॥६॥
याऽहमास प्रचलिता पुरा देशान्तरेष्वपि ।
तस्या मे साम्प्रत जाता स्वगेहेपीदृशी दशा ॥७॥
संस्कृत पाठयन्तोऽपि भवन्त पण्डिता मिथ ।
संस्कृत नैव भाषन्ते इति मे महती व्यथा ॥८॥
नाध्यापने नाध्ययने न च प्रश्ने न चोत्तरे ।
न चापि वार्तालापादौ यूय वदथ संस्कृतम् ॥९॥
अहमध्यापनागारे पूजाया यज्ञकर्मणि ।
तिष्ठामि गुप्ता सर्वत्र आत्मन अनपेच्छया ॥१०॥

तथापि भवता वक्त्रात् छात्राणां वा कदाप्यहम् ।
शृणोमि संस्कृतं नैव इति मे दूयते मनः ॥११॥
न वदन्ति स्वयं, नापि स्वशिष्यान् प्रेरयन्ति वा ।
भवन्तः सर्व एवापि देश्यभाषां प्रयुञ्जते ॥१२॥
न च सम्भाषणे क्लेशो न व्ययो नापि रोगभीः ।
न चाऽपमानो न व्रीडा न च वा पातकं पुनः ॥१३॥
तथापि यद् भवन्तो मे व्यवहारं न कुर्वते ।
तत्र को हेतुरित्येतत् निर्णेतुं नैव पारये ॥१४॥
अनेके भवतां मध्ये आचार्या अपि पण्डिताः ।
संस्कृते न क्षमाः कर्तुं सम्यग् भावप्रकाशनम् ॥१५॥
वदन्त्यर्धं हसन्त्यर्धं खुं खुं च बहु कुर्वते ।
अनेका कुर्वतेऽशुद्धीरपि सामान्यभाषणे ॥१६॥
अवदिष्यन् भवन्तश्चेत् स्वशिष्यैः सह संस्कृतम् ।
अभविष्यन् भवन्तोऽपि प्रौढाः संस्कृतभाषणे ॥१७॥
भवतामेव लाभः स्याद् भूयानेतेन कर्मणा ।
परं भवद्भिर्विषये ध्यानं नैवात्र दीयते ॥१८॥
मुहुर्मुहुर्बोध्यमाना प्रार्थ्यमानास्तथा मुहुः ।
बुध्यन्तोऽपि निजं लाभं भवन्तस्तं न कुर्वते ॥१९॥
भवतामेव दोषेण भवद्विद्यार्थिनोऽपि हि ।
शास्त्र्याचार्य-परीक्षासु पठन्तः श्मश्रुला अपि ॥२०॥
भाषणे लेखने वार्तालापे प्रश्ने तथोत्तरे ।
भवन्ति सर्वथाऽशक्ताः सर्वे संस्कृतभाषणे ॥२१॥
परं भवन्तश्छात्राणां पश्यन्तोऽपीदृशीं त्रुटिम् ।
न व्यथन्ते त्रपन्ते वा किमाश्चर्यमतः परम् ॥२२॥
"सर्वे विद्यार्थिनो मे स्युः शक्ताः संस्कृतभाषणे" ।
कथं नैतादृशी श्रद्धा भवतां हृदि जायते ॥२३॥
यैश्छात्रैरथवा सेवा भवतां क्रियते सदा ।
भवन्तः संस्कृतोक्त्या तानुपकुर्वन्ति नो कथम् ॥२४॥

अतो हे पण्डिता सर्वे आचार्या शास्त्रिणस्तथा ।
महामहोपाध्यायाश्च सर्वेषा भवतां पुर ॥२५॥
एकैनैय प्रार्थना मे यद् भवद्भि परस्परम् ।
स्वीयासु पाठशालासु मत्प्रयोगो विधीयताम् ॥२६॥
न त्वह कामये पूजा पाठ वापि न कामये ।
कामये केवल स्वीय व्यवहार भव मुखात् ॥२७॥
अध्यापका ! मिथो यूय स्वशिष्यैश्च विशेषत ।
सम्भवेच्चेत् स्वभृत्यैश्च सस्कृत नृत सर्वदा ॥२८॥
इय मे महती वाञ्छा यच्छिष्या गुरवस्तथा ।
वद तु बहुधा सर्वे पाठशालासु सस्कृतम् ॥२९॥
विद्यार्थी पाठशालाया प्रविष्टो यद्दिने भवेत् ।
तद्दिनादेव वक्तव्य सरल तेन सस्कृतम् ॥३०॥
भवद्भिर्यन्मुखेनैव "आओ जाओ" निगद्यते ।
आगच्छ गच्छेति कथं तन्मुखेनैव नोच्यते ॥३१॥
ये ये भवद्भिर्दीयेरन् आदेशास्तान् प्रति स्वयम् ।
सस्कृते खलु ते सर्वे भवेयुर्नान्यथा क्वचित् ॥३२॥
भवन्मुखात् समाकर्ण्य छात्रा सस्कृतभाषणम् ।
तेऽपि वीतत्रपाऽशङ्का वदिष्यन्त्येव सस्कृतम् ॥३३॥
भवतामपि चाभ्यासो भविष्यत्यचिरेण वै ।
सकोचोऽयोग्यता लज्जा सर्व दूरे भविष्यति ॥३४॥
यदि वा शिक्षणाभावात् अनभ्यासवशेन वा ।
तथा त्रुटिवाक्यानामनुवादे प्रमादपि ॥३५॥—
भवन्तो यदि लज्जन्ते भयभीता भवन्ति च ।
तदा तद्दोपनाशाय प्रयत्न क्रियता नव ॥३६॥
एव सङ्कोचमाकुञ्च्य हित्वाऽलस्य त्रपा तथा ।
भूयो भवत सन्नद्धा मत्प्रयोगाय पण्डिता ॥३७॥
नहि मे प्रान्तभाषाभि ग्राम्यभाषाभिरेव वा ।
ईर्ष्या द्वेषा विरोधो वा लेशमात्रोऽपि विद्यते ॥३८॥

इमा अपि तु सन्तत्यो ममैव खलु वल्लभा ।
चिरं जीवन्तु वर्धन्तामिति मे हार्दिकी स्पृहा ॥३९॥
परं भवन्तो जायन्तां संस्कृतस्यापि भाषणे ।
सम्यक् समर्था इत्येकं केवलं मे समीहितम् ॥४०॥
भवता चिबुकं धृत्वा भूयो भूयो निवेदये ।
एकमात्रामिमामिच्छां भवन्तः पूरयन्तु मे ॥४१॥
इदमेकं ममाभीष्टं भवद्भिः पूरितं यदि ।
जीविष्यन्ति भवत्पुत्राः सुखिनः शरदां शतम् ॥४२॥

स्थाने स्थाने पथि पथि गृहाभ्यन्तरे वा बहिर्वा
गोष्ठ्यां गोष्ठ्यां सदसि सदसि प्रान्तरे वाऽपणे वा ।
यत्र क्वापि प्रणयिनि जने सङ्गते संस्कृतज्ञे
वार्तालापो भवतु भवतां देववाणी-विशिष्टः ॥४३॥

द्वितीयः सन्देशः

(आङ्गलकलाशालासु अध्यापने व्यवहारे वा
संस्कृतस्य गरीयसीमुपेक्षामुद्दिश्य)

'कालेजे'षु च ये केचिद् विश्वविद्यालयेषु वा ।
आचार्याः सन्ति भूयांसः प्राचार्याश्चाप्यनेकशः ॥१॥
तेषां प्रतिष्ठा महती प्रभूतञ्चापि वेतनम् ।
निवासे वेषभूषादौ तथा गुर्वी विशिष्टता ॥२॥
परं तेष्वपि विद्वांसो बहवः सुरभाषया ।
वदने लेखने वापि दृश्यन्ते बहुदुर्बलाः ॥३॥
एते संस्कृतभाषाया आध्यापकपदे स्थिताः ।
बाहुल्येनाङ्गलभाषाया व्यवहारं वितन्वते ॥४॥
पाठयन्त्याङ्गलभाषाया ब्रुवते चाङ्गलभाषया ।
लिखन्ति चाङ्गलभाषाया वैदेशिकजना इव ॥५॥
पाठं संस्कृतभाषाया ग्रन्थानामाङ्गलभाषया ।
शोभते कथमेतेषामिति वक्तुं न पारये ॥६॥

एभि सस्कृतभाषाया व्याख्यानादिभयादहो ।
व्याख्यानाय परेभ्योऽपि दीयतेऽवसरो नहि ॥७॥
अनेनैव च दोषेण तेषा विद्यार्थिनोऽपि हि ।
भाषणावसरे प्रायो दूरे तिष्ठन्ति भीरव ॥८॥
"कालेजे' षु त्वनेकेषु भारतभ्रमणे मया ।
वीक्षिता गुरव शिष्या उभये मौनधारिण ॥९॥
कासुचित्त्वथ शालासु सस्कृतस्यापि ससदि ।
उपक्रमोपसहारौ आग्ल्यामेव मया श्रुतौ ॥१०॥
तत्रैवाङ्गलभाषाया आचार्या आग्लभाषया ।
प्रवदन्ति यथा तद्वत् सस्कृतज्ञा न सस्कृते ॥११॥
इमा परिस्थिति दृष्ट्वा सभासु विषमामहम् ।
मुख गोपायितु स्थान न लभेऽन्वेषयन्नपि ॥१२॥
पण्डितताना त्रुटिं मत्वा मदीयामेव मानवा ।
दुर्गमेति कठोरेति निश्वसन्ति दृढ तत ॥१३॥
एतदेव च तत्रत्या दृष्ट्वा विद्यार्थिनो दृशा ।
सस्कृत कठिन मत्वा तदधीतेरुदासते ॥१४॥
'हाईस्कूल' स्थितान् तस्मात् कालेजाध्यापकास्तथा ।
विश्वविद्यालयस्थाश्च सर्वान् पण्डितपुङ्गवान् ॥१५॥
अह बद्ध्वाञ्जली मूर्ध्नी भूयो भूयो निवेदये ।
नात परमयज्ञा मे विज्ञा भूयो विधीयताम् ॥१६॥
यद् तु सस्कृते छात्रै सह कक्षासु सर्वदा ।
पाठयन्तु तथा सर्वान् ग्रन्थान् सस्कृतया गिरा ॥१७॥
आसीदेक पुरा काल प्रतिष्ठा यत्र केवलम् ।
भाषणादाग्लभाषाया विदुषा समजायत ॥१८॥
अद्य सा तु न दुर्बुद्धि सुधीर्नृदे विलोक्यते ।
सर्वे शृण्वन्ति गैर्वाणीं वाणीं सुश्रद्धयाऽधुना ॥१९॥
तस्मादद्याऽप्रतिष्ठाया भीति त्यक्त्वा त्रपा तथा ।
देववाणीप्रयोगस्य पन्था प्रस्थाप्यतां नव. ॥२०॥

पद्यपाठै सुरुचिरै गीतैश्चापि मनोहरै ।
नाटकैर्भाषणैर्लेखै वादै प्रहसनैस्तथा ॥२१॥—
विद्यालयाना स्वीयाना सम्पूर्ण वायुमण्डलम् ।
देववाणीमय कृत्वा यथा देवो विराजताम् ॥२२॥
"कीदृशी सरला सेय कीदृशी सुगमा तथा ।
लालित्य पुनरेतस्या कीदृश लोकदुर्लभम् ॥"२३॥
एव विश्वास उत्पाद्य समाजे शिक्षितेऽधुना ।
भवच्छात्रैर्भवद्भिश्च प्रयोगेण परस्परम् ॥२४॥
भवतामाग्लभाषाया प्रयोगेऽपि न मे व्यथा ।
काम तत्रापि चमत्कारो भवत सन्तु विश्रुता ॥२५॥
परन्तु सस्कृत हित्वा तत्स्थानेऽप्याग्लभाषया ।
बुधा व्यवहरेयुश्चेद् घोरमन्याय्यमेव तत् ॥२६॥
इद खलु महत् पाप इय निर्लज्जता परा ।
इय मे निर्ममा हत्या "आग्ल्या सस्कृतपाठनम्" ॥२७॥
प्राध्यापक स मे शत्रु आचार्य स महान् रिपु ।
विद्यार्थिनश्च ते सर्वे शिरश्शूलसमा मम ॥२८॥—
येषामन्तिमकक्षाया पठने पाठनेऽपि वा ।
सामर्थ्य सस्कृते चक्तु सामान्यमपि नागतम् ॥२९॥

तस्मान्ममापि भवतामपि मानहन्त्रीं
हेया प्रवृत्तिमपहाय द्रुत भवन्त ।
अध्यापने विनयनेऽथ मनोविनोदे
नून बुधा वदत देवगिर प्रसन्ना ॥३०॥

आरोहणे हिमगिरे शिखरेऽतितुङ्गे
साफल्यमापुरधुना बहवो युवान ।
स्वल्पप्रयत्नसुलभे सरले तदा च
का वा नु सस्कृतगिरो वदने निपत्ति ? ॥३१॥

तृतीयः सन्देशः

(सामान्यव्यवहारेऽपि क्लिष्टसंस्कृतभाषायाः प्रयोगविषयमुद्दिश्य)

अयञ्चापि दुरभ्यासो भवता मम कष्टकृत् ।
हित्वा मे सरलं रूपं कठिनं यत् प्रयुज्जते ॥१॥
इयं मया मनोवृत्तिर्विदुषां बहुधेक्षिता ।
क्लिष्टोक्तिष्वेव मन्यन्ते यत्ते पाण्डित्यमात्मनः ॥२॥
बहवो विबुधा दृष्टा अनुप्रासाय केवलम् ।
शब्दानामप्रसिद्धानां प्रयोगे स्पृहयालवः ॥३॥
बहूना तु मया दृष्टो यङ्लुगन्तेऽधिकादरः ।
करोतीति विहायैते चर्करीतीति गद्यते ॥४॥
उच्यते कथ्यते चेत्यादिकं त्यक्त्वा तु ये बुधाः ।
"बम्भण्यते" इति प्राहुः कः स्वादस्तैर्नु लभ्यते ? ॥५॥
कामं कुरुत काठिन्यं प्रबन्धरचनादिषु ।
सामान्यव्यवहारेषु सारल्यं तु प्रयुज्यताम् ॥६॥
भवद्भिर्भाष्यकाराणां भाषाशैली निरीक्ष्यताम् ।
कीदृक्ते सरला भाषा प्रयुक्ता चित्तहारिणी ॥७॥
किं तु भाष्यं पठन्तोऽपि हन्त प्रायेण पण्डिताः ।
तादृशीं सरलां रम्यां नहि भाषां प्रयुञ्जते ॥८॥
इदं च बहुलोकानां मुखादाकर्णितं मया ।
"संस्कृतं सरलं श्रुत्वा हसन्ति बहवो बुधाः" ॥९॥
अनेनैव हि दोषेण भवद्भिः सरलाऽप्यहम् ।
कठिनेति कलङ्केन समाजे मलिनीकृता ॥१०॥
"संस्कृतं कठिना भाषा संस्कृतं बहुदुर्गमा ।
अपि द्वादशभिर्वर्षैर्वस्तु नायाति संस्कृतम्" ॥११॥
एवं मद्विषये चर्चा स्थाने स्थाने नु जायते ।
तज्जपाऽहं यदाकर्ण्य भवामि नतमस्तका ॥१२॥

स्वजन्मभूमौ स्वगृहे स्वकुटुम्बे स्वसूनुषु ।
अहमेतादृशी जाता हा हन्त भयदायिनी ।।१३।।
"संस्कृतं सरला भाषा सरस्तं सुगमाऽधिका ।
संस्कृतं शक्यते वक्तुं केवलं दशभिर्दिनैः" ।।१४।।
एवं प्रचारः कर्तव्यो भवद्भिरधुना बुधाः ।
दर्शनीयं च बालेभ्यः शिक्षां दत्वा तथाविधाम् ।।१५।।
मद्-रूपं कठिनं कृत्वा पापं यद् विहितं पुरा ।
तस्य शुद्धिरनेनैव प्रचारेण भविष्यति ।।१६।।
तथैव बालशिक्षायै पुस्तकान्यपि कानिचित् ।
सरलानि सुवाच्यानि लेखनीयानि लेखकैः ।।१७।।
यथैवाऽपरभाषासु बालसाहित्यमुत्तमम् ।
सरलं सरसं रम्यं संस्कृतेऽपि तथेष्यते ।।१८।।
विहाय विकटां सन्धीं समासं परिवर्ज्य च ।
*लघुवाक्येषु लिख्यन्तां ललिता बालपुस्तिका ।।१९।।**

यदि ममोन्नयने भवतां स्पृहा
कठिनतामपनीय तदा द्रुतम् ।
प्रचलिता ललिता सरला शुभा
मधुमयी बुध ! वागुपयुज्यताम् ।।२०।।

चतुर्थः सन्देशः

(अनावश्यकत्वेऽपि वैदेशिकशब्दानां विद्वत्समाजे
प्रयोगस्य बहुलतामुद्दिश्य)

इदञ्च मेऽपरं दुःखं स्वभाषाभाषणेऽपि यत् ।
बहून् वैदेशिकान् शब्दान् बुधाः प्रायः प्रयुञ्जते ।।१।।

---

* यथा बालकवितावलिः तथा बालसंस्कृतम् च (सार्वभौमसंस्कृत प्रचार कार्यालय द्वारा प्रकाशितम्)

यूय तु बहुधा वार्तालापेऽनावश्यकानपि ।
पारस्यान् यावनानाङ्ग्लान् शब्दान् वदथ निर्भयम् ॥२॥
"रिजल्ट सेन्टर नम्बर च होस्टल वार्डन रजिस्टरी ।
कॉपी रजिष्टर होल्डर विन टाइम सर्टिफिकेट तथा ॥३॥
मुक़दमा मुद्दई मुद्दाअलेह डिगरी हुकुम तथा ।
कचहरी कायदा कानून हाजिरी गैरहाजिरी" ॥४॥
इत्येव प्रायशो यूय साधुशब्देषु सत्स्वपि ।
शब्दान् वैदेशिकान् ब्रूथ नि सङ्कोच निरन्तरम् ॥५॥
"अस्माभि सस्कृता एव शब्दा वाच्या नहीतरे ।
अभावे सति शब्दाना कर्तव्या नवनिर्मिति" ॥६॥
इत्येव भावना भव्या भवता नैव दृश्यते ।
नैतदर्थं क्वचित् कोऽपि प्रयत्नो वा विधीयते ॥७॥
भवद्भिर्नूतन शब्दो निर्मातु शक्यते न चेत् ।
अन्यनिर्मितशब्दाना प्रयोग क्रियता तदा ॥८॥
पर सस्कृतशब्दाना निर्मितानामपीतरै ।
सङ्ग्रहे वा प्रयोगे वा भवन्त शिथिला भृशम् ॥९॥
राजकीयेषु कार्येषु आङ्ग्लविद्यालयेषु च ।
बहु-सस्कृतशब्दाना प्रयोग क्रियतेऽधुना ॥१०॥
केन्द्रेणाथ प्रदेशैश्चाप्यशेषै सुनियोजितम् ।
निर्मिता बहव शब्दा प्रयुज्यन्ते च सादरम् ॥* ११॥
पर सस्कृतशालासु बहुसम्मानपूर्वकम् ।
पण्डितैराङ्ग्लशब्दाना व्यवहारो विधीयते ॥१२॥
यथा ते "प्रिन्सिपल" नाम्ना सम्बुद्धो यान्ति सम्मुदम् ।
न तथाऽऽचार्यशब्देन किमाश्चर्यमत परम् ॥१३॥
काम स्यादाङ्ग्लभाषाया पाण्डित्य पण्डिते परम् ।
अन्या वा सकला भाषा कामं जानन्तु पण्डिता ॥ १४॥

---

* प्रयत्नोऽस्त्यन्ता केन्द्रद्वारा तथा तत्तत्प्रदेशीयशासनैश्च पुस्तकरूपेण प्रकाशिता विविधनिर्माणमञ्जूषा अनेकाः पारिभाषिकशब्दागरा ।

परन्त्वाङ्गलशब्दानामन्येषां वा विदेशिनाम् ।
अनावश्यकरूपेण प्रयोगो नैव शोभनः ॥१५॥
अथ वैदेशिकाः शब्दा नहि भारतवासिनाम् ।
भावनां संस्कृतिं चापि क्वचिद् व्यञ्जयितुं क्षमाः ॥१६॥
नहि "उस्ताद" शब्दो वा न वा 'टीचर मास्टरौ' ।
गुरुशब्दग—निष्ठाया अर्हतः षोडशीं कलाम् ॥१७॥
धर्मपत्नीति शब्देन व्यक्ता या भव्यभावना ।
"वीमी" "वाइफ" शब्दाभ्यां सा लब्धुं नैव शक्यते ॥१८॥
शिष्येतिश्रुतिमात्रेण विनयो यः प्रतीयते ।
स तु "पीपुल" सञ्ज्ञाया सर्वथैव सुदुर्लभः ॥१९॥
अथ संस्कृतशब्दानां शिष्टानां शब्दकोविदैः ।
उच्चारणेन पुण्यं ये मन्यन्ते नाम पण्डिताः ॥२०॥
कथं धर्मात्मनां तेषां विदुषां वदनाद्वहिः ।
एते वैदेशिकाः शब्दा निस्सरन्तु निरर्गलम् ॥२१॥
अतस्तथाविधान् शब्दान् हित्वा संस्कृतपण्डिताः ।
प्रयोगो निजशब्दानां क्रियतां कार्यतां तथा ॥२२॥
समाह्या नूतना विज्ञैः सर्वे शब्दा यतस्ततः ।
स्वयञ्चापि विनिर्मेया कृत्वा संघटनं मिथः ॥२३॥
ते धन्या आंग्लभाषाज्ञा देश्यभाषाविदस्तथा ।
निर्मान्ति नूतनान् शब्दान् ये तत्प्रयोगं च कुर्वते* ॥२४॥
एतदर्थं तु ते सर्वे कुर्वन्त्वान्दोलनान्यपि ।
येन संस्कृतशब्दानां व्यवहारोऽधिको भवेत् ॥२५॥
भवन्तस्तु पठित्वा मा भूत्वा चाऽध्यापकास्तथा ।
एतस्मिन् विषये सर्वे निश्चिन्ता इव शेरते ॥२६॥

---

* अवलोक्यताम्—
१—डा० रघुवीर—सम्पादित महान् कोषः ।
२—महापण्डित राहुल सांस्कृत्यायन—सम्पादितः कोषः ।
३—विश्वकवि रवीन्द्रनाथ ठाकुर—सङ्कलिताः शब्दाः ।

यदासीद् भवता कार्यं तत् कुर्वन्त्यपरे जना॰ ।
तद् दृष्ट्वाऽपि न युष्माभिर्यत्न कश्चिद् विधीयते ॥२७॥
अधुनाऽपि तु सम्मिल्य तथा यत्नो विधीयताम् ।
भवतामपि जायेत यथा देशे यश स्थिरम् ॥२८॥

कर्तव्यमासीद् भवता प्रधान
यद् धार्मिकाणामिह पण्डितानाम् ।
अधार्मिको ? डाक्टर लोहिया तत्
करोत्यहो पश्यत लोचनाभ्याम् ॥२९॥

अथ च —

एकस्यैवाङ्गलशब्दस्य स्थाने प्रादेशिकैर्बुधै ।
भिन्न भिन्ना प्रयुज्यन्ते शब्दा भिन्नार्थबोधका ॥३०॥ *
एतेन सस्कृतज्ञानामपि मध्ये महान् भ्रम ।
जायते क्वचिदालापे भिन्नप्रान्तनिवासिनाम् ॥३१॥
स्थाने तादृशशब्दाना यद्येकस्यैव कस्यचित् ।
व्यवहारो विधीयेत सौविध्यमधिक भवेत् ॥३२॥
तस्माद्विद्वज्जनैरस्मिन् विषयेऽपि विवेचना ।
कार्या सस्कृतशब्दाना प्रयोगे साम्यसिद्धये ॥३३॥

पञ्चम॰ सन्देशः

(ग्राम्याणाम् , अश्लीलानाम् अशुद्धशब्दाना च
, प्रयोग प्राचुर्यमुद्दिश्य)

स्वभाषामप्यावदश्चेद् भवत साधुशोभनाम् ।
तदापि परितोषो मेऽभविष्यन्मानसो मनाक् ॥१॥
पर या श्रूयते भाषा भवन्त सापि जायते ।
ग्राम्यशब्दाऽधिकाऽश्लीलाऽशुद्धा चापि यत्र क्वचित् ॥२॥

---

* यथा आङ्गलभाषाया सेक्रेटरी (Secretory) शब्दस्य स्थाने हिन्दी-प्रदेशेषु "मन्त्री", वङ्गभाषाया "सम्पादक", महाराष्ट्रभाषाया "चायवाह",तथा दाक्षिणात्यभाषासु "कार्यदर्शी" तथा क्वचित् प्रदेशे "सचिव" इति शब्द प्रयुज्यते । एवमेव बहूनि उदाहरणानि लब्धुं शक्यन्ते ।

अथ नेतानतैनाल, नहूनातु मुखादहम् ।
ग्राम्या गालीरपि भष्टा शृणोमि वहुदु सदा ॥३॥
"श्वसुरा" दिपदं प्रायस्तथा गुप्ताङ्गनाचकै ।
शब्दैरपि बुधा केचिद् व्यवहार प्रकुर्वते ॥४॥
क्वचिद् हास्ये क्वचित् क्रोधे दुरभ्यासवशात् क्वचित् ।
विद्वांसोऽपि प्रभापन्ते अपशब्दानहो नहून् ॥५॥
न च ते केवल वार्तालापे वा पाठनेऽथवा ।
अपि यज्ञेषु पूजाया पाठे चापि प्रयुञ्जते ॥६॥
यत्राऽपशब्दकथनात् प्रायश्चित्तीयते नर ।
तत्र हा निर्भया भूत्वाऽपभापन्ते विपश्चित ॥७॥
यदि पण्डितलोकाना शास्त्रज्ञानामिय दशा ।
किं वाच्य तत्र मूर्खाणा यजमान पुरोधसाम् ॥८॥
पण्डिता अपि भापन्ते यद्यश्लीला अहो गिर ।
"घूरहू" "कतवारू" च तत किमपराध्यत ॥९॥
अथ हिन्द्या प्रयोगेऽपि प्रायेण वहवो बुधा ।
अशुद्धी कुर्वतेऽनेका हास्यतामुपयान्ति च ॥१०॥
वाच्यभेदे लिङ्गभेदे "ने" प्रयोगे विशेपत ।
वच भेदे च भूयासो बहुधा कुर्वते त्रुटिम् ॥११॥
अस्मादेव भयाद्भीता बहुसस्कृतपण्डिता ।
पलायनपरा दृष्टा लेखने भापणे तथा ॥१२॥
यैरनके महाग्रन्था पीता आप इवाऽसिला ।
ते हिन्दीनियमान् काश्चिद् बुधा वोद्धु न किं क्षमा ! ॥१३॥
अतो बुधवरै शुद्धा श्लीला सभ्या च सूनृता ।
देश्यभापाऽपि वक्तव्या विशिष्य जनसन्निधौ ॥१४॥
एकापशब्दकथनादपि धर्मबुद्ध्या
यत्पूर्वजैरभिहित सुमहानधर्म ।
ते पण्डिता अनिशमेकशतापशब्दा–
न्नित्य वदन्ति यदि किन्नु कुलोचित तत् ? ॥१५॥

संस्कृत-प्रचार-विषयकम्

द्वितीयं प्रकरणम्

प्रथमः सन्देशः

(संस्कृतप्रचारात्र प्रयत्नस्य तदर्थं संघटनस्य च महान्तमभावमुद्दिश्य)

इद च मेऽपर कष्ट भृशं व्यथयते मन ।
भवन्तो मत्प्रचारार्थं प्रयत्न यन्न कुर्वते ॥१॥
हिन्दीप्रचारे हिन्दीज्ञा वर्तन्ते तत्परा यथा ।
यथा वा यवना उर्दू सेवायै सन्ति तत्परा ॥२॥
तथा प्रवृत्तिर्भवता मत्प्रचारे न दृश्यते ।
न वा सा व्यग्रतोत्कण्ठा भवत्सु क्वचिदीक्षिता ॥३॥
उत्तरे दक्षिणे वापि मध्यभागेऽथवा पुन ।
पुण्ये महापिदेशे वा सर्वत्रैवेदृशी दशा ॥४॥
कश्मीरेषु मया येषु पुरा निलसितं चिरम् ।
तस्याऽधा यवनै क्रान्तस्ततो दु खतर नु किम् ? ॥५॥
एव सर्वप्रदेशेषु दृष्ट्वा सस्कृतपण्डितान् ।
आत्मान प्रत्युदासीनान् भृशमस्मि सुदु खिता ॥६॥
भवताञ्चेत् प्रयत्नेन मदीया सुस्थितिर्भवेत् ।
भवन्तोऽपि तदा सर्वे सुखिन स्युरसंशयम् ॥७॥
देशे सर्वत्र यदि मेऽनिवार्यं शिक्षण भवेत् ।
जीविकायास्तथा क्षेत्रं यदि वो विस्तृत भवेत् ॥८॥—
वेतनञ्चापि पर्याप्त यदि निर्धारित भवेत् ।
सुख-सम्मान-युक्ता स्युर्भव तोऽपि तदाऽनघ ॥९॥
पर पण्डितवर्गस्य ध्यान नैतत्र गच्छति ।
न चैतदर्थं सम्मिल्य प्रयत्न कुर्वतेऽखिला ॥१०॥

एकैकस्मिन् जनपदे यावन्त सन्ति पण्डिता ।
तथाऽन्यशिक्षासस्थानां सर्वे सस्कृतशिक्षिता ॥११॥
वैद्या ज्योतिविदश्चैव पौराणिक पुरोहिता ।
परस्पर मिलित्वैते सर्वे सस्कृतजीविन ॥१२॥
नगरे नगरे ग्रामे ग्रामे कृत्वा सभादिकम् ।
प्रयत्न मत्प्रचाराय कुर्वीरश्चेत् यथोचितम् ॥१३॥
तदा कथ न मे भूयान् प्रचार सर्वतो भवेत् ।
कथ मत्सेविना वापि न जायेत दशा शुभा ? ॥१४॥
पूजा-पाठाद्यनुष्ठाने दक्षिणाया सभासु च ।
पण्डिता स्वल्पलाभार्थं धावन्ति विकला वहु ॥१५॥
यदि तादृश उत्साहो विधीयेत मदुन्नतौ ।
दशा पण्डितवर्गस्य चिराय सुदृढा भवेत् ॥१६॥
परन्तु सकल कष्ट सहमाना इमे वुधा ।
तदर्थं प्रयतन्ते नो न जाने केन हेतुना ॥१७॥
येन केनापि रूपेण यापयन्त स्वजीवनम् ।
निन्दा-गालिप्रदानाभ्यां सन्तोष हन्त कुर्वते ॥१८॥
"अहो कथञ्चित् पठित दौर्भाग्यात् सस्कृत मया ।
अग्रे न पाठयिष्यामि सुत, कमपि सस्कृतम्" ॥१९॥
एव वदन्तो भूयांस पण्डिता वीक्षिता मया ।
पर ते प्रयतन्ते नो मदुद्धाराय जातुचित् ॥२०॥
अस्मिन् काले तु य कश्चित् प्रचारो दृश्यते मम ।
या च चर्चा चतुर्दिक्षु जायते श्रुतिगोचरा ॥२१॥
तत्रापि भवता कश्चित् पुरुषार्थो न कारणम् ।
हेतुस्तु तत्राधुनिकी देशकालपरिस्थितिः ॥२२॥
स्वातन्त्र्य, राष्ट्रभाषात्व हिन्द्या, हिन्दीनिदा रुचि ।
नेतृणा सस्कृते श्रद्धा कारण तत्र वर्तते ॥२३॥
श्रद्धानन्दो दयानन्दो विवेकानन्द एव च ।
तिलको मालवीयश्च राधाकृष्णन् महाशय ॥२४॥

गान्धी पटेलो राजेन्द्र कुह्लन् राजा च काटजू ।
अरविन्दो रवीन्द्रश्च भवे सावरकरस्तथा ॥२५॥
चटर्जी[1] च मुखर्जी[2] च रघुवीर परीक्षिर ।
श्री वासुदेवशरण श्री सहायस्तथा[3] सुधी ॥२६॥
टण्डनो राहुलो मुंशी[4] भगवद्दास एव च ।
नरेन्द्रदेव सम्पूर्णानन्दो गोलवलकरस्तथा ॥२७॥
एतेषामेव केषाञ्चिन् लेख-व्याख्यान बोधनै ।
लोकाना हृदये जाता श्रद्धा काचन मा प्रति ॥२८॥
भवद्भिस्तु स्वयत्नेन स्वान्दोलनबलेन च ।
उल्लेखनीय किमपि कार्य न खलु साधितम् ॥२९॥
यदाकदाचित् केषाञ्चिद् भवतामपि चेतसि ।
उत्पद्यते समुत्साह पर क्षणिक एव स ॥३०॥
ये च केचन वर्तन्ते पञ्च सप्त मनीषिण ।
संस्कृतस्य प्रचाराय सोत्साह बद्धकङ्कणा ॥३१॥
तेऽपि पण्डितलोकाना सहयोगाद्यभावत ।
किञ्चित् कर्तु क्षम ते नो निरुत्साहा भवन्ति च ॥३२॥
एको गिरिधर शर्मा चतुर्वेदी महाशय ।
चिर प्रयत्न कृतवान् मदुद्धाराय चेतसा ॥३३॥
पर पण्डितलोकाना सहयोगाद्यभावत ।
सोऽपि पूरयितु नैव शक्तवान् स्वमनीषितम् ॥३४॥
पण्डितो यदि कोऽप्येक किञ्चित् कर्तु प्रवर्तते ।
तदाऽपरे निरुन्धन्ति साहाय्य च न कुर्वते ॥३५॥
"यद्यय पण्डित किञ्चिन्नव कार्य करिष्यति ।
अस्यैव नाम कीर्तिश्च प्रतिष्ठा च भविष्यति" ॥३६॥
एवमीर्ष्या प्रतिस्पर्धा द्रोहाद्याविष्टचेतस ।
पण्डिता पण्डितानां तु न कुर्वन्ति सहायताम् ॥३७॥

१—डा० सुनीतिकुमार चटर्जी । २—डा० श्यामा प्रसाद मुखर्जी ।
३—आचार्य शिवपूजन सहाय । ४—श्री कन्हैया लाल माणिक लाल मुंशी ।

"नाऽहं सभापतिर्मन्त्री नाधिकारी च कश्चन ।
न तत्र समयो मह्यं प्रदत्तो भाषितुं तथा ॥३८॥
न वा निमन्त्रणं लब्धं नो वाऽऽहूतो विशेषतः ।
भोजनादि-प्रबन्धश्च सम्यक् तत्र न जायते!" ॥३९॥
भूयांसोऽनेन रोषेण विद्वांसो जातमत्सराः ।
सभा-सम्मेलनादिभ्यो दूरे तिष्ठन्ति सर्वदा ॥४०॥
एभ्य एव तु हेतुभ्यस्तथाऽन्यस्यवशात् क्वचित् ।
पण्डितानां सभा काचित् सर्वदा न चलत्यहो ॥४१॥
एकं "संस्कृतसाहित्यसम्मेलन" मपि स्थितिम् ।
नाद्यावधि गतं भव्यां किन्तु दुःसमतां परम् ॥४२॥
एवं प्रचारकार्येषु शैथिल्येन मनीषिणाम् ।
मम वा भवतां नापि जायते नो दशा शुभा ॥४३॥
परं प्रचारकालेऽस्मिन् आलस्यं भवतामिदम् ।
सत्यं सत्यं बुधा ! ब्रूत शोभते किं मनागपि ।४४।
अस्मिन् संक्रान्तिकाले तु यदि यत्नः कृतो नहि ।
व्यतीतेऽवसरे पश्चात् किं यूयं साधयिष्यथ ॥४५॥
अतोऽहं प्रार्थये युष्मान् भूयो भूयोऽखिलान् बुधान् ।
अद्यैव मत्प्रचाराय कुर्वन्तु ननु निश्चयम् ॥४६॥
बहुव्रतानि कुर्वन्ति भवन्तः प्रतिवत्सरम् ।
इदानीमिदमप्येकं व्रतं स्वीक्रियतां नवम् ॥४७॥
व्याख्यानेनाथ लेखेन सभासम्मेलनादिभिः ।
आयोजनेन गोष्ठीनां सङ्गीताभिनयैस्तथा ॥४८॥
प्रदर्शनीभिर्ग्रन्थानां कविसम्मेलनेन च ।
पुराणवाचनैश्चापि तथा प्रहसनादिभिः ॥४९॥
विद्यालयानां सर्वेषां छात्रैरध्यापकैस्तथा ।
आरम्भो मत्प्रचाराय स्वीये क्षेत्रे विधीयताम् ॥५०॥
सर्वे शिष्यास्तथाऽऽचार्या लब्ध्वा व्याख्यानपाटवम् ।
ग्रामे ग्रामे सभां कृत्वा बोधयन्त्वखिलान् जनान् ॥५१॥

इदानीमपि युष्माभि प्रयत्न क्रियते न चेत् ।
कृष्णा कलकलेखेय ललाटान्नापयास्यति ॥५२॥
निर्धना यदि विद्वास कुटुम्बभरणाकुला ।
न प्रचारे समर्था स्युस्तदा मे कापि न व्यथा ॥५३॥
परन्तु येषा विदुषा समीचीनाऽर्थिकी स्थिति ।
येषा पुत्राश्च पौत्राश्च अर्जन्ति विपुल धनम् ॥५४॥
तादृशैस्तु बुधै सर्वै गृहचिन्ताविवर्जितै ।
स्वकीय समयो देयो मत्प्रचाराभिवृद्धये ॥५५॥
अन्यान्येषु समाजेषु भूयास सन्ति तादृशा ।
ये समाजाय सम्पूर्ण जीवनं स्व समर्पितम् ॥५६॥
पर संस्कृतविद्वत्सु न तथा कोऽपि पण्डितः ।
येन संस्कृतसेवायै जीवन स्यात् समर्पितम् ॥५७॥
पश्यन्तु पण्डिता सर्वे भूदानाऽन्दोलनेऽधुना ।
विनोबा जीर्णकायोऽपि कीदृश कुरुते श्रमम् ? ॥५८॥
अस्य यज्ञस्य सम्पूर्त्यै बहवो देशसेवका ।
जयप्रकाशप्रमुखा जीवनान्यददु सुखम् ॥५९॥
सच ऽयशीतिवर्षीयो राजाजी* भीष्मसन्निभ ।
अविश्रम श्रम हहो कीदृश कुरुते सदा ॥६०॥
तथैव केचिद् विद्वासो दद्युश्चेज्जीवन निजम् ।
संस्कृताय तदा तेषां कीदृशं नु यशो भवेत् ॥६१॥
सम्पूर्णेषु प्रदेशेषु एक एकोऽपि पण्डित ।
भवेज्जीवनदानी चेत् प्रचारो मे महान् भवेत् ॥६२॥
परं पण्डितलोकेषु धनिष्वपि सुधीष्वपि ।
लोभालस्य-वशान्नेदृग् जागर्ति त्यागभावना ॥६३॥
व्याख्यान तु बहोः कालाद्दीयते देवगी स्तुतौ ।
परमुन्नतये तस्या कार्यकर्ता सुदुर्लभ ॥६४॥

* श्री राजगोपालाचारी (स्वतन्त्र दलस्य प्रवर्तक)।

पादौ प्रसार्य विद्वांस स्वगृहे यत शेरते ।
न च कश्चित् प्रचारार्थं कष्ट कर्तुं समीहते ॥६५॥
दक्षिणासमयेऽसंख्या समायान्ति विपश्चित ।
स्वल्पा एव तु दृश्यन्ते पर संस्कृतसंसदि ॥६६॥
अहोहो यत दौर्भाग्य स्वकीय कथयामि किम् ।
यत् स्वस्थोऽपि समर्थोऽपि पण्डितो दयते न माम् ॥६७॥

परन्तु—

एतावति बुधवर्गे जीवत्यपि या दशाऽस्ति मे दीना ।
विज्ञेयाऽखिल-पण्डितमण्डल-भाले कलङ्कलेखेयम् ॥६८॥
तस्मान्मुक्त्वाऽलस्य स्वार्थ स्वल्पीनिधाय च स्वीयम् ।
समय कश्चिद् देयो नून विबुधै प्रचारकार्येऽपि ॥६९॥

तस्यैव जन्म सफल विमला च कीर्ति
वन्द्य स एव च महामनुजो जगत्याम् ।
यो निस्पृहेण मनसा निजदेशभाषा—
साहित्य संस्कृति-सुरक्षणतत्पर स्यात् ॥७०॥

द्वितीयः सन्देशः

(पण्डितपुत्राणा संस्कृतज्ञानशून्यत्वमुद्दिश्य)

इद च बहु मन्यध्व बुधा ! मत्खेदकारणम् ।
यद् भवन्तो निजान् पुत्रान् संस्कृत पाठयन्ति नो ॥१॥
प्राय सर्वेऽपि विद्वांसो महान्तो लघवोऽपि वा ।
आङ्गलविद्यालयेष्वेव पाठयन्ति निजान् सुतान् ॥२॥
तत्रापि संस्कृत हित्वा बहूना विदुषा सुता ।
कृषि-वाणिज्य विज्ञान विषयान् समधीयते ॥३॥
मन्येऽहमुन्नतिं दृष्ट्वा भवन्त प्रतिवेशिनाम् ।
आत्मनोऽपि समृद्ध्यर्थं पाठयन्ति तथा सुतान् ॥४॥
पर पण्डितपुत्राणामेव संस्कृतशून्यता ।
भवन्त एव भाषन्ता शोभते किं मनागपि ॥५॥

आयेन संस्कृतस्यैव पठतो भवतां सुता ।
संस्कृतज्ञानशून्या स्युरिति लज्जावह न किम् ॥६॥
काम पठन्तु ते सर्वा अपि भाषा न मेऽप्रियम् ।
पर ममापि तु त्याग न कुर्वन्तु कथञ्चन ॥७॥
आङ्गलभाषामधीयानैरपि किन्न भवत्सुतै ।
संस्कृत शक्यतेऽध्येतु भवताञ्चेदभीप्सितम् ? ॥८॥
परन्त्वनेके विदुषा पुत्रास्तेषामुपेक्षया ।
एकमप्यक्षर ह त ! संस्कृतस्य न जानते ॥९॥
एव पण्डितपुत्राणा संस्कृतस्य विवर्जनात् ।
विदुषा बहुभिर्गेहैरहो निष्कासिताऽस्म्यहम् ॥१०॥
मद्द्वारा लब्धवित्तेन प्रासादो यो विनिर्मित ।
रमते तत्र काऽप्यन्या इति मे दु खद न किम् ॥११॥
अहो पण्डितलोकाना कीदृशीय कृतघ्नता ।
मत्प्रसादेन जीवन्त स्वय मा हन्तुमुद्यता ॥१२॥
पाठयन्त्यपरान् बालान् यत्नादाहूय संस्कृतम् ।
स्वपुत्रानाङ्गलभाषा च कीदृशीय विडम्बना ॥१३॥
श्रूयता विबुधा सर्वे नीतिरेषा विसृज्यताम् ।
विधीयन्ता निजाः पुत्रा सर्वे संस्कृतशिक्षिता ॥१४॥
द्वौ वा त्रयोऽथवा पुत्रा भवेयुर्भवता यदि ।
तेष्वेकोऽवश्यमध्याप्य संस्कृत तु सुनिश्चितम् ॥१५॥
अथाऽपरे पठेयुर्व आङ्गलभाषा भवत्सुता ।
तेऽपि पाठ्या यथाशक्ति संस्कृत स्वगृहेऽखिला ॥१६॥
येन केनापि यत्नेन भवद्भि स्वीयसूनव ।
कार्या संस्कृतभाषाया भाषका लेखका अपि ॥१७॥
बालका द्वित्रिवर्षीया भवेयुर्भवता यदा ।
संस्कृते वदितु किञ्चित् शिक्षणीयास्तदैव ते ॥१८॥
वर्षोपवीतपर्यन्त पण्डितैर्निजबालका ।
कार्या सामान्यवार्तासु संस्कृते वदितु क्षमा ॥१९॥

ततश्च पाठशालाया स्वगृहे वा निजा' सुता ।
केवल सस्कृत शिक्षया सम चाऽऽङ्गलभाषया ॥२०॥
लभन्ता भवता पुना सर्वभाषासु पाटवम् ।
पदानि च महोच्चानि तन्मे प्रीतिकर परम् ॥२१॥
पर सर्वास्ववस्थासु सस्कृतज्ञा भवन्तु ते ।
सस्कृते स्नेहवन्तश्च इति मे केवल स्पृहा ॥२२॥

अथ च—

भवता यदि पुत्रा स्युः सस्कृतज्ञानसयुता ।
आचारोऽपि ततस्तेषा नून जायेत सस्कृत ॥२३॥
सस्कृताज्ञानतस्तेषा कीदृशी नु दशाऽधुना ।
बहव' "साहबा" जाता विदुषामद्य सूनव ॥२४॥
वेष-भाषा-सदाचारै र्व्यवहारेण चाऽधुना ।
अनेके विदुषा पुत्रा भान्ति वैदेशिका इव ॥२५॥
एतत् सर्वं समालोच्य वार वार निवेदये ।
भवत्सुताना नो युक्ता सस्कृतज्ञानहीनता ॥२६॥
निस्सार्य मामथ च केवलमाङ्गलभाषा—
मध्याप्य धर्मनिर्मुखाश्च सुतान् विधाय ।
हा हन्त यूयमपि भौतिक भूति-लुब्धा
मा पण्डिता भवत नास्तिकभावभाज ॥२७॥

तृतीयः सन्देशः

(स्वकन्याना स्वभार्याणाञ्च सस्कृतशिक्षणस्याभावमुद्दिश्य)

अयमप्यपरो दोषो वर्तते भवता महान् ।
यत् स्वकन्या' स्वभार्याश्च सस्कृत शिक्षयन्ति नो ॥१॥
कन्यानामपि शास्त्रेषु पुत्रवत् शिक्षण स्मृतम् ।
वैदुष्यार्थं तथा तासाम् उपाया अपि दर्शिता [१] ॥२॥

१—अथ य इच्छेद् दुहिता मे पण्डिता जायेत सर्वमायुरियादित्यादि ।
(बृहदारण्यकोपनिषद् ६-४-१६)

सुशिक्षिता एव कन्या भवन्त्यादर्शमातरः ।
संस्कृतज्ञा यदि स्युस्ताः सुवर्णे सौरभं भवेत् ॥३॥
विषयेऽस्मिन् भवद्भिस्तु प्रायो ध्यानं न दीयते ।
शिक्षयन्ति निजाः कन्या न भाषां न च संस्कृतम् ॥४॥
स्वभाषाज्ञानसत्त्वेऽपि संस्कृतं शिक्ष्यते न चेत् ।
तस्याः पण्डितपुत्रीत्वं कथं ज्ञातं भविष्यति ॥५॥
यदि पण्डितकन्याः स्युः सर्वाः संस्कृतशिक्षिताः ।
अल्पीयसा मे कालेन प्रचारो विपुलो भवेत् ॥६॥
भवन्तो यदि वाञ्छेयुः प्रयतेरंश्च तत्त्वतः ।
मैत्रेयी भारती गार्गी भूयोऽपि स्युर्गृहे गृहे ॥७॥
धन्या सा काऽपि कन्याऽसीद् राजन्यकुल-भूषणम् ।
वेदविध्वंसनं दृष्ट्वा भृशं या दुःखिताऽभवत् ॥८॥
परन्तु विदुषां गेहे कियत्यः सन्ति कन्यकाः ।
या नामान्यपि जानन्ति वेदशास्त्रादिकस्य हा ॥९॥
अतो भवद्भिः कन्याभ्यो भाषायाः संस्कृतस्य च ।
शिक्षा देया प्रयत्नेन प्रचारो येन मे भवेत् ॥१०॥
तथैव यदि युष्माकम् अङ्गना स्युर्न शिक्षिताः ।
शिक्षणीयाः स्वगेहेऽपि नवीनैस्तु विशेषतः ॥११॥
प्राचीने भारतेऽभूवन् भूयस्यो ललनाजनाः ।
विदुष्य इति प्राचीनग्रन्थैर्विज्ञायते स्फुटम् ॥१२॥

तथा हि—

"अपाला रोमशा घोषा लोपामुद्राऽथ शाश्वती ।
विश्ववारा यमी मेधा-दक्षिणा सरमादयः" ॥१३॥
एता मन्त्रद्रष्टत्रोऽभूवन् नार्योऽपि भारते[२] ।
स्वदेशजन्मनिर्यासां धन्यं मन्यामहे वयम् ॥१४॥

२—शौनकाचार्यकृतायां आर्षानुक्रमण्यां दशममण्डलस्य ... भागो
द्रष्टव्यः ।

मैत्रेयी-सुलभाऽत्रेयी गार्गी-प्रभृतियोषिताम् ।
ज्ञान दर्शनशास्त्रीय सभास्वद्यापि गीयते[3] ॥१५॥
"गौतम्युत्पलवर्णा च क्षेमा तारा तथोत्तरा ।
सघा पूर्णा पटाचारा सुन्दरी पूर्णिमोत्तमा" ॥१६॥
इत्येता बौद्धकालेऽपि महिला लब्धकीर्तय ।
अनेका अभवन् यासा "थेरी गाथा"[4] निदर्शनम् ॥१७॥
गङ्गा तिरुमलाम्बा च लक्ष्मीदेवी शशिप्रभा ।
विज्जका मोरिका विद्या शीला-भट्टारिकादय ॥१८॥
कवयित्र्योऽपि भूयस्योऽभूवन् भारतभूतले ।
यासा काव्यकलाकाशे राजते कीर्तिकौमुदी ॥१९॥
न केवल ब्राह्मणानाम् अन्यवर्णोद्भवा अपि ।
रमणीमणयोऽनेका आसन् विद्याविशारदा[5] ॥२०॥
पर सम्प्रति युष्माक पण्डितानामपि गृहे ।
गृहिण्यो नैव जानन्ति स्वल्प संस्कृतमप्यहो ॥२१॥
भवन्तो बहुशास्त्रज्ञा भवत्पत्न्यो निरक्षरा ।
दम्पत्योरीदृश हन्त वैषम्य किमु शोभते ॥२२॥
"भार्या ह्यर्ध शरीरस्य" भार्या मूल तरिष्यत ।
भार्या मूल त्रिवर्गस्य इति धर्मानुशासनम् ॥२३॥
पर यदि भविष्यन्ति भार्या एवमशिक्षिता ।
कथ त्रिवर्गसिद्धि स्यात् परितोषोऽथवाऽऽत्मन ॥२४॥

३—अवलोक्यता बृहदारण्यकोपनिषद चतुर्थाध्यायस्य पञ्चमे ब्राह्मणे याज्ञवल्क्य मैत्रेयी सवाद तथा शङ्करदिग्विजयस्य नवम सर्गश्च ।

४—पालिभाषानिबद्ध बौद्धपुस्तक यस्मिन् तदानीन्तनाना बौद्धशिक्षित-महिलाना कथा वर्तन्ते ।

५—"सस्कारो ह्यात्मनि समवैति न स्त्रैण पौरुष वा विभागमपेक्षते । श्रूयन्ते दृश्यन्ते च राजपुत्र्यो महामात्रदुहितरो गणिका कौतुकिभार्याश्च शास्त्रप्रहतबुद्धय कवयश्चेति" ।

—काव्यमीमासा, दशमोऽध्याय

पतिरेको गुरु स्त्रीणामिति शास्त्रेषु घोषितम् ।
निर्वाहयति किं कश्चित् परमेतद्वचो बुध ॥२५॥
न जीवने भवद्भिश्चेद् एक श्लोकोऽपि शिक्षित ।
भार्याभ्यो निष्फला नो कि भवच्छास्त्रज्ञताऽखिला ॥२६॥
वदन्तु संस्कृते किञ्चित् प्रियाभि सह पण्डिता ।
इति मे मानसे वाञ्छा समुदेति निरन्तरम् ॥२७॥
परमेतादृशोऽल्पोऽपि व्यवहारो मनोहर ।
महामहोपाध्यायानामपि गेहे न दृश्यते ॥२८॥
आसन् मण्डनमिश्रस्य गेहे दास्योऽपि शिक्षिता ।
कीराङ्गनाऽपि वक्ति स्म श्रुत्वा संस्कृतभारतीम्[१] ॥२९॥
परन्तु साम्प्रतं केन विदुषा केन शास्त्रिणा ।
शिक्षिता निजगेहस्य दासी वापि शुकोऽपि वा ॥३०॥
आसीन्मण्डनमिश्रस्य भारती नाम वल्लभा ।
शङ्कराचार्यवर्योऽपि यया वादे पराजित * ॥३ ॥
अद्यापि सन्ति भूयांसो भारते मिश्रपण्डिता ।
न भारतीसमा भार्या परं कस्यापि लभ्यते ॥३२॥
इयं नारीसमाजस्योपेक्षा संस्कृतशिक्षणे ।
संस्कृते संस्कृतस्यापि प्रचारेऽतीव बाधिका ॥३३॥
यदि स्युर्निखिला नार्य संस्कृतज्ञानसंयुता ।
शैशवादेव तासां स्युर्बाला संस्कृतवेदिन ॥३४॥
मातर पितरो बाला बालिकाश्चापि संस्कृतम् ।
परस्पर वदेयुश्चेत् प्रचारो मे महान् भवेत् ॥३५॥

१—अवलोकयता शङ्करदिग्विजयस्य अष्टम सर्गं ।

२—अवलोकयता शङ्करदिग्विजयस्य नवमे सर्गे श्रीमच्छङ्करानन्दया भारत्या
सम्मुखा मीमांसा च शास्त्रार्थचर्चा । यथा—
अथ सा कथा प्रववृते स्म तयो सभायां परस्परजयोन्मुखयो ।
मतिचातुरीरचितवाग्मिता भृशविस्मयीकृतविचक्षणयो ॥

"भोजन देहि मे मात', पित शिक्षय मामिदम्"[२] ।
एव बाला यदि ब्रूयुस्तदा स्या मुदिता भृशम् ॥३६॥
अतः स्वकन्याभार्याणामपि सस्कृतशिक्षणे ।
ध्यान देय विशेषेण भवद्भिर्मद्वितैषिभि ॥३७॥
अधिकाऽसम्भवे न्यूना न्यून श्लोका शत बुधै ।
शिक्ष्या नीतिसदाचार पूजा-पाठ-निबन्धना ॥३ ॥
एवमेव गृहे नित्य गृहिणीभि सम बुधै ।
वार्तालापेषु वक्तव्य नून किमपि सस्कृतम् ॥३९॥
काम वृद्धा बुधा एव नो कुर्युश्चेन्न मे क्षति ।
पर यूनामय दोषो नून मा बाधतेतमाम् ॥४०॥

अत —

"प्रिये प्रियतमे कान्ते दयिते प्राणवल्लभे ।
कल्याणिनि शुभे भद्रे आर्ये श्रीमति सुन्दरि' ॥४१॥
सम्बोधनपदैरेभिर्युवानो यदि पण्डिता ।
युवतीभि सम प्रीत्या पत्नीभि प्रतिवासरम् ॥४२॥—
"पानीय पातुमिच्छामि, किञ्चिन्मे देहि भोजनम् ।
शीघ्रमागम्यतामत्र, विलम्ब क्रियते कथम् ॥४३॥
अलमेतावता मुग्धे, शोभन किमत परम् ।
कथमद्य नु पश्यामि म्लान तव मुखाम्बुजम् ॥४४॥
शय्या सुसज्जीक्रियताम्, उपधान क्व वर्तते ।
विश्राम कर्तुमिच्छामि, स्वास्थ्यमद्य न शोभनम् ॥४५॥
शृणोषि न वचो किं मे, किं कार्य क्रियतेऽधुना ।
पश्य को नु समायात , कपाट पिहितो न वा ॥४६॥
कुञ्चिका वर्तते कुत्र, निस्सृत किं त्वया शुभे ।
उद्घाट्य पेटिका देहि शेखर वा मनोरमाम् ॥४७॥

२—एतादृशवाक्याना मद्ग्रन्थ कार्यालयप्रकाशिते "बालसस्कृतम्" इतिनामके पुस्तकेऽवलोकनीय शिक्षणीयश्च बालेभ्य ।

कानि वस्तूनि वर्तन्ते, आनेतव्यानि कानि च ।
शाकं वद किमानेयं आलूकं वा पटोलकम् ॥४८॥
लवणं देहि मे किञ्चित् द्विदले प्रतिभाति नो ।
लेह्ये मरिचमत्युग्रं न देयं, रोचते न मे ॥४९॥
सत्यं सत्यं वदाम्येतत् परिहासो न मन्यताम् ।
प्रिये मा कुरु सङ्कोचं, स्पष्टं वद मनोगतम् ॥५०॥
वाक्यानीत्येनमादीनि लघूनि सरलानि च ।
वक्तव्यानि विसङ्कोचं प्रियाभिः सह पण्डितैः ॥५१॥
उच्चकक्षास्थितैश्छात्रैरपि नाम विवाहितैः ।
पत्नीभिः सह संलापः कार्य एव मनोरमः ॥५२॥

यदि निजकुलगौरवेऽनुरागो
यदि च ममाऽभ्युदयोदये स्पृहा वः ।
फलयत ननु संस्कृते प्रवीणा
निजवनिता निजकन्यकाश्च सर्वाः ॥५३॥

चतुर्थः सन्देशः

(विदेशेषु संस्कृतप्रचारस्य कृते चिन्ताया उत्साहस्य चाभावमुद्दिश्य)

इदमप्यपरं कष्टं ज्ञेयं यद् बुधमण्डले ।
विदेशे मत्प्रचारस्य कापि चिन्ता न विद्यते ॥१॥
आसीत् पूर्वं विदेशेऽपि प्रचारः सुमहान् मम ।
इतिहासविदामेतत् तथ्यं नास्ति तिरोहितम् ॥२॥
कोरिया चीन-जापान-बर्मा-लङ्कादिभूमिषु ।
यवद्वीप मलय कम्बोज श्यामदेशेषु तिब्बते ॥३॥
सुमात्रा-बोर्नियो बाली-जावा हिन्दचीनके ।
तुर्किस्तानेऽथ खोतान तुरफान तथैव च ॥४॥
एषु देशेषु मत्प्राप्तौ शिलालेखादिवस्तुनि ।
तासमे तद्रूपे राष्ट्रे पार्मीतं तत्पुरतः ॥५॥

तथा धार्मिकचिह्नैश्च स्पष्टमेव प्रतीयते[1] ।
विदेशेष्वपि मे भूयान् प्रचारः समभूदिति ॥६॥
परं सम्प्रति देशेषु तेषु मे कीदृशी स्थितिः ।
इति चेत्तु महो कोऽपि पण्डितः किमु चेष्टते ॥७॥
अस्माभिस्तत्र गन्तव्यं प्रचार्या सुरगीस्तथा ।
कष्टं सोढ्वाऽपि, चिन्तैषा स्वप्नेऽपि किमु जायते ॥८॥
बालिप्रभृतिदेशेषु पूजापाठादिकर्मणि ।
अद्यापि देववाणीयं किञ्चिद् भ्रष्टा प्रयुज्यते ॥९॥
बौद्धाः पदण्डनामानः पुरोहितपदे स्थिताः ।
अनेकान् संस्कृतश्लोकान् उपयुञ्जन्ति नित्यशः[2] *॥१०॥*
सिंहल-श्याम-प्रभृतिदेशेष्वद्यापि सर्वतः ।
भूयान् संस्कृतशब्दानां प्रयोगः उपलभ्यते[3] *॥११॥*
अथ संस्कृतशब्दानां भाष्यकारः पतञ्जलिः ।
प्रयोगविषयं प्राह भूतलेऽत्यन्तविस्तृतम्[4] *॥*
संस्कृतं सुप्रचार्येत भूयो देशेषु तेषु चेत् ।
भवेयुर्बहवो लाभा नूनं भारतवासिनाम् ॥१२॥

---

१ अवलोक्यताम् Hindu culture in greater India (स्वामी सदानन्द प्रणीतम्), India and the Pacific world (डा० कालिदासनाग प्रणीतम्), प्राचीन भारतीय अभिलेखों का अध्ययन (डा० वासुदेव उपाध्याय प्रणीतम्), तथा बृहत्तर भारत का इतिहास (श्री भगवद्दत्तप्रणीतम्)

२—यथा—बालिद्वीपग्रन्था इतिनामके (बड़ोदास्थ गायकवाड ग्रन्थमाला-प्रकाशिते) ग्रन्थे प्रदर्शितम् ।

३—अवलोक्यताम्–Sanskrit in Indonesia (by Dr gonda), भारतीय आर्यभाषा और हिन्दी (डा० श्री सुनीतिकुमार चटर्जी प्रणीतम्), तथा श्यामदेशीय संस्कृत शब्द सूची (उत्तर प्रदेशीय शासन द्वारा प्रकाशिता) ।

४—व्याकरणमहाभाष्यम् १।१।पस्पशाह्निकम् ।

अत सस्कृतविद्वद्भिर्लब्ध्वा व्याख्यानपाटवम् ।
आङ्ग्लभाषा तथाऽभ्यस्य त्यक्त्वाऽधर्ममिव तथा ॥१३॥—
तेषु तेषु विदेशेषु यात्रा यदि विधीयते ।
आत्मान खलु मन्येय धन्या सौभाग्यशालिनीम् ॥१४॥
स तु मे साधुवादार्हो मधुसूदनझा बुध ।
पण्डितेनापि येनादौ विदेशे गमन कृतम् ॥१५॥[1]

अथ च—

इदानीमन्यदेशेषु नानारूपे प्रयोजने ।
हिन्दवो बहुसख्याका निवसन्ति कुटुम्बिन ॥१६॥
भारतेनाऽधुना लब्धे स्वातन्त्र्ये गौरवास्पदे ।
तेऽपि सस्कृतिमीहन्ते सरक्षितुं पुनरात्मन ॥१७॥
तेषु तेषा कुटुम्बे च धर्मरक्षण हेतवे ।
अस्ति सस्कृतशिक्षाया प्रचारो बहुलाभकृत् ॥१८॥
पर तेषु बहो कालाद् विदशस्थेषु बन्धुषु ।
सस्कृतस्य प्रचाराय वीतनिद्रा नु के बुधा ॥१९॥
पाकिस्तानेऽधुना जाता मम कीदृक् परिस्थिति ।
इति चेत्तु कति व्यग्रा सन्ति पण्डितमण्डले ॥२०॥
स तु मे धन्यवादार्ह के० एम्० मुन्शीमहोदय ।
प्रवर्तन कृत येन विश्वसस्कृतससद ॥२१॥
मन्येऽनया परिषदाऽवश्यमेव करिष्यते ।
योजना मत्प्रचाराय विदेशेष्वपि काचन ॥२२॥
किन्तु तेन न युष्माक कर्तव्यमवसीयते ।
पण्डितैरपि कर्तव्या चिन्ता तत्कार्यपूर्तये ॥२३॥
गच्छेयुर्यदि विद्वासो विदेशस्थेषु बन्धुषु ।
धर्मलाभोऽपि आयेन प्रचारेण समं महान् ॥२४॥

१—श्रीमतां झामहोदयानां विदेशयात्रायाः [illegible] 'सरस्वतीसागर [illegible]' महोदयेभ्य [illegible] अभिन [illegible] पटोमिमम् ।

तस्माद् वीरै बुधै केश्चित्तरुणैश्च विशेषत ।
नून विदेशयात्राया सकल्प क्रियता दृढ ॥२५॥
अथ चापि विदेशेषु भूयास सति तादृशा ।
वैदेशिका जना ये तु ख्याता सस्कृतपण्डिता ॥२६॥
संस्था अपि च भूयस्य शिक्षाया सति सर्वत ।
यासु सस्कृतभाषाया विभागो वर्तते पृथक् ॥२७॥[1]
एते सर्वेऽपि सौहार्द दर्शयेयु सुनिश्चितम् ।
साहाय्य चाऽपि कुर्वीरन् यदि यात्रा विधीयते ॥२८॥
गम्यता दूरदेशेषु लभ्यता विपुल यश ।
प्रचार्यता पुनर्विश्वे भारतस्योज्ज्वल यश ॥२९॥
इदानीं दूरयात्राया सौविध्ये सुलभेऽखिले ।
विलम्बो नैव कर्तव्यो वीरैरुत्साहशालिभि ॥३०॥

एकोऽपि पण्डितवरो यदि दूरदेशे
गत्वा करिष्यति मदुन्नतये प्रयत्नम् ।
आकल्पमस्य विदुषो बुधवृन्दमौले—
राभारभारवहन शिरसा करिष्ये ॥३१॥

१—एतेषा परिज्ञानार्थ डा० वी० राघवन् महोदयै लिखित "Sanskrit and Allied Indological Studies in Europe" इति पुस्तकमवलोकनीयम् ।

वैदेशिकाना सस्कृत विदुषा चित्राण्यपि द्रष्टु समीहा चेत् "ओरिएन्टल बुक एजेन्सी, पूना" द्वारा प्रकाशित "Picturesque Orientalia" नामक पुस्तकमवलोकनीयम् ।

अध्ययनाऽध्यापन-विषयकम्
तृतीयं प्रकरणम्
प्रथमः सन्देशः
(अध्ययनाऽध्यापनपद्धतिगतान् दोषानुद्दिश्य)

पद्धतिः पाठनस्यापि नितान्तं दूषिताऽधुना ।
वर्तते पाठशालासु प्रथमाया विशेषतः ॥१॥
पाठशालाप्रविष्टेभ्यश्छात्रेभ्यो लघुकौमुदी ।
सर्वादौ पाठ्यते यत्तु तदनर्थकरं महत् ॥२॥
पूर्वं भाषा शिक्षणीया तस्या व्याकरणं ततः ।
एष शिक्षाविधिः प्रोक्तः शिक्षाशास्त्रविशारदैः ॥३॥
परन्तु पाठशालासु प्रायः सर्वासु पण्डितैः ।
एतद्विधिविरुद्धैव रीतिः सञ्चाल्यतेऽधुना ॥४॥
भाषाज्ञानं विनाऽऽरभ्य प्रथमं लघुकौमुदीम् ।
सुकुमारेषु छात्रेषु वज्रपातो विधीयते ॥५॥
वज्रपातेन चानेन आदावेव हतप्रभाः ।
कुण्ठिताश्च भवन्त्येते न रोहन्ति पुनर्द्रुतम् ॥६॥
अनयैव भिया भीता बहवो हन्त बालकाः ।
पठितुं पाठशालासु नेच्छन्ति प्रेरिता अपि ॥७॥
अनेके च पठन्तोऽपि तत्काठिन्येन पीडिताः ।
इदानीं पठनं त्यक्त्वा अन्यत् कार्यं प्रकुर्वते ॥८॥
प्रौढा अपि जना नैके संस्कृताध्ययनेप्सवः ।
अस्मादेव भयात् प्रायः प्रवर्तन्ते न शिक्षणे ॥९॥
अत एवाऽधुना नैके विद्वांसः संस्कृतप्रियाः ।
संस्कृतभाषायाः प्रायः निराशं खलु कुर्वते[1] ॥१०॥

---

१ अस्मिन्विषये Indian Inheritance नामके पुस्तके प्रदत्तः
के० एम० मुन्शी महोदयस्य लेखः ।

अतो रीतिमिमा त्यक्त्वा शिष्याणा हानिकारिणीम् ।
शिक्षा नवीनया शैल्या देया शिष्यहितैषिभि ॥११॥
पाठशालाप्रविष्टेभ्यश्छात्रेभ्यो निखिलैर्बुधैः ।
सर्वादौ कतिचिन्मासान् भाषाज्ञान प्रदीयताम् ॥१२॥
शब्दधात्वव्ययादीनि कालकारकपूर्वकम् ।
अध्याप्य प्रथम कार्यम् अनुवादस्य शिक्षणम् ॥१३॥
अनेन विधिना जाते प्रवेशे खलु वाङ्मये ।
पश्चाद् व्याकरणादीना शिक्षणं शोभन भवेत् ॥१४॥
रीतेरस्या अभावेनाऽनुवादस्याऽप्यशिक्षणात् ।
अप्रयोगाच्च बालाना भाषाज्ञान न वर्द्धते ॥१५॥
अनुवादप्रबन्धादे शिक्षणे तस्य लेखने ।
सशोधने च विद्वद्भि सम्यक् ध्यानं न दीयते ॥१६॥
ग्रन्थाना पाठने यादृग् भवता दृश्यते रुचि ।
अनुवाद प्रबन्धादि-शिक्षणे न तथा क्वचित् ॥१७॥
प्रेरिता प्रार्थिताश्चापि तदर्थं बहुपण्डिता ।
अज्ञानादथवाऽऽलस्यादुपेक्षन्ते सदैव तत् ॥१८॥
अनेनैव हि दोषेण भवता शिष्यसन्ततौ ।
न व्युत्पत्तिर्न भाषायामधिकार प्रजायते ॥१९॥
उषित्वा बहु वर्षाणि रटित्वा च दिवानिशम् ।
व्ययित्वा विपुल द्रव्य छात्रास्तिष्ठन्ति मूकवत् ॥२०॥
अत पाठनवत् पूर्णा दृष्टिरत्रापि दीयताम् ।
आत्मन्येव त्रुटिश्चेत् स्यात् सापि दूरे विधीयताम् ॥२१॥

अथ च—

ग्रन्थानामपि सर्वेषा कर्तव्य पाठन तथा ।
यथा यथार्थतस्तत्स्यात् छात्राणा लाभकारकम् ॥२२॥
अधुना तु यया शैल्या क्रियते ग्रन्थपाठनम् ।
न तया छात्रवर्गस्य कश्चिल्लाभो विलोक्यते ॥२३॥

समाप्य कौमुदी सर्वामुत्तीर्यं च परीक्षणम् ।
लेखने भाषणे शब्दशुद्धीस्ते प्रकुर्वते ॥२४॥
पीत्वाऽपि सकल छात्रा रसवत्तर्कसंग्रहम् ।
न तर्ककरणे शक्ता विलोक्यन्ते कदाचन ॥२५॥
पञ्चतन्त्र पठित्वापि सम्पूर्णं नीतिपुस्तकम् ।
न नीतिनिपुणाश्छात्रा व्यवहारविदोऽथवा ॥२६॥
पञ्चतन्त्रफलञ्चैक, "पाटव संस्कृतोक्तिषु" ।
विष्णुशर्मा स्वय प्राह पर तद् दृश्यते नु किम् ॥२७॥
पठन्ति सकलाश्छात्रा छन्दसा लक्षणान्यहो ।
पर सम्यक्तया श्लोकान् पठितु पारयन्ति नो ॥२८॥
येषां श्रुत्वा पद्यपाठ प्रसीदति मनो भृशम् ।
शिष्या वा गुरवो वापि तादृशा बहुदुर्लभा ॥२९॥
आचार संस्कृतिर्धर्मो देशकालदशादिकम् ।
काव्याध्ययनतो ज्ञेया सर्वा तात्कालिकी स्थिति ॥३०॥
पर संस्कृतशालासु छात्राणां विदुषां तथा ।
स्वप्नेऽपि विषयेष्वेषु कष्ट दृष्टिर्न गच्छति ॥३१॥
काव्यव्याख्या च घोषित्वा कण्ठस्थीक्रियते यदि ।
काव्यामृतरसास्वाद कथं नु सुलभो भवेत् ॥३२॥
पठन्ति कतिचिच्छात्रा वेदा तमपि साम्प्रतम् ।
गीतोपनिषदश्चापि केचित् सन्यासिनो जना ॥३३॥
परन्तु जीवने तेषां छात्राणामीषदप्यहो ।
विचारव्यवहाराभ्यां वेदान्तित्व न भासते ॥३४॥
पठन्ति बहवश्छात्रा नाटकानि बहूनि च ।
पर तेषु न पश्यामस्तादृशीं वाग्विदग्धताम् ॥३५॥
एव ग्रन्थस्य कस्यापि पठनेन यथार्थत ।
नानन्दो लभ्यते छात्रैर्नापि ज्ञानं प्रजायते ॥३६॥
आशा पाठशालासु योगक्षेमैर मुग्धता ।
वर्तते नैव शिष्याणां बुद्धिरुद्दिग्ने भावने ॥३७॥

अर्थज्ञान विना छात्रा रटित्वा तर्कसमहम् ।
परीक्षा ददते दैवात् समुत्तीर्णा भवन्ति च ॥३८॥
प्रारम्भे लघुकौमुद्या बहवो मूकनालका ।
घोरे "घोषपण्डिका" गर्ते पीड्यन्ते पण्डितैर्जनै· ॥३६॥
श्रमेण महता छात्रा प्रयोगान् साधयन्त्यहो ।
पर तेषां प्रयोगाणामर्थ जानन्ति नैव ते ॥४०॥
एव वैदिकशिक्षायामपि वेदार्थवर्जनात् ।
स्थाणवो भारवाहा हा जाता वैदिकमानवाः ॥४१॥*
एव सस्कृतशिक्षाया मन्दिरे सुचिरादहो ।
घोषणाख्या पिशाचीय प्राधान्येन विराजते ॥४२॥
एषा च बहुबालानां रक्तास्वादनलोलुपा ।
पाठशाला परित्यक्तु शीघ्र नाद्यापि वाञ्छति ॥४३॥
अहो सस्कृतशिक्षाया दौर्भाग्य खलु कीदृशम् ।
अर्थज्ञानात्मिका दृष्टि· विनष्टा यदिय चिरात् ॥४४॥
निमील्य नयने स्वीये देहान्दोलनपूर्वकम् ।
केवल रटने याति छात्राणां समयोऽधिक ॥४५॥
न केवल छात्रजना पण्डिता अप्यनेकश ।
अर्थज्ञानमुपेक्षन्ते शब्दपाठपरायणा ॥४६॥
अर्थज्ञान विना वेदमन्त्राणा सकला॰ क्रिया ।
कुर्वन्त कारयन्तश्च दृश्यन्ते वैदिका बुधा ॥४७॥
अर्थज्ञान विना सन्ध्या प्राय सर्वैर्विधीयते ।
अर्थज्ञान विना प्राय पठ्यते स्वस्तिवाचनम् ॥४८॥
अर्थज्ञान विना पूजा अर्थज्ञान विना कथा ।
अर्थज्ञान विना पाठ· प्रायशो दृश्यतेऽभित ॥४९॥
यादृक् सस्कृतशिक्षायामथापेक्षा निरीक्ष्यते ।
रटनस्य च मुख्यत्व तत् त्रैलोक्येऽपि दुर्लभम् ॥५०॥

---

* यथाऽह निरुक्ते आचार्य·—
स्थाणुरयं भारहार किलाऽभूदधीत्य वेद न विजानाति योऽर्थम् ।

अनेनैव च प्रापेन शापेनापि तथा गिर ।
निष्फल संस्कृतज्ञानां जायतेऽध्ययनं खलु ॥५१॥
अत एवाखिलाश्छात्रा जायन्ते भवता बुधा ।
हेतवो मम नि दाम्रामयोग्यत्वे तथात्मन ॥५२॥
वस्तुतो यत्स्वरूपेण शिक्षा सम्प्रति दीयते ।
न तया साम्प्रतं कश्चिल्लाभ पुंसा विलोक्यते ॥५३॥
चौर्येण छलजालाभ्यां गुरूणा धावनेन च ।
समुत्तीर्णो परीक्षां चेत्तया लाभ कियान् भवेत् ॥५४॥
नेयमाध्यात्मिकी शिक्षा आर्थिकी धार्मिकी न वा ।
न चाऽनन्दकरी पुंसे केवल कालयापिनी ॥५५॥
अतो रीतिमिमा हित्वा सर्वेषा हानिकारिणीम् ।
शिक्षायां सकलाङ्गेषु महाक्रान्तिर्विधीयताम् ॥५६॥

परीक्षणे वा पठनेऽथ पाठने,
प्रवर्तमाना परिवर्त्य पद्धतिम् ।
तथा प्रयत्नो विबुधैर्विधीयता
यथास्तु शिक्षा सकलार्थसाधिका ॥५७॥

द्वितीयः सन्देशः

(अध्ययनाऽध्यापनादिषु अनुसन्धानात्मिकाया
विवेचनात्मिकायाश्च प्रवृत्तेरभावमुद्दिश्य)

इदञ्चापि न मे न्यून क्लेशकृन्मन्यतां बुधा ।
आलोचनात्मिका दृष्टि शिक्षणे यन्न विद्यते ॥१॥
आलोचनात्मिका दृष्टि जिज्ञासाश्च नवा नवा ।
प्रविश्य विषयज्ञा शिक्षाया कथिता गुणा ॥२॥
पर सरस्वतशिक्षाया वर्तमाने क्रमेऽधुना ।
नैते गुणा विलोक्यन्ते शब्दार्थरटनादृते ॥३॥

आलोचनीया विषया वर्तन्तेऽद्यापि भूरिशः* ।
परन्तु विदुषां दृष्टिः प्रायस्तेषु न गच्छति ॥४॥

तथा हि—

स्वयं संस्कृतभाषाया उत्पत्तिविषये महान् ।
संशयो विद्यतेऽद्यापि ननु पण्डितमण्डले ॥५॥
"संस्कृताद् प्राकृतं जातं प्राकृताद्वा नु संस्कृतम् ।
संस्कृतं लोकभाषासीन्नवा देशे कदाचन ॥६॥
दैवी भाषेति नामास्या अभवत् केन हेतुना ।
संस्कृतं चापि नामैतत् कदा कथमजायत" ॥७॥
एतस्मिन् विषये प्रायो ज्ञानं किमपि निश्चितम् ।
बहुपण्डितवर्याणामपि नैवाऽवलोक्यते † ॥८॥

---

* अवलोक्यन्ताम् "संस्कृत रत्नाकर" पत्रस्य विशेषाङ्के प्रकाशितो निबन्धसमूह, संस्कृतसाहित्यसम्मेलनस्य निबन्धावली तथा डा० सम्पूर्णानन्दमहोदयाना संस्कृतसम्बन्धिनो लेखा भाषणानि च ।

† अस्मिन् विषये निम्नाङ्किता निबन्धा अवलोकनीया —

१—संस्कृतसाहित्यसम्मेलनस्य निबन्धावली [महामहोपाध्यायश्रीगिरिधरशर्मचतुर्वेदिमहोदयै सम्पादिता]

२—वेदधर्मव्याख्यानम्,, पञ्चमो भाग , [विद्यावाचस्पति श्री मधुसूदन झा महोदयै प्रणीतम्]

३—संस्कृत रत्नाकर [जयपुर] फरवरी १६३८, पृ० ५६

४—संस्कृतम् (अयोध्या) २७-३-१६४५ ई०

५—मैथिली साहित्य [मैथिलीभाषानिबद्ध पुस्तकम्] पृ० ८० ।

६—राष्ट्रभाषा की परम्परा [श्री चन्द्रबली पाण्डेय एम०ए० द्वारा लिखितो निबन्ध] ।

७—काशिकराजकीय संस्कृतमहाविद्यालयस्य पञ्चमदीक्षान्तभाषणम् ।

८—संस्कृतसाहित्येतिहासग्रन्थाना भूमिका ।

६—The age of Panini and sanskrit as a spoken language By DR K B, pathak [भाण्डारकर इन्स्टीट्यूट पत्रिका, अक्टूबर १६२६ ई०]

जैना बौद्धास्तथा नव्या भाषाविज्ञानपण्डिता ।
प्राकृतादेव मन्यन्ते संस्कृतस्य समुद्भवम्[1] *॥९॥*
बहुभिर्मन्यते श्रौती भाषा सर्वपुरातनी ।
पर कैश्चित्ततोऽप्याद्या काचिद् भाषाऽनुमीयते[2] *॥१०॥*
संस्कृत लोकभाषासीदवश्यमिति भूयसाम् ।
पण्डिताना मत मन्ये ज्ञानाद्वा श्रद्धयाऽपि वा ॥११॥
अपरे च पुन केचिद् विश्रुता एव पण्डिता ।
*संस्कृत नहि मन्यन्ते लोकभाषा कथञ्चन*ॐ *॥१२॥*
अतएव च सर्वेषां पुंसा संस्कृतसद्मनि ।
प्रवेशस्याधिकार ते मन्यन्ते नैव धर्मत. ॥१३॥
एवञ्च विषयेष्वेषु बहूनां विदुषा मया ।
विचारा विविधा दृष्टा परस्परविरोधिन. ॥१४॥
पर संस्कृतसम्बन्धे तज्ज्ञानामेव धीमताम् ।
ईदृश खलु वैमत्य विरोधो वा न शोभते ॥१५॥
अत संस्कृतविद्वद्भिर्विषयेऽस्मिन् सयुक्तिकम् ।
सम्यगध्ययनं कृत्वा कर्तव्य कोऽपि निर्णय ॥१६॥

एवमेव—

गणपाठे धातुपाठे तथोणादिगणेऽपि च ।
बहवो धातव शब्दा एवम्भूता मिलन्ति वै ॥१७॥

१—अस्मिन् विषये पालीभाषाया प्राकृतभाषायाश्च साम्प्रतिकाना व्याकरण ग्रन्थाना कोशग्रन्थानाञ्च भूमिका अवलोकनीया ।

२—यथा डा० श्री सुनीतिकुमार चटर्जी महाशयै "भारतीय आर्य भाषा और हिन्दी" इति ग्रन्थे षष्ठितमे पृष्ठे प्रतिपादितम् ।

ॐ यथा—

१—अ० भा० हिन्दीसाहित्यसम्मेलनस्य षट्त्रिंशत्तमे अधिवेशने दर्शनपरिषद अध्यक्षस्य भाषणम् ।

२—सन्मार्ग दैनिक [वाराणसी] १४ दिसम्बर १९६१ ।

३—पण्डितपत्रिका [वाराणसी] १६, २३ मार्च १९५३, १३ जुलाई १९५३

येषा स्वरूपे चार्थे च व्युत्पत्तावपि संशय ।
सुमहान् वर्ततेऽद्यापि सुमहापण्डितेष्वपि ॥१८॥
परन्तु तेषा शब्दाना धातूनाञ्चाथ निर्णये ।
स्वरूपनिर्णये वापि भवन्तो नैव तत्परा ॥१९॥
अस्मिन् सूत्रे त्वय न्यास कर्तव्य इति वादिभि ।
अद्यपर्यन्तमेकोऽपि न्यास कर्तुं न पारित ॥२०॥
तथाप्यद्यापि विद्वासो न्यासचर्चापरायणा ।
परन्त्वावश्यके कार्ये तेषा ध्यान न विद्यते ॥२१॥

तथा हि—

सूत्राणि धातुपाठश्च नामलिङ्गानुशासनम् ।
गणपाठ कृदन्तश्च दशपादी-समन्वित ॥२२॥
एतत् पञ्चकमाख्यात शब्दशास्त्रस्य वैभवम् ।
स्वायत्तीकृत्य यद् विद्वान् शाब्दिकप्रवरो भवेत्[१] ॥२३॥
पर साम्प्रतिके हहो वैयाकरणमण्डले ।
कति वा गुरव शिष्या पञ्चकेऽस्मिन् कृतश्रमा ? ॥२४॥
स तु धन्यो महाविद्वान् मीमांसक युधिष्ठिर ।
धीमान् कपिलदेवश्च श्रीरामावधपण्डित ॥२५॥
यैरेषु विषयेष्वेव जीवन निजमर्पितम् ।
सहमानैस्तथा कष्ट कृतो भूयान् परिश्रम ॥२६॥
शवतिर्गतिकर्मास्ते काम्बोजेष्विति भाष्यकम् ।
पाठयन्ति बुधा सर्वे स्वस्वविद्यार्थिनोऽनिशम् ॥२७॥
पर के नाम कम्बोजा शवतिस्तत्र साम्प्रतम् ।
प्रयुज्यते न वेत्यत्र विद्वास शिथिलादरा ॥२८॥
अथ पाणिनिसूत्रेषु नगर ग्राम-वाचिन ।
वर्तन्ते बहव शब्दास्तथा देशादिवाचिन ॥२९॥

१—यथोक्त पालीभाषाया मोग्गलानथेरोविरचिते व्याकरणे—
सुत्तधातुगणोणादिनामलिङ्गानुशासनम् ।
यस्स तिट्ठति जिह्वग्गे सो व्याकरणकेसरी ॥

पर देशादयस्ते ते कुत्रासन् साम्प्रतञ्च ते।
किन्नामान क्व वर्तन्ते इति जानन्ति कि बुधा ॥३०॥
सर्वेषामपि शब्दाना प्रयोगस्योपलब्धये।
भाष्यकारोऽनदद् भाष्ये प्रयत्न क्रियतामिति ॥३१॥
पर वाक्यमिद शश्नत् पाठय तोऽपि पण्डिता।
ईहन्ते प्रयतन्ते का तदर्थं चेतसा क्वचित् ? ॥३२॥
शतशो धातव प्रोक्ता एकस्यार्थस्य वाचका।
एकैके धातवस्तद्वद् अनेकार्थस्य बोधका ॥३३॥
बहूनामथ धातूना स्वरूपविषये पुन।
अपि टीकाकृतोऽनेके वर्तन्ते भ्रान्तिसयुता[1] ॥३४॥
अथ केचिन्नवाचार्या भाषाविज्ञानवेदिन।
धातुप्रत्ययसम्बन्धे कुर्वते तर्कणा नना ॥३५॥[2]
उणादिसिद्धशब्दाना व्युत्पत्तौ साधने तथा।
अनेकोणादिकाराणा सन्देहो वर्तते स्वयम् ॥३६॥[3]

यथा—

१—पूर्ण इत्येके। पुणेत्यन्ये। इदृशेषु पाठशुद्धिर्निर्णतुमशक्या।
अतएव क्षीरस्वामिनोक्तम्—

पाठेऽर्थे चागमभ्र शात् महतामपि मोहत।
न विद्म किं जिहीमोऽत्र किं चोपादद्महे वयम् ॥

पुलपूर्णादिषु पाठे भ्र शा, यजधातोर्मार्गसस्कारोऽर्थ उत सस्कार एवेत्यर्थे भ्र श। आगमभ्रशात् शास्त्रभ्र शात्।

चुरादौ सिद्धान्तकौमुद्यास्तत्त्वबोधिनी।

२—विषयेऽस्मिन् स्वर्गीयपण्डितप्रवरश्रीविधुशेखरभट्टाचार्यमहोदयाना संस्कृत शिक्षाविषयका लेखा अवलोकनीया।

३—यथा प्रक्रियासर्वस्वकारेण नारायणभट्टेन उक्तम्—

अस्माद्धातोरिय सज्ञा साध्येति मुनिशासने।
कि कुर्मोऽर्थान्वय कश्चिल्लभ्यश्चेत् कृतिना वयम् ॥

विषयेष्वेषु सर्वेषु प्रयोगार्थादिनिर्णये ।
तात्त्विकञ्चाथ गम्भीरं गवेषणमपेक्ष्यते ॥३७॥
परं त्वरयता दुर्गापाठवद् धातुपाठने ।
विदुषा विषयेष्वेषु ध्यानं किं क्वापि गच्छति ॥३८॥
द्वीपदेशादिसम्बन्धे पुराणेषु यदङ्कितम् ।
तत्र भूयान् भ्रमो भाति महतां विदुषामपि ॥३९॥
परं तस्यार्थसङ्गत्यै याथार्थ्यस्य च लब्धये ।
कियद्भिः पण्डितैः प्रीत्या क्रियते नु परिश्रमः ॥४०॥
काव्यादिषु च ये शब्दाः सन्ति भूगोलवाचिनः ।
पशुपक्षि-लतापुष्प-वेषभूषादि-बोधकाः ॥४१॥
तेषामप्यर्थजिज्ञासा पण्डितेषु न दृश्यते ।
न तदर्थं यतन्ते ते कोशादीनां निरीक्षणे ॥४२॥
"कश्चिद् वृक्षविशेषोऽयं, मन्ये काचिदियं लता ।"
इत्येवं पण्डिताः पाठे स्वपाण्डित्यं वितन्वते ॥४३॥
विद्वांसः पाठशालायां प्रायः कोशेषु सत्स्वपि ।
आलस्यान्नैव पश्यन्ति स्वशिष्यान् वञ्चयन्ति च ॥४४॥
एवं सर्वासु विद्यासु सर्वेषु विषयेषु च ।
अनुसन्धानकार्यस्य वरीवर्ति प्रयोजनम् ॥४५॥
प्रायेण विषयेष्वेषु आङ्गलविद्याविशारदैः ।
देश्यैस्तथा विदेशीयैर्विज्ञैर्भूरि विवेचितम् ॥४६॥
अथ संस्कृतविद्याया विशुद्धैरपि पण्डितैः ।
बहवो नवया दृष्ट्या विषयाः प्रतिपादिताः ॥४७॥

सदसद्वाऽपि यत्किञ्चिदुक्त्वा व्युत्पाद्यमित्यदः ।
टीकासर्वस्वकारादिवचनं शरणं हि नः ॥
—प्रक्रियासर्वस्वम्, पृ० २

१—यथा श्री पण्डितरामाज्ञाप्रसादपाण्डेयमहोदयैः स्वकीये "व्याकरण दर्शने" व्याकरणसम्बन्धिनः केचन नूतना विचारा उपस्थापिताः ।

परन्तु भवतामत्र प्रयत्नो नैव दृश्यते ।
न वाऽन्योद्धृततत्त्वानामुपयोगो विधीयते ॥४८॥
एवञ्चालोचनापूर्णं शिक्षाशैल्या अभावत ।
विवेचनात्मिका बुद्धिश्छात्रेष्वपि न जायते ॥४९॥
अतो दोषवतीमेना हित्वा पाठनपद्धतिम् ।
शिक्षाया दीक्षितैर्ग्राह्या शैली बुद्धिविकाशिनी ॥५०॥
हिन्द्या वाऽपरभाषासु सन्ति ये ये प्रकाशिता ।
ग्रन्था आलोचनापूर्णा अनुसन्धानकोविदै ॥५१॥
तेषामध्ययन कृत्वा स्वबुद्धयापि विचार्य च ।[१]
पठन पाठन कार्य विवेचनपुरस्सरम् ॥५२॥
भारतीसेवया ये ये लाभा उक्ता मनीषिभि ।
लभ्येरन् ते यथा सर्वे तथा यत्नो विधीयताम् ॥५३॥

शब्दार्थावगमैकमात्रफलदा क्लेशप्रदा प्रायशो,
विद्याबुद्धिवचोविवेकविमलद्वारे दृढामर्गलाम् ।
एता शिक्षणपद्धति प्रचलिता निक्षिप्य दूरे द्रुत
ग्राह्या बुद्धिविकासिनीयमधुना वैज्ञानिकी पद्धति ॥५४॥

तृतीयः सन्देशः

(उच्चकक्षास्वपि संस्कृतभाषाया माध्यमेन अध्यापनाभावमुद्दिश्य)

इद दृष्ट्वाऽपि मे तीव्रा जायते शिरसि व्यथा ।
यद् भवन्तो निजांश्छात्रान् संस्कृतेऽध्यापयन्ति नो ॥१॥
हित्वा संस्कृतभाषायां पाठन बोधन तथा ।
प्रायो मान्यासु भाषासु पाठयन्त्यखिला बुधा ॥२॥
प्रथमाया मध्यमाया संस्कृतेऽध्यापनं न चेत् ।
शास्त्र्याचार्यपरीक्षासु आसीदावश्यक तु तत् ॥३॥

१—अवलोक्यताम् "संस्कृत के ग्रन्थ और उन पर आधुनिक आलोचनाएँ" नाम्नी पुस्तिका सार्वभौमसंस्कृतप्रचारकार्यालयद्वारा प्रकाश्यमाना ।

पर किं कथयाम्येतद् भवता हन्त चेष्टितम् ।
यदाचार्यान्त्यखण्डेऽपि पाठ्यते देश्यभाषया ॥४॥
अत एव तु विद्वत्सु विद्यार्थिषु च संस्कृते ।
न च पाठयितुं शक्तिर्न च बोद्धुं प्रजायते ॥५॥
यदि धाराप्रवाहेण संस्कृतेऽध्यापनं भवेत् ।
छात्राश्च यदि बुध्येयुः पृच्छेयुश्चापि संस्कृते ॥६॥
तदा संस्कृतभाषाया ज्ञानं वर्द्धेत कीदृशम् ।
देववाणीमयं स्याच्च सम्पूर्णं वायुमण्डलम् ॥७॥
सर्वे शिष्यास्तथाऽऽचार्यास्तदा संस्कृतभाषणे ।
नितरां निर्भया भूत्वा व्यचरिष्यन् समन्ततः ॥८॥
परं न जाने विद्वांसः कस्य देवस्य शापतः ।
संस्कृतेऽध्यापने नैव प्रवर्तन्ते मनागपि ॥९॥
पण्डितानामनेनैव दुर्गुणेन महीयसा ।
वराका बहवश्छात्रा बहु दुःखानि भुञ्जते ॥१०॥
अशक्ता अखिलाश्छात्राः स्वयं संस्कृतलेखने ।
रटित्वा क्रोडपत्राणि परीक्षा उत्तरन्ति हा ॥११॥
अतो हे पण्डिताः सर्वे छात्राणां हितकाम्यया ।
आत्मनश्चापि लाभार्थं रीतिरेषा विसृज्यताम् ॥१२॥
अध्यापनं यथाशक्यं कार्यं संस्कृतभाषया ।
कामं यत्र न बोधः स्यात्तत्र भाषा प्रयुज्यताम् ॥१३॥
सरलैः सरलैर्वाक्यैः सरलैः सरलैः पदैः ।
प्रकारैर्विविधैश्चापि बोध्या विद्यार्थिनः सुखम् ॥१४॥
"छात्रा एव न बुध्यन्ते संस्कृतेऽध्याप्यते यदि" ।
स्वदोषगोपनायैव प्रायेण ब्रुवते बुधाः ॥१५॥
परं तु पण्डिता मिथ्यावचनं न निगद्यताम् ।
यत्नादर्जन्तु सामर्थ्यं संस्कृतेऽध्यापनाय च ॥१६॥
यादृशी नु भवदीयवैदुषी सर्वशास्त्रविषयाऽवगाहिनी ।
तादृशी सुगम रम्य-वाग्झरी संस्कृते नहि कथं वितन्यते ॥१७॥

चतुर्थः सन्देशः

(शास्त्राणां प्रौढपाण्डित्यस्य दिने दिने ह्रासमुद्दिश्य)

अथेयमपि चिन्ता मे मनसो नापसर्पति ।
यन्मे गम्भीरपाण्डित्य क्षय याति दिने दिने ॥१॥
विद्यार्थिनोऽधुना ये तु पाठशालास्वधीयते ।
वैदुष्यस्यार्जने तेषा प्रवृत्तिर्नावलोक्यते ॥२॥
पण्डिता अपि ये केचिन्नवीना सन्ति साम्प्रतम् ।
तत्परा नहि दृश्यन्ते तेऽपि पाण्डित्यरक्षणे ॥३॥
अव्युत्पत्तेस्तथालस्यात् श्रमशक्तेरभावत ।
परीक्षोत्तीर्णतामात्र—लक्ष्यत्वाच्च कथञ्चन ॥४॥—
नानापरोक्षोद्विग्नत्वाद् अर्थप्राप्तेरनिश्चयात् ।
अभावात् स्वाभिमानस्य स्वसाहित्यस्य रक्षणे ॥५॥—
प्रायेण कारणैरेभि सस्कृतज्ञेषु साम्प्रतम् ।
उत्कण्ठा दृश्यते नैव प्रौढपाण्डित्यलब्धये ॥६॥
येन केन प्रकारेण पठित्वा पाठ्यपुस्तकम् ।
परीक्षा ददते छात्रा' समुत्तीर्णा भवन्ति च ॥७॥
अस्मिन् काले तु ये केचिद् विद्वास सन्ति भारते ।
निष्णाता स्वीयशास्त्रेषु दृष्ट्वा जीवामि तानहम् ॥८॥
परमेषामभावे तु कस्य दृष्ट्वाऽहमाननम् ।
आत्मान धारयिष्यामि इति नैव प्रतीयते ॥९॥
अध्यापका इदानीन्तु भूयास सन्ति भारते ।
तेषा मध्ये बहूनान्तु जीविकाऽपि सुशोभना ॥१०॥
पर तेऽपि यतन्ते नो निजवैदुष्यवृद्धये ।
यथालब्धेन बोधेन तुष्टास्तिष्ठन्ति सर्वदा ॥११॥
गद्दिकासु समासीनाश्छात्राभावे तु पण्डिता ।
मक्षिका मारयन्तो वै यापयन्ति दिनान्यहो ॥१२॥

पर नूतनमन्थाना दर्शने वाऽनुशीलने ।
नवज्ञानार्जने वापि प्रवर्तन्ते न ते क्वचित् ॥१३॥
केचित् कतिपयक्रोडपत्राणामेव घोषणम् ।
शास्त्रार्थञ्चापि मन्यन्ते पाण्डित्यपरमावधिम् ॥१४॥
नूतना ये च वर्तन्ते प्राध्यापकपदे बुधा ।
नानाभाषेतिहासादि-प्रवीणा भूरिवेतना ॥१५॥
तेऽपि वाह्येतिहासाद्यालोचनास्वेव तत्परा ।
विमुखा एव दृश्यन्ते गम्भीरज्ञानसङ्ग्रहे ॥१६॥
तत् कथं मे सुरक्षा स्यात् को वा मे हितचिन्तक ।
इति चिन्ताविपण्णाह सदा तिष्ठाम्यनाथवत् ॥१७॥
अतो मयि दया कृत्वा तथा यत्नो विधीयताम् ।
यथा गभीर पाण्डित्य सर्वथा स्यात् सुरक्षितम् ॥१८॥

तथा हि—

येषा पण्डितवर्याणामस्ति पर्याप्तवेतनम् ।
ध्यान देय तु तै सर्वैर्निजनैदुष्यवृद्धये ॥१९॥
राज्यद्वारापि दत्ता स्याद् यथा पर्याप्तजीविका ।
आचार्येभ्यो विशिष्टेभ्यस्तथा यत्नो विधीयताम् ॥२०॥
सन्यासिन साधवश्च निवसन्ति मठेपु ये ।
निश्चिन्ता सन्ति ते सर्वे परिवारस्य पालनात् ॥२१॥
अतस्ते न्याय वेदान्त-मीमासादिपु सर्वदा ।
प्रौढपाण्डित्यरक्षार्थं प्रवर्तन्ता यथाबलम् ॥२२॥
सर्वैर्मुख्यैर्मठाधीशै मिलित्वा मन्त्र्यता मिथ ।
को मठ कस्य शास्त्रस्य भविता परिरक्षक ॥२३॥
एव केनाऽप्युपायेन व्यवस्था क्रियता तथा ।
येन स्यात् प्रौढपाण्डित्य यथापूर्व सुरक्षितम् ॥२४॥

ये प्राक्तनैरहह देवगवी-गभीर—
ज्ञानाम्बुधौ नु विहितान्यवगाहनानि ।

तेषा सुताः सपदि तीरगवारिविन्दु-
स्पर्शेण केवलमहो दधतेऽभिमानम् ॥२५॥

पञ्चमः सन्देशः

(संस्कृतशिक्षणपद्धतौ विद्यालयेषु च विवेचनात्मिकाया. धर्मसंस्कृतिशिक्षाया अभावमुद्दिश्य)

इद च मे महद् दु ख यत् साम्प्रतिकशिक्षणे ।
धर्म-संस्कृति शिक्षाया व्यवस्था नैव दृश्यते ॥१॥
ये मयाऽभिहिता धर्माः संस्कृतिर्या च निर्मिता ।
ये ये च दत्ता सन्देशा विश्वकल्याणकारिण ॥२॥
तेषां वास्तविके ज्ञाने ज्ञापने वाऽनुशीलने ।
प्रसारे व्यवहारे वा युष्मद्ध्यान न विद्यते ॥३॥
"संस्कृत संस्कृतेर्मूलं जीवनञ्चापि संस्कृते ।
विनष्टे संस्कृते नून नष्टा स्यादार्यसंस्कृति" ॥४॥
इत्येव घोषयन्तोऽपि कियन्तो हन्त पण्डिता ।
किं रूप संस्कृतेस्तस्या इति जानन्ति तत्त्वत ॥५॥
श्रुति-स्मृति पुराणानीतिहासो व्यासनिर्मित ।
रामायण च वाल्मीक धर्मग्रन्था इमे स्मृता ॥६॥
परन्तु धर्मग्रन्थानामेषा पण्डितमण्डले ।
पठन पाठनं सम्यक् नहि कुत्रापि दृश्यते ॥७॥
श्रुतिरेवार्थधर्मस्य प्रधानं स्रोत उच्यते ।
अतस्तत्पठन धर्मो द्विजाना परम स्मृत ॥८॥
परन्तु भवतां मध्ये कियन्त सन्ति वैदिका ।
स्वशाखाध्ययन वापि भवद्भि किं विधीयते ॥९॥
आस्तामध्ययनं दूरे भवद्भिस्तु महात्मभि ।
यस्य वेदस्य का शाखा ज्ञायते नैतदप्यहो ॥१०॥
वाल्मीकिरिवदत् यस्य प्रचारं रक्षता गृहे ।
ब्राह्मणानां गृहे तस्य लोपोऽयमधुनेदृश ! ॥११॥

मनुनाऽऽचार्यवर्येण पठनाय निजस्मृते ।
पाठनाय च विद्वांसो भूरिश सन्ति नोदिता ॥१२॥
छान्दोग्योपनिषद् भूते मनूक्त भेषज परम् ।
परमस्यापि शास्त्रस्य कियन्त सन्ति पाठका ॥१३॥
प्रामाण्ये तु पुराणाना विदुषामामहो महान् ।
परमध्ययन तेषा किय तो हन्त ! कुर्वते ॥१४॥
धर्मनीतीतिहासादे ज्ञानविज्ञानयोस्तथा ।
महाभारतमार्याणा सुमहानाकरो मत ॥१५॥
परमेतादृशस्यापि ग्रन्थरत्नस्य दर्शने ।
पठने वापि वर्तन्ते किय त स्पृहयालव ॥१६॥
एव धार्मिकग्रन्थाना लुप्ते स्वाध्यायसङ्ग्रहे ।
धर्मस्य सस्कृतेर्वापि सुज्ञान जायता कथम् ॥१७॥
धर्म-सस्कृति-तत्त्वानामत एव विनिर्णये ।
स्वय पण्डितवर्गेऽपि महाभ्रान्तिर्विलोक्यते ॥१८॥
अतो यथागतेनैव पथा विद्वज्जना अपि ।
गच्छन्ति मूढवत् त्यक्त्वा युक्तायुक्तविचारणाम् ॥१९॥
अत एवाऽधुना हिन्दुसमाजे सर्वतोदिशम् ।
धर्मस्य सस्कृतेश्चापि व्युत्क्रमो दृश्यते महान् ॥२०॥
अधर्मो धर्मता यातो धर्मश्चाधर्मता गत ।
अवैदिकानां भावाना प्रचार सर्वतोऽभवत् ॥२१॥
योऽय सनातनो धर्म पाल्यते साम्प्रत जनै ।
तत्सम्बन्धेऽधुना दृष्टा भिन्ना भिन्ना विचारणा ॥२२॥
कश्चित् परम्परावादी कश्चित् पूर्ण सुधारक ।
कश्चित् सर्व परित्यज्य व्यवस्थामीहते नवाम् ॥२३॥
अत सम्प्रति भूयासो जना धर्मानुरागिण ।
वास्तवे धर्मसस्कृत्योर्विचारे स ति तत्परा ॥२४॥
परन्तु भवतामस्या दिशि दृष्टिर्न विद्यते ।
सर्वेऽपि स ति निश्चि ता मूकान्धबधिरा इव ॥२५॥

का संस्कृति कुतो जाता किमाधारा किमात्मिका ।
शुद्धा वा मिश्रिताऽन्याभि शोभना वाऽप्यशोभना ॥२६॥
किंस्वरूपा कियद्रूपा कियद्दूरं च विस्तृता ।
किं हेयं किमुपादेयं तत्रञ्चाप्यत्र विद्यते ॥२७॥
के के तत्र तथाक्षेपा कृता वैदेशिकैर्बुधै ।
तथाञ्चापि समाधानं शक्यते वा न शक्यते ॥२८॥
भारतीयैश्च विद्वद्भिर्विभिन्नमतवादिभि ।
या या भिन्ना कृता व्याख्यास्तासु का युक्तिमत्तमा ॥२९॥

पुनश्च—

को विधि कोऽर्थवादश्च को भेदो मुख्यगौणयो ।
अस्वर्ग्यो नाम के धर्मा के च लोकविरोधिन ॥३०॥
के के धर्मास्तथा लोभ-मोह माया-प्रवर्तिता ।
कियन्तो वैदिका धर्मा कियन्तस्तान्त्रिकास्तथा ॥३१॥
परस्परविरुद्धानामुक्तीना का व्यवस्थिति ।
के साम्प्रदायिका भावा धर्ममध्ये समागता ॥३२॥
एतस्मिन् समये चाऽथ धर्मह्रासमयेऽशुभे ।
वर्तितव्यं न चाऽस्माभिर्धर्मे त्यक्त्वाऽधर्मचरणे ॥३३॥
अवश्य ज्ञेयमित्येतत् सर्वं संस्कृतपण्डितै ।
पाठशालासु चैतेषां शिक्षा देया विशेषत ॥३४॥
परन्तु विद्युपाठेन विषयेष्वेषु वर्तते ।
यदा न तात्त्विक ज्ञान शिक्षाया का कथा तत ॥३५॥
महाविद्यालये वापि विश्वविद्यालयेऽपि वा ।
धर्मसंस्कृतिशिक्षायाश्चर्चा नाऽऽकर्ण्यते क्वचित् ॥३६॥
परन्तु धर्मसंस्कृत्यो परीक्षणयुगेऽधुना ।
न युक्त तदवज्ञानानेव नीनावलम्बनम् ॥३७॥
स्थातव्यं वाऽधुना युद्धे कर्तव्यं वा पलायनम् ।
सान्त्वयो वा धर्मस्य प्रश्ने प्रतिपत्तिभि ॥३८॥

अतो धर्मस्य सम्बन्धे संस्कृतेविषये तथा ।
चिन्तनं विदुषां मध्ये परमावश्यकीं क्रियाम् ॥३९॥
धन्यास्ते सर्व एवापि महाराष्ट्रीय-पण्डिताः ।
धर्म-संस्कृति सिन्धोर्ये मन्थने सन्ति तत्पराः ॥४०॥
तैरनेकानि वर्षाणि दत्वा पूर्णं परिश्रमम् ।
धर्मसंस्कृति-सम्बन्धे विमर्शो विपुलः कृतः ॥४१॥

तथा हि—

गीताया विषये श्रीमत्तिलकेन मनीषिणा ।
गीतारहस्यनामैको ग्रन्थः सम्पादितोऽद्भुतः ॥४२॥
धर्मग्रन्थेषु हिन्दूनां प्राचीनेषु नवेषु वा ।
नेदृग् विवेचनापूर्णः कश्चिद् ग्रन्थोऽवलोक्यते ॥४३॥
सुधिया देवकुण्णेन धर्मादर्शाभिधो महान् ।
धर्म नीति तथालम्ब्य ग्रन्थो विलिखितोऽद्भुतः ॥४४॥
धर्मकोशाभिधे स्वीये ग्रन्थे लक्ष्मणशास्त्रिभिः ।
धर्मस्य विषये कीदृक् सुमहान् सङ्ग्रहः कृतः ॥४५॥
वर्तमाने तु हिन्दूनां धर्मे संस्कारवादिभिः ।
बुधैरपि विचारार्हा लिखिता ग्रन्थराशयः ॥४६॥
तेऽधुना स्थापयित्वा तु धर्मनिर्णयमण्डलम् ।
कुर्वते नवया दृष्ट्या धर्माधर्मव्यवस्थितिम् ॥४७॥
श्रीमता रघुनाथेन सप्रमाणं सयुक्तिकम् ।
धर्मस्वरूपसम्बन्धे विचारो गहनः कृतः ॥४८॥
श्रीपादशास्त्रिभिस्तद्वत् विख्यातैर्वेदपण्डितैः ।
विचारा बहवः प्राच्यास्तर्करालोचिता भृशम् ॥४९॥
अन्ये पराजपे, काणे, दफ्तरी, पाठकस्तथा ।
दिवेकर महादेव, शिन्दे, सातवलेकरः ॥५०॥
इत्यादिबहुभिर्विद्वद्भिः धर्मशास्त्रावगाहनम् ।
कृत्वा नवीना बहवो विचाराः प्रकटीकृताः ॥५१॥

एव सनातने धर्मेऽपरिवर्तनवादिभि ।
पण्डितैरपि भूयासो ग्रन्था श्रेष्ठाविनिर्मिता. ॥५॥
विवेचकनरेशयेन श्रीमद्गोविन्द जोशिना ।
सर्वे सनातना धर्मा आद्योपान्त समर्थिता ॥५३॥
वेदोक्तधर्मसम्बन्धे श्री दीनानाथशास्त्रिभि ।
लिखिता बहवो ग्रन्था प्रौढा पाण्डित्यमण्डिता. ॥५४॥
सविस्तर सुधीवर्यै माधवाचार्यशास्त्रिभि ।
युक्त्या समाहिता सर्वे प्रश्ना धर्मविरोधिन ॥५५॥
श्रीवसन्तकुमारेण विदुषा वङ्गवासिना ।
प्राचीना अखिला पक्षा सम्यग्रूपेण मण्डिता ॥५६॥
शास्त्रधर्मप्रचारिण्या सभया वहुपुस्तकै ।
क्रियते वहुवर्षेभ्य प्राचीनमतपापणम् ॥५७॥
वेदविज्ञानसूर्येण श्रीमोतीलालशास्त्रिणा ।
लिखिता अद्‌भुता ग्रन्था प्राचीनाचारपोषका ॥५८॥
अपरे शङ्कराचार्यै श्रीस्वामिकरपात्रिभि ।
लिखित सुमहान् ग्रन्थ साम्यवादस्य खण्डने ॥५७॥
समालोचने कृते तस्य राहुलेन मनीषिणा ।
पुन श्रीस्वामिभि सम्यग् विहितं तस्य खण्डनम् ॥६०॥
धीमान् स्वामी दयानन्दो महाविद्वान् उमापति ।
आभ्याञ्च द्वौ महाग्रन्थौ लिखितौ धर्मपोषकौ ॥६१॥
राधाकृष्णन्प्रभृतिभिस्तथाऽन्यैरपि पण्डितै ।
धर्म-संस्कृति सम्बन्धे विचारो गहन कृत ॥६॥
अथ प्राचीनधर्मेषु विद्वांसो येऽधुनातना ।
श्रद्धा नो दधते, तेषा कृते त्वालोचना तथा ॥६३॥
तेषामपि बहुग्रन्था निबन्धा बहुशस्तथा ।
सन्ति प्रकाशिता प्रौढयुक्तियुक्तिपुरस्कृता ॥६४॥
सर्वेषामपि चैतेषा सारज्ञान न जायते ।
न तावद् धर्मसम्बन्धे सुकर कोऽपि निर्णय ॥६५॥

अद्यापि बहवोऽस्माकं देशे श्रद्धालवो जनाः ।
पण्डितानेव पृच्छन्ति धर्माधर्मव्यवस्थितिम् ॥६६

अतः संस्कृतविद्भिश्छात्रैश्चापि वयोऽधिकैः ।
सम्पाद्य धर्मसम्बन्धे सम्यग्ज्ञानं कथञ्चन ॥६७॥

अथ च—

परोक्षवादाः के नाम के वा पण्डितमानिनः ।
पुष्पिता वा गिरः काश्च ज्ञेयं सर्वमिदं बुधैः ॥६५॥

शास्त्रेषु यानि वाक्यानि रोचनार्थानि केवलम् ।
अवश्यं तान्यपि स्पष्टीकरणीयानि शिक्षणे ॥६६॥

फलश्रुतीनां मेघौघैर्धर्माकाशे समावृते ।
नहि शक्यः सुखं द्रष्टुं सामान्यैः सत्यभास्करः ॥६७॥

अस्वर्ग्यो लोकविद्विष्टो धर्मः को नाम कथ्यते ।
धर्माभासश्छलं वापि किं स्वरूपं भवत्युत ॥६८॥

नियमो वा यमाच्छ्रेष्ठो यमो वा नियमादथ ।
धर्माणामन्तिमं साध्यं किं, कथं लभ्यते च तत् ॥६९॥

इत्येते विषयाः सर्वे चिन्तनीया मनीषिभिः ।
बोद्धव्या बोधनीयाश्च विद्यागारेषु सर्वदा ॥७०॥

विद्यालयः सुरगिरो, गुरुशिष्यवर्गः
प्रायो द्विजोऽथ वसतिर्मठमन्दिरेषु ।
तत्रापि धर्मविषयस्य न शिक्षणं चेद्
हहो कुतो नु भविता वत धर्मबोधः ॥७१॥

षष्ठः सन्देशः

(परीक्षार्थिभिः तासां ग्रन्थानां पठने अप्रवृत्तिमुद्दिश्य)

अयञ्चापि विचित्रो वः स्वभावो मेऽतिदुःखदः ।
यत् परीक्षास्थितान् ग्रन्थान् हित्वा नाऽन्यानधीयते ॥१॥

यथाकथञ्चित् क्रीता वा याचिता वा यतस्ततः ।
परीक्ष्येष्वेव ग्रन्थेषु नयन्ति निजजीवनम् ॥२॥

अनेन च स्वभावेन सर्वलोकातिशायिना ।
बहूनां ग्रन्थरत्नानां प्रचारो विलयं गतः ॥३॥
यद्यपि ज्वालिता बह्वो विविधा ग्रन्थराशयः ।
लुण्ठिताऽपहृताश्चापि विदेशस्थैरनेकशः ॥४॥
कीटैः कवलिताः केचित् केचिद् ध्वस्ता धरातले ।
केचिद् गोपनबुद्ध्यैव विलोपं प्रापिताः परैः ॥५॥
एवं मे यदभून्नष्टं विशालं हन्त वैभवम् ।*
अद्यापि शोकशल्योऽसौ हृदयान्नापसर्पति ॥६॥

तथापि भवता पूर्वपुरुषाणां प्रयत्नतः ।
अवशिष्टं यदास्ते तत् न स्वल्पं गौरवावहम् ॥७॥
आंग्लानां तूपकारोऽसौ विस्मर्तुं नैव शक्यते ।
लुप्ता ग्रन्था अनेके तैर्यदानीताः प्रकाश्यताम् ॥८॥
परन्त्वेषणे तेषां दर्शनेऽध्ययने तथा ।
जिज्ञासा या प्रवृत्तिर्वा पण्डितानां न दृश्यते ॥९॥

तथा हि—

धर्मार्थकाममोक्षाख्याश्चत्वारो हिन्दुसंस्कृतौ ।
पुरुषार्था मता येषां कर्तव्या साधनाऽखिलैः ॥१०॥
चतुर्णामपि चैतेषां ससिद्ध्यै मम वाङ्मये ।
वर्तन्तेऽत्युत्तमा ग्रन्था भूयांसो विश्वविश्रुताः ॥११॥
परन्तु तेषां ग्रन्थानां पठने पाठनेऽथवा ।
प्रवृत्तिः पण्डितानान्तु क्वचिन्नैवोपलभ्यते ॥१२॥
कौटलीयार्थशास्त्रस्य कामशास्त्रस्य चैव हि ।
प्रसिद्धिर्वर्तते देशे विदेशेऽपि च भूयसी ॥१३॥
परन्त्वीदृशयोर्भव्यरत्नयोरपि सम्प्रति ।
नहि दृष्टो मया पाठः पण्डितानां शतेष्वपि ॥१४॥

---

* अस्मिन् विषये भारतीयदत्ता प्रकाशयिष्यमाण "संस्कृत साहित्य के विलुप्त ग्रन्थ" इति पुस्तकमवलोकनीयम् ।

ज्ञान विज्ञान-शास्त्रेषु निखिलेष्वपि भूतले ।
ज्ञान दर्शनशास्त्रीय भारतस्य विशिष्यते ॥१५॥
पर दर्शनशास्त्रस्य वर्णमालापि पण्डितै ।
अनेकैर्ज्ञायते नैव किमाश्चर्यमत परम् ॥१६॥
आध्यात्मिकेषु ग्रन्थेषु योगवाशिष्ठनामक ।
एको निरुपमो ग्रन्थो वर्तते मम वाड्मये ॥१७॥
ग्रन्थरत्नमिद येन सस्कृतज्ञेन नेक्षितम् ।
तस्य व्यर्थमह मन्येऽध्ययन जीवन तथा ॥१८॥
श्रीमद् भीखणलालेनात्रेयेण सुमनीषिणा ।
लेखव्याख्यादिना तस्य महत्त्व बहु कीर्तितम् ॥१९॥
परमेतस्य रत्नस्य रूपमप्यवलोकितम् ।
कियद्भिर्ननु युष्मासु सत्य सत्य निगद्यताम् ॥२०॥
इदानीं भगवद्गीताऽध्यात्मग्रन्थेष भूरिषु ।
देशे विदेशे सर्वत्र महतीं मान्यता गता ॥२१॥
परमस्यापि ग्रन्थस्य ज्ञाने वा प्रतिपादने ।
समर्था पण्डिता सन्ति किय त इति कथ्यताम् ॥२२॥
धर्मशास्त्रेषु सर्वेषु सुप्रसिद्धा मनुस्मृति ।
आद्योपा त पर कै कै स्मृतिरेषाऽवलोकिता ॥२३॥
ग्रन्थानामथ चैतेषा ज्ञानज्ञापनवर्जनात् ।
चतुर्भ्य पुरुषार्थेभ्य पण्डिता अपि वञ्चिता ॥२४॥
एवमेव च वर्त ते नीतिग्र था अनेकश ।
येषाध्ययन लोके परम हितकारकम ॥२५॥
मनोश्च शुक्राचार्यस्य गुरो कामन्दकस्य च ।
भीष्मस्य विदुरस्याथ चाणक्यस्य च धीमत ॥२६॥
आचार्यसोमदेवस्य विद्यापतिकवेस्तथा ।
आचार्याणा तथाऽन्येषामनेका सन्ति नीतय ॥२७॥
पर ता अपि पठ्यन्ते पाठ्यन्ते वा न पण्डितै ।
लौकिकार्थेषु विद्वासस्तेनाऽलौकिकता गता ॥२८॥

एको राजेश्वर शास्त्री सतु धन्यो महासुधी ।
येनानुशीलित सर्वो नीतिशास्त्रस्य समह ॥२६॥
एव वेदोपनिषदो ब्राह्मणारण्यके तथा ।
पुराणानि च सर्वाणि श्रीरामायणभारते ॥३०॥
अश्वशास्त्र हस्तिशास्त्र धनु शास्त्र तथैव च ।
नाट्यशास्त्र च सङ्गीतशास्त्र तन्त्राणि चैव हि ॥३१॥
काव्य-नाटक ग्रन्थाश्च सर्वदर्शनसग्रह ।
नानाविध प्रहसन विविधा गीतिपुस्तिका ॥३२॥
सुभाषितानि कोशाश्च भाणग्रन्था अनेकश ।
गद्य पद्य निबद्धाश्च कथाग्रन्था मनोहरा ॥३३॥
चैतन्यसम्प्रदायस्थै वाल्लभैश्चापि सूरिभि ।
रचिता. स्तवोऽपूर्वो लालित्ये पदभावयो ॥३४॥
अनेकार्थानि काव्यानि चित्रकाव्यानि यानि च ।
चम्पूग्रन्था अनेके ते दण्डकानि बहूनि च ॥३५॥
क्षेमेन्द्रस्तव सर्वा लौकिकज्ञानराशय ।
मनोरञ्जनग्रन्थाश्च दीक्षितादिविनिर्मिता ॥३६॥
आर्यासप्तशती दिव्या गाथासप्तशती तथा ।
दूतकाव्यान्यनेकानि लहरीपुस्तकान्यपि ।
नानाविषयबद्धानि शतकानि बहूनि च ॥३७॥
स्तोत्ररत्नान्यपूर्वाणि प्रौढानि रुचिराणि च ।
श्रीनारायणभट्टानां प्रबन्धा बहवोऽद्भुता ॥३८॥
कविकल्हणसद्‌ग्रन्था रम्या राजतरङ्गिणी ।
श्रीमच्छङ्करपादानां काव्य दिग्विजयाभिधम् ॥३९॥
एते ग्रन्थास्तु द्रष्टव्या अध्येतव्यास्तथैव च ।※
द्रव्ये सति यथाशक्य रक्षणीया निजे गृहे ॥४०॥

※ एतादृशपुस्तकाना विशेषपरिज्ञानाय कार्यालयद्वारा प्रकाश्यमानं "संस्कृत साहित्य की कतिपय उपादेय महत्वपूर्ण रचनाये" इति पुस्तक द्रष्टव्यम् ।

एव विंशशताब्दीयैरपि नैकै सुधीजनै ।
भूयासो लिखिता ग्रन्था प्रौढवैदुष्यभूषिता ॥४१॥
पर तेषामपि ज्ञाने सम्माने वाऽनुशीलने ।
दृश्यन्ते प्रायश सर्वे विद्वास शिथिलादरा ॥४२॥

यथा—

साहित्यवैभव नाम नवच्छन्दोमयी कृति ।
भट्टश्रीमथुरानाथशर्म्मणा रचिताऽद्भुता ॥४३॥
उमापतिद्विवेदेन कविरत्नेन सूरिणा ।
बृहत्त्रयी प्रतिस्पर्द्धि महाकाव्य व्यरच्यत ॥४४॥
अपूर्वप्रतिभापुञ्जै "हसूरकर" शास्त्रिभि ।
बहुगद्यकथाग्र या निरमीयन्त मञ्जुला ॥४५॥
कविकैरवचन्द्रेण बदरीनाथशर्मणा ।
गुणेश्वरचरित्राख्या हृद्या चम्पूर्विनिर्मिता ॥४६॥
वेदविज्ञानमूर्धन्येन मधुसूदनशर्मणा ।
लिखित कीदृश काव्य तदिन्द्रविजयाभिधम् ॥४७॥
रामावतारसज्ञेन विख्यातेन मनीषिणा ।
कृतयो लिखिता नह्यो विद्वद्विस्मापना भृशम् ॥४८॥
शास्त्रिणा श्रीनिवासेन वैद्येन लिखितो महान् ।
उपन्यासो मनोहारी नव्यश्चन्द्रमहीपति ॥४९॥
महामहोपाध्यायैश्च मथुरानाथदीक्षितै ।
चाद्दर्शक्येऽपि व्यलिख्यन्त ग्रन्था बहुविधा नवा ॥५०॥
श्रीमन्मङ्गलदेवेन शास्त्रिणा स्फूर्तिदायिका ।
कीदृश्योऽपूर्वभावाढ्या रचिता रम्यसूक्तय ॥५१॥
श्रीमदण्णाङ्कराचार्यैर् ग्रथिता ग्रन्थराशय ।
गद्य पद्य निबन्धाश्च कस्य नो विस्मयावहा ॥५२॥
मार्येभगवदाचार्यै श्रीमद्गान्धिमहात्मन ।
चरित्रविषयेऽपूर्व महाकाव्य प्रकाशितम् ॥५३॥

श्रीवैदेहीविवाहाख्यं कविभिः कृष्णमूर्तिभिः ।
कमनीयतमं नव्यं गद्यकाव्यं विनिर्मितम् ॥५४॥
क्षमारावेति विख्याता कवयित्री मनीषिणी ।
चमत्कारमयी रम्या रचना अकरोदहो ॥५५॥
चन्द्रशेखरमिश्रेण विदुषाऽतिमनोहरः ।
नीतिग्रन्थो विरचितो नीतिदर्पणनामकः ॥५६॥
श्रीमता राघवार्येण विख्यातेन मनीषिणा ।
कविता निरमीयन्त कीदृश्यो ननु कोमलाः ॥५७॥
श्रीसत्यदेववाशिष्ठ-विदुषा भिषजा नवम् ।
नीतिकाव्यं मनोहारि दर्शनीयं विनिर्मितम् ॥५८॥
कवये सोमनाथाय नमो नेपालवासिने ।
सुरम्याः स्तुतयो यस्य स्मारयन्ति जगद्धरम् ॥५९॥
श्रीजीवन्यायतीर्थेन कलाकुशलशिल्पिना ।
गुम्फिता कीदृशी रम्या काव्यनाटकमालिका ॥६०॥
भगवद्दत्त "राकेश" कविना कियदद्भुतम् ।
संस्कृतेऽनूदिता हृद्या हिन्दीकामायनी कृतिः ॥६१॥
गोपेन्द्रभूषणाख्येन विदुषा तुलसीकृतम् ।
सर्वं संस्कृतपद्येषु निबद्धं खलु मानसम् ॥६२॥
श्रीविष्णुकान्तझोपाह्व-कविना ननु कीदृशी ।
रम्या राजेन्द्रवंशस्य प्रशस्तिर्लिखिता खलु ॥६३॥
सूर्यनारायणाख्येन शास्त्रिणा रचितान्यहो ।
कीदृशानि मनोज्ञानि खण्डकाव्यान्यनेकशः ॥६४॥
श्रीमद्गणेशरामेण सूरिणा च विनिर्मिता ।
हास्य-नीति-कथा काव्य-त्रयी ललिताद्भुता ॥६५॥
श्रीमद्रामकुबेरेण मालवीयेन सूरिणा ।
मालवीयमहाकाव्यं मालवीयायनं कृतम् ॥६६॥
एवं वाङ्मयमाराध्य प्राचीनानां मनोहरम् ।
अमूल्या मणयोऽनेके नवीनैरपि गुम्फिताः ॥६७॥

परमेषां प्रकाशेन कियता विदुषामहो ।
उद्भासितानि सत्त्वानि विद्यते, तन्निगद्यताम् ॥६८॥
नूतनं लिखितं किं किं कुत्र केन मनीषिणा ।
इति वेत्तुं सुधीवृन्दे स्पृहा प्रायो न दृश्यते ॥६९॥
नवनिर्मितग्रन्थानां सम्मानेऽपि सुधीजनैः ।
प्रायशो मत्सरग्रस्तैरौदार्यं न प्रदर्श्यते ॥७०॥
किन्तु वृत्तिमिमां हित्वा विदुषामयशस्करीम् ।
द्रष्टव्या बहवो ग्रन्था प्राचीना नूतनास्तथा ॥७१॥

अन्यच्च—

स्थानेभ्योऽथ बहुभ्यश्च विविधाः पत्रिका अपि ।
साप्ताहिक्योऽथ मासिक्यः पाक्षिक्यश्चापि काश्चन ॥७२॥—
सहमानैरपि क्लेशं वहमानैर्ऋणं तथा ।
धीरैः कैश्चित् प्रकाश्यन्ते संस्कृतोन्नतिकाम्यया ॥७३॥
पत्रिकाणामपि प्रायस्तासां नामादिकस्य च ।
बहूनां संस्कृतज्ञानां किञ्चिज्ज्ञानं न वर्तते ॥७४॥
एतेषां ग्रन्थरत्नानां पत्रिकाणां तथैव च ।
सङ्ग्रहोऽध्ययनञ्चापि कर्तव्यं सकलैर्बुधैः ॥७५॥ ⊛

⊛ नवनिर्मितानां संस्कृतग्रन्थानां साकल्येन परिज्ञानाय निम्नाङ्किता ग्रन्था निबन्धाश्च अवलोकनीयाः —

१—अर्वाचीन संस्कृत साहित्य [श्री गा० वर्णेकरमहोदयैः मराठी भाषया उपनिबद्धो ग्रन्थः] मूल्यम् २०-० ओरिएण्टल बुक एजेन्सी, पूना ।

२—Modern Sanskit Rightings (by dr v raghavan)

—विद्वच्चरितम् (श्री प० कालीप्रसादशास्त्रिभिर्विरचितम्) संस्कृत कार्यालय, अयोध्या ।

—contribution of Keral to Sanskrit titerture [By K Kunjunni Raja] इदं केरलीयकृतिविषये द्रष्टव्यम् ।

५—संस्कृतप्रतिभानाम्न्यां पत्रिकायां [साहित्य अकादमी, नई दिल्लीतः प्रकाश्यमानायां] निकषोपलनामा समालोचनास्तम्भः । (अग्रेऽपि)

सर्वेषां संस्कृतज्ञानां गेहे गेहे निजो निजः ।
एकैको लघुकायोऽपि पुस्तकालय इष्यते ॥७६॥

एवं च मेऽप्रसिद्धानां विलुप्तानां च भूयसाम् ।
सर्वेषामपि ग्रन्थानां प्रचारो भविता पुनः ॥७७॥

अतो भवन्तोऽध्ययने त्यक्त्वा सङ्कीर्णतां बुधाः ।
अद्यारभ्य प्रवर्तन्तां निरवृतज्ञानसंग्रहे ॥७८॥

बहवस्तु बुधाः पार्श्वे ग्रन्थागारेषु सत्स्वपि ।
रुचिमन्तो न दृश्यन्ते ग्रन्थानामवलोकने ॥७९॥

कासुचित् पाठशालासु सत्यपि ग्रन्थसङ्ग्रहे ।
तत्र तस्य समीचीना व्यवस्था नाऽवलोक्यते ॥८०॥

दानादान-व्यवस्थाया विरहात्, अरुचेरपि ।
वेष्टिता एव तिष्ठन्ति ग्रन्था केचित्तु सर्वदा ॥८१॥

एतेषामपि दोषाणां कृत्वा झटिति मार्जनम् ।
संस्कृतग्रन्थशालानां कार्या सम्यग् व्यवस्थितिः ॥८२॥

अनेकविषयोचिताध्ययनचिन्तनालोचनो—
पलब्धवरवैदुषी-प्रथितकीर्तिकान्ता बुधाः ।
चिरन्तनपरम्पराधिगतमात्मनो गौरवं
यशश्च जगतीतले पुनरवाप्य देदीप्यताम् ॥८३

सप्तमः सन्देशः

(जैन-बौद्ध-वाङ्मयस्याध्ययने श्रद्धाया रुचेश्चाभावमुद्दिश्य)

एषाऽपि भवतां वृत्तिर्न मह्यं खलु रोचते ।
वाङ्मयं जैन-बौद्धानां यद् भवन्तः पठन्ति नो ॥१॥

---

† वर्तमान-संस्कृतपत्रपत्रिकाणां परिचयाय परिशिष्टभागोऽवलोकनीयः ।

विलुप्तप्रायग्रन्थप्रकाशनविषये विशेषज्ञानाय सागरविश्वविद्यालयस्य संस्कृत-विभागतः प्रकाश्यमानायां "सागरिका" पत्रिकायां प्रथमे द्वितीये चाङ्के प्रकाशितः "संस्कृतग्रन्थप्रकाशिका" नामको निबन्धः पठनीयः ।

अनयोरपि साहित्ये विशाले विश्वविश्रुते ।
बहव सरस्तमग्रन्था वर्तन्तेऽत्युत्तमोत्तमा ॥२॥ ❀
परन्तु तेषा ग्रन्थाना नामान्यपि न जानते ।
प्रायो भवन्त सर्वेऽपि तन्मे दुःखतर महत् ॥३॥
काव्ये व्याकरणे नाट्ये नीतौ धर्मेऽथ दर्शने ।
इतिवृत्ते कथायां च सम्यक्चारित्रशिक्षणे ॥४॥—
ज्योतिषे वैद्यके शिल्पे भूगोलविषये तथा ।
विषयेष्वेषु सर्वेषु तथैवाऽन्यविषेष्वपि ॥५॥—
अपूर्वप्रतिभापुञ्जै जैनैर्बौद्धैर्मनीषिभि ।
लिखिता बहवो ग्रन्था विद्वद्विस्मयकारिण ॥६॥
एते सर्वेऽपि सद्ग्रन्था गौरव दर्शयन्ति मे ।
भारतीय महत्त्व च ख्यापयन्ति समन्तत ॥७॥
यदि जैन च बौद्ध च वाङ्मय नोद्गत भवेत् ।
न पूर्णता गताऽहं स्या न चैतादृग् यशस्विनी ॥८॥
भारतीयेतिहासस्य तथा भारतसस्कृते. ।
ज्ञानाय चैतत् साहित्य परमावश्यक मतम् ॥९॥
पर धार्मिकवैमत्यादौदासीन्यादथापि वा ।
न तत्र पण्डिता प्राय स्नेह श्रद्धा च कुर्वते ॥१०॥
किन्तु प्रचारकालेऽस्मिन् मम माहात्म्यदूषये ।
पण्डितानां मनोवृत्तिरिय नैव शुभावहा ॥११॥
स तु धन्यतम डाक्टर सिलवन लेवी महोदय ।
येनोद्धृता विदेशेभ्यो बौद्धग्रन्था अनेकश ॥१२॥
सच सम्माननीयो मे राहुलो विदुषा वर ।
बौद्धग्रन्था समानीता येनाऽनेकेऽन्यदेशत ॥१३॥
अहो तपस्विना तेन चिर कृत्वा महाश्रमम् ।
भूयासो दुर्लभा ग्रन्था शोधपूर्व प्रकाशिता ॥१४॥

❀ बौद्ध-जैन-सस्कृतग्रन्थाना नामानि नानासूचीपत्रेभ्यो ज्ञातव्यानि ।

अतो भवद्भिरप्येषा प्रार्थना जैनबौद्धयोः।
साधने समये लब्धे कार्यं प्रीत्याऽवलोकनम् ॥१५॥
बौद्धसंस्कृतसाहित्ये ग्रन्थं ललितविस्तरम्।
प्रज्ञापारमितादींश्च नूनं पश्यन्तु पण्डिताः ॥१६॥
एतेषां ग्रन्थरत्नानां भाषेयालोक्यतां मनाक्।
कीदृशी सरला हृद्या ललिता चित्तहारिणी ॥१७॥
जैनसंस्कृतसाहित्येऽप्येवं ग्रन्था मनोहराः।
भूयांसः खलु विद्यन्ते विदुषां विस्मयावहाः ॥१८॥*
मेरुतुङ्गादिसूरीणां प्रबन्धा बहवोऽद्भुताः।
कथारत्नाकराद्याश्च कथाग्रन्था मनोरमाः ॥१९॥
यशस्तिलकचम्पूश्च क्षत्रचूडामणिस्तथा।
ज्ञानार्णवस्तथाऽनेके सूक्तिग्रन्था मनोहराः ॥२०॥
एते तु भाषया भावे शैलीभिर्विविधैस्तथा।
उत्तमा निखिला ग्रन्था द्रष्टव्या बुधसत्तमैः ॥२१॥
एतदीयाश्च धार्मिका ग्रन्थास्तथा दार्शनिकाश्च ये।
समाद्या श्रद्धयाऽस्य ज्ञानाज्जरिनिरत्नाय ॥२२॥
अथ ये ये च वर्तन्ते पालिप्राकृतयोरपि।
महत्त्वपूर्णाः सद्ग्रन्था नानाविषयशालिनः ॥२३॥†
तेषामपि यथाशक्ति सद्ग्रन्थानामवलोकनम्।
विधीयेत भवद्भिश्चेत् सुतरां शोभनं भवेत् ॥२४॥

---

* अस्मिन् विषये निम्नाङ्किता ग्रन्था आलोकनीयाः —

१—जिनरत्नकोश, वेलंकर।

२—जैन दार्शनिक साहित्य का सिंहावलोकन, दलसुख भाई।

३—जैन साहित्य और इतिहास, नाथूराम प्रेमी।

४—जैन ग्रन्थ और ग्रन्थकार, फतेहचन्द बेलानी।

† प्राकृत साहित्य का इतिहास, डा० जगदीशचन्द्र जैन।
पालिसाहित्य का इतिहास, भरतसिंह उपाध्याय।

अल्पीयसा प्रयत्नेन पाली प्राकृत-भाषयोः ।
भवद्भिः शक्यते लब्धुं ज्ञानं वेदुष्यवर्द्धकम् ॥२५॥ ※

धर्म संस्कृति-विचारभेदज
वैमनस्यमपनीय मानसात् ।
जैन-बौद्ध रचनाऽनुशीलने
तत्परा भवत तत्त्वलिप्सवः ॥२६॥

अष्टमः सन्देशः

(सङ्गीताभिनयादिललितकलानां बहुलप्रयोगाभावमुद्दिश्य)

इदमप्यपरं मुख्यं मम वैरस्यकारणम् ।
सुप्रीतिं यन्न पश्यामि ललितासु कलासु च ॥१॥
जीवनोन्नतये यथा विज्ञानं वाऽथ साहिती ।
यथैव हितकृन्नृणां तथैव सकला कला ॥२॥
यद्यत् सत्यतमं लोके यद्यत् शिवतमं तथा ।
तत् सौन्दर्यसुसम्पृक्तं कलाभिरुपलभ्यते ॥३॥
कलानिरहिता वाणी कलानिरहिता क्रिया ।
कलानिरहिता दृष्टिर् निष्फलैवेति मन्यताम् ॥४॥
अत एव पुरा जातैर्भारतीयैर्मनीषिभिः ।
कलानां विषये ग्रन्था लिखिता बहवोऽभवन् ॥५॥†
परं पण्डितलोकेषु वृद्धेषु तरुणेषु वा ।
कलाविषयिणी प्रीतिः प्रायशो नाऽवलोक्यते ॥६॥

※ हिन्दी प्राकृत व्याकरण, आचार्य मधुसूदन प्रसाद मिश्र ।
पालि व्याकरण, भिक्षु धर्मरक्षित ।

† अवलोक्यतां "कुट्टनीमते" प्रारम्भ एव तत्कर्तुः श्रीदामोदरगुप्तस्य वचनम्, तथा The Kalas (By A venkatsubbiah) इतिनामक कलाविषयको निबन्धश्च ।
तथा हि—

अन्या कला विहीयन्ता पद्यपाठे मनोरमे ।
सङ्गीतेऽभिनये चापि न कापि रुचिराप्यते ।।७।।
यद्येतास्वपि रम्यासु कलासु सकला बुधा ।
बद्धादरा भवेयुश्चेत् प्रमोदो मे महान् भवेत् ।।८।।
बाहुल्यं छन्दसां, तेषां संगीतात्मकता तथा ।
पदानामथ लालित्यम्, रम्यानुप्रासयोजना ।।९।।—
इमाः संस्कृतपद्यानां बह्व्यः सन्ति विशेषताः ।*
भूतलस्यान्यभाषासु प्रायशो याः सुदुर्लभाः ।।१०।।
श्रीमच्छङ्करपादानां विपुलाः पद्यराशयः ।
मूकपञ्चशती चापि कृतिर्मूकमहाकवेः ।।११।।
श्रीजगद्धरभट्टस्य स्तुतीनां कुसुमाञ्जलिः ।
वेदान्तदेशिकस्यापि स्तुतयस्ता मनोहराः ।।१२।।
नारायणीयं ललितं [illegible] मनोरमा ।
स्तोत्रं श्री[illegible] सौन्दर्यलहरी तथा ।।१३।।
श्रीमत्पण्डितराजस्य ललिताः कृतयोऽखिलाः ।
आर्यापद्यानि भूयांसि सरसं शिवताण्डवम् ।।१४।।
विविधा विरुदावल्यः श्रीकृष्णाह्निककौमुदी ।
हरिरायस्य पद्यानि गोपीगीतादिकं तथा ।।१५।।
एवमन्यैश्च रच्यन्ते बहुपद्यानि सूरिभिः ।
तानि सर्वाण्यपूर्वाणि सन्तु विश्ववाङ्मये ।।१७।। †
छन्दांसीमानि तेषां च ध्वनिमत्यन्तमद्भुतम् ।
मन्येऽहं रचितान्यत्र मञ्जुमञ्जीरशिञ्जितम् ।।[illegible]।।
यदि तादृशपद्यानि पठेयुर्मधुरं स्वरैः ।
तदात्मनः परेषां च प्रमोदः सुमहान् भवेत् ।।१९।।

---

* [illegible] । [illegible] ।

† [illegible] प्रकाशितानि ' [illegible] मन्दिर की [illegible] ।

ललितानि पदान्येन श्रुत्वा मोमुद्यते मन ।
यदि सुस्वरयोग स्यात्तदाऽनन्दस्य का कथा ॥२०॥
पर सस्कृतपद्याना पाठस्य मधुरै स्वरै ।
तीव्राकाङ्क्षा व्यवस्था वा न कुत्राप्यवलोक्यते ॥२१॥ ❀
पद्यगन्धीनि गद्यानि दण्डकाख्यानि सस्कृते ।
यान्यनेकानि वर्तन्ते तान्यलभ्यानि भूतले ॥२२॥
तेषा निर्झरधारेव प्रवाहोऽतिमनोहर ।
सस्मित विस्मित चापि न कस्य कुरुते मुखम् ॥२३॥
मदुरानगरस्थाभ्यो बालिकाभ्य श्रुत मया ।
श्यामलादण्डक हृद्य नाद्यापि खलु निस्सृतम् ॥२४॥
न च केवलपद्यानि केवल दण्डकानि वा ।
गद्यान्यपि स्वरैर्हृद्यै शक्यन्ते पठितु सुखम् ॥२५॥
सस्कृतच्छात्रनिलये बैंग्लोरनगरस्थिते ।
छात्र्या कयाचिदश्रौष गद्य गीत मनोहरम् ॥२६॥
एतादृशानि वस्तूनि चमत्काराणि जीवने ।
बहुभि पण्डितैर्जाने नाऽधीतानि श्रुतानि वा ॥२७॥
दाक्षिणात्येषु विद्वत्सु औत्कलेष्वपि केषुचित् ।
दृश्यते रुचिरा काचित् पद्यपाठस्य पद्धति ॥२८॥
पर नान्यप्रदेशेषु व्यापिनी काऽपि तादृशी ।
रीति प्रचलिता दृष्टा पद्यपाठस्य शोभना ॥२९॥
श्रीवीरराघवाचार्य स तु धन्यो विदा वर ।
पद्य यद्वदनाच्छ्रुत्वा नरो विस्मयमावहेत् ॥३०॥
श्रुत्वा हृद्यतम पाठ श्रीमल्लक्ष्मणशास्त्रिणाम् ।
के विमुग्धा न जायन्ते मानिनोऽपि बुधा अहो ॥३१॥
अथ विश्वनाथदासस्य पद्यपाठनपद्धति ।
श्रूयता कीदृशी रम्या सरसाऽमृतवर्षिणी ॥३२॥

❀ उत्तमरूपेण पद्यपाठसम्बन्धे काव्यमीमासाया सप्तमोऽध्यायो द्रष्टव्य ।

कालीप्रसाद प्रणयी बदरीनाथपण्डित ।
श्रीशो रुद्र प्रभातश्च काशिनाथ त्रिनाथकौ ॥४३॥
एभि स्वनिर्मितै रम्यै रचनाकुसुमोत्करै ।
वाग्देव्या गीतिकोद्यान शोभित सुरभीकृतम् ॥४४॥
एतेषा कजली होली दादरा ठुमरी गजल् ।
मोहयन्ति न वा केषा हृदयानि सचेतसाम् ॥४५॥
किन्तु दौर्भाग्यदोषेण लेसकाना निजस्य वा ।
नवगीतामृत नैतत् स्वदित बहुभिर्बुधै ॥४६॥
एव दक्षिणदेशीयैर् दीक्षिताद्यै कवीश्वरै ।
कीर्तनानि व्यरच्यन्त कमनीयानि भूरिश ॥४७॥
नवीनेष्वपि केषाञ्चित् चिदम्बरनिवासिनाम् ।
रम्याणि कानिचिद् गीतान्यश्रूयन्त स्वय मया ॥४८॥
एतेषा दाक्षिणात्याना गीताना काचिदद्भुता ।
भव्या कार्णाटकी शैली न कस्य हृदय हरेत् ॥४९॥
परन्तु तेषा गीतानामपि पण्डितमण्डले ।
वेत्तारो गायका नापि विरलत्व गता इव ॥५०॥
अथ पद्येषु गीतेषु विदुषां चेदिय दशा ।
तदा किमु नु वक्तव्य नाट्यस्य विषये पुन ॥५१॥
नाट्य तु सर्ववेदेभ्यो ब्रह्मणा प्रकटीकृतम् ।
ऋषिभिर्मुनिभिश्चापि प्रयुक्त भरताज्ञया ॥५२॥[1]
न च धर्मविरोधीद न चाकीर्तिकर पुन ।
न च बुद्धिहर चापि का हानिर्नाटके तत ॥५३॥[2]
नाट्य गीत च वाद्य च त्रय वेदोपम स्मृतम् ।
जपादिसदृश पुण्य भरतस्य वचो यथा ॥५४॥
विनोदोऽपि भवेन्नून शिक्षया सह धर्म्यया ।
भाषाज्ञान प्रवर्द्धेत लोके ख्यातिर्भवेत्तथा ॥५५॥

१–२–अवलोक्यता नाट्यशास्त्रस्य सम्पूर्ण प्रथमोऽध्याय ।
३—अवलोक्यता नाट्यशास्त्रस्य ३६तम अध्याय ।

श्रीमदानन्दझोपाह्वविदुषा नन्दनोद्गता ।
श्लोकाः कुर्वन्ति सानन्दान् लोकान् शोकयुतानपि ॥३३॥
करुणारससम्पूर्णाः श्लोका आनन्दशालिनाम् ।
तरूणामपि शुष्काणां कुर्युः सरसतां खलु ॥३४॥
एवं संस्कृतगीतानां गाने वा शिक्षणेऽपि वा ।
सङ्कुचन्तो विलोक्यन्ते बहवः पण्डिता भृशम् ॥३५॥
एषा सङ्गीतविद्या तु भवतामेव पूर्वजैः ।
ऋषिभिर्मुनिभिश्चापि प्रापिता परमान्नतिम् ॥३६॥
स्वयं सायण आचार्यः स महान् वेदवारिधिः ।
प्रेरयत्यात्मनः पुत्रं प्रीत्या सङ्गीतशिक्षणे ॥३७॥*
अतः श्रीजयदेवाद्यैरनेकैः कविपुङ्गवैः ।
रचितानि मनाज्ञानि बहुगीतानि संस्कृते ॥३८॥
गीतगोविन्दगीतानामपूर्वा पदमाधुरी ।
कोमला ललिता कान्ता दिगन्तमुपागता ॥३९॥ †
परं तादृशगीतानां गाने वा सङ्ग्रहेऽपि वा ।
विरला एव विद्वांसो दृष्टाः पौरकरत्नशालिनः ॥४०॥
एवमेव च भूयोभिः कविभिर्नूतनैरपि ।
नव्येषु लयतालेषु लिखिता गीतयोऽद्भुताः ॥४१॥
भारते दुर्हरिश्चन्द्रस्तथा श्री कमलेशझा ।
भट्टश्रीमथुरानाथो जानकीवल्लभस्तथा ॥४२॥

* यथा अलङ्कारसुधानिधौ पठ्यते—
तत् सव्यञ्जन कम्पण व्यसनिनं सङ्गीतशास्त्रे तथा
प्रौढिं मायण गद्यपद्यरचनापाण्डित्यमुन्मुद्रय ।
शिक्षां दर्शय शिङ्गण क्रमजटाचचासु वेदेष्विति
स्वान् पुत्राननुलालयन् गृहगतः सम्मोदते सायणः ॥
(कम्पण मायण शिङ्गणश्चेति सायणाचार्यस्य त्रयः पुत्रा आसन्)

† अवलोक्यतां गीतगोविन्दस्य "Indian song of songs" इति नामके आङ्गलपद्यानुवादात्मके [पुस्तके Sir Edvin Arnold विरचिते] तस्य भूमिकाभागः ।

कालीप्रसाद प्रणयी बदरीनाथपण्डित ।
श्रीशो रुद्र प्रभातश्च काशिनाथ त्रिनाथकौ ॥४३॥
एभि स्वनिर्मितै रम्यै रचनाकुसुमोत्करै ।
वाग्देव्या गीतिकोद्यान शोभित सुरभीकृतम् ॥४४॥
एतेषा कजली होली दादरा ठुमरी गजल् ।
मोहयन्ति न वा केषा हृदयानि सचेतसाम् ॥४५॥
किन्तु दौर्भाग्यदोषेण लेखकाना निजस्य वा ।
नवगीतामृत नैतत् स्वदित बहुभिर्बुधै ॥४६॥
एव दक्षिणदेशीयैर् दीक्षिताद्यै कवीश्वरै ।
कीर्तनानि व्यरच्यन्त कमनीयानि भूरिश ॥४७॥
नवीनेष्वपि केषाञ्चित् चिदम्बरनिवासिनाम् ।
रम्याणि कानिचिद् गीतान्यश्रूयन्त स्वय मया ॥४८॥
एतेषां दाक्षिणात्याना गीताना काचिदद्भुता ।
भव्या कार्णाटकी शैली न कस्य हृदय हरेत् ॥४९॥
परन्तु तेषा गीतानामपि पण्डितमण्डले ।
वेत्तारो गायका वापि विरलत्व गता इव ॥५०॥
अथ पद्येषु गीतेषु विदुषा चेदिय दशा ।
तदा किमु नु वक्तव्य नाट्यस्य विषये पुन ॥५१॥
नाट्य तु सर्ववेदेभ्यो ब्रह्मणा प्रकटीकृतम् ।
ऋषिभिर्मुनिभिश्चापि प्रयुक्त भरताज्ञया ॥५२॥ [1]
न च धर्मनिरोधीद न चाकीर्तिकर पुन ।
न च बुद्धिहर वापि का हानिर्नाटके तत ॥५३॥ [2]
नाट्य गीत च वाद्य च त्रय वेदोपम स्मृतम् ।
जपादिसदृश पुण्य भरतस्य वचो यथा ॥५४॥
विनोदोऽपि भवेन्नून शिक्षया सह धर्म्यया ।
भाषाज्ञान प्रवर्द्धेत लोके ख्यातिर्भवेत्तथा ॥५५॥

१-२—अवलोक्यता नाट्यशास्त्रस्य सम्पूर्ण प्रथमोऽध्याय ।
३—अवलोक्यता नाट्यशास्त्रस्य ३६तम अध्याय ।

संस्कृते गीतनाट्यानां प्रचारेण स्थले स्थले ।
अपि संस्कृतभाषाया: प्रचारो विपुलो भवेत् ॥५६॥
एष्वनेकेषु लाभेषु निश्चितेष्वपि पण्डितै: ।
रुचिर्यथोचिता तत्र औत्सुक्यं वा न दृश्यते ॥५७॥
आङ्गलहिन्दीविदो नैके विद्वांस: सुप्रतिष्ठिता: ।
रमन्तेऽभिनये कामं लभन्ते च यशो बहु ॥५८॥
परं पण्डितलोकास्तु स्वतोऽभिनयकर्मणि ।
लज्जया न प्रवर्त्तन्ते प्रेरिता: प्रार्थिता अपि ॥५९॥
एवं कलाभिरेताभी रहिता बहवो बुधा: ।
नयन्ति जीवनं स्वीयं नीरसं शुष्ककाष्ठवत् ॥६०॥
अतएव च भूयोभि: सामाजिकजनैश्चिरात् ।
संस्कृतं नीरसं मत्वा सुदूरादपवर्जितम् ॥६१॥
तस्मात् संस्कृतभाषाया: प्रचारसमयेऽधुना ।
कार्यो ललितवस्तूनां प्रसार: परमादरात् ॥६२॥
श्लाघनीय: स मे काशीकृष्णाचार्यो विशेषत: ।
साहित्येन समं यस्य प्रावीण्यं गीतवाद्ययो: ॥६३॥
शिमलापाठशालाया धन्यास्तेऽध्यापकास्तथा ।
ये सर्वेऽपि मया दृष्टा उत्कृष्टा गीतवाद्ययो: ॥६४॥
तां ब्राह्मणसभां मन्ये धन्यां मुम्बापुरीस्थिताम् ।
नाटकान्यभिनीयन्ते सुबहूनि यया सदा ॥६५॥
धन्यास्तेऽपि च विद्वांसो वटपत्तनवासिन: ।
साहित्ये चापि सङ्गीते येषामभिरुचि: समा ॥६६॥
एवञ्चेत् सर्व एवापि ध्यानं दद्यु: सुधीजना: ।
आयासेन विना भाषाप्रचार: परितो भवेत् ॥६७॥
तदा तु भवतां छात्रा अपि सन्त्रासवर्जिता: ।
नि:सङ्कोचं प्रवर्तेरन् कलासु सकलास्वपि ॥६८॥
अतो हे विबुधा: सर्वे ! लज्जां त्यक्त्वा पुरातनीम् ।
सोत्साहं सज्जितैर्भूत्वा रङ्गमञ्चेऽवतीर्यताम् ॥६९॥

पद्यानामथ गीताना नाटकानां तथैव च ।
विधाय सम्यगभ्यासं निर्गच्छतु गृहाद्बहि ॥७०॥
श्राव्यन्तां साधु पद्यानि गीयन्ता चारु गीतिका ।
नाटकान्यभिनीयन्ता ग्रामे ग्रामे स्थले स्थले ॥७१॥
स्थाप्यतां पाठशालासु सभा सङ्गीतनाट्ययो ।
अभ्यस्यन्ता सुपद्यानि अन्विष्यान्विष्य सर्वत ॥७२॥
बालका बालिका नार्य शिष्या स्वप्रतिवेशिन ।
शिक्षयन्ताञ्चाखिल सर्व नटनर्तकगायका ।७३॥
आकाशवाणीद्वाराऽपि यथैतदधिकाधिकम् ।
भवेत् प्रचारित सम्यक् तथा यत्नो विधीयताम् ॥७४॥
साहित्यसङ्गीतकला —रहितो यो हि मानव ।
स च साक्षात् पशुर्ज्ञेय शृङ्ग पुच्छ-विवर्जित ॥७५॥
इद भर्तृहरेर्वाक्य ज्ञात्वाऽपि यदि पण्डिता ।
सङ्गीतादीन्युपेक्षन्ते ततो हास्यकर नु किम् ॥७६॥
सकलासु कलास्वासु तस्मात् सस्कृतपण्डितै ।
देववाणीप्रचाराय चारु नैपुण्यमर्ज्यताम् ॥७७॥
एव हास्यविनोदाय सर्वेषा रञ्जनाय च ।
विद्यते बहुसामग्री हृद्या सस्कृतवाङ्मये ॥७८॥
क्षेमेन्द्ररचिता ग्रन्था नीलकण्ठकृतिस्तथा ।
भोजप्रबन्धो भाणाश्च पलाण्डुविजयस्तथा ॥७६॥
अथो लोलिम्बराजस्य श्रीगुमानीकवे कृति ।
हास्यार्णवो भरटकद्वात्रिंशी रासभाष्टकम् ॥८०॥
धूर्ताख्यान मनोहारि जातकाना कथास्तथा ।
काव्यादीना तथा भागा हास्यव्यङ्ग्ययादिसयुता ॥८१॥
स्फुटा हास्यरसश्लोका विनोदिन्य कथास्तथा ।
विदूषकप्रसङ्गाश्च तथा नाना प्रहेलिका ॥८२॥
एतादृश सुविपुल वस्तुजात मनोरमम् ।
रञ्जन लोकचित्ताना पर्याप्त खलु सस्कृते ॥८३॥

यदि तेषा भवेज्ज्ञान प्रयोगोऽपि यदा तदा ।
विनोदेन सम भाषाप्रचारोऽपि भवेद् ध्रुवम् ॥८४॥
पर तादृशवस्तूना सग्रहे वाऽनुशीलने ।
प्रमुखा अपि विद्वासो विमुखा अवलोकिता ॥८५॥
अतो हास्यरसश्लोकान् सुसगृह्य यतस्ततः ।
स्वसमाजे परत्रापि तत्प्रचारो विधीयताम् ॥८६॥
हसनीय स्वय चैव हासनीयास्तथा परे ।
नहि हास्ये विनोदे वा दोषो भवति कश्चन ॥८७॥

काम कर्कशतर्कशास्त्रगहने गर्जन्तु नो मे घृणा
काम व्याकरण रटन्तु कठिन तेनापि दुःख न मे ।
सङ्गीताभिनयादिकोमलकलालीलाविलासैरपि
स्वात्मान च पर च किन्तु रमयन्त्वेषा मदीया स्पृहा ॥८८॥ ॐ

नवमः सन्देशः

(अन्यभारतीयभाषाणामध्ययने उत्कण्ठाभावमुद्दिश्य)

इदमन्यतमच्चैक विज्ञेय भो ममाप्रियम् ।
य मदीयासु पुत्रीसु बुधा प्रीति न कुर्वते ॥१॥
सर्वासामपि मातॄणा कन्या प्रियतमा मता ।
यदि तासामुपेक्षा स्यात् कथ मातुः प्रिय भवेत् ॥२॥
भारतस्य तु या सर्वा भाषा एता अनेकश ।
प्रचलन्ति प्रदेशेषु ता सर्वा मम कन्यका ॥३॥

ॐ विख्यातनैयायिकै श्री रघुनाथशिरोमणिभिस्तु अस्मिन् विषये किञ्चिदितो ऽप्यधिकमुक्तम् । यथा—

पठन्ति कतिचिद्धठात् ख फ छ ठेति वाच शठा
घट पट इतीतरे पटु रटन्ति नैयायिका ।
वय वकुलमञ्जरी गलदपार माध्वीकधू—
र्धुरीणपदरीतिभिर्युवतिभिर्विनोदामहे ॥

नवद्वीप महिमा (बगला) पृष्ठ १४१

उत्तरस्य तु भागस्य या भाषा सन्ति भूरिशः ।
कन्यात्वे ननु वक्तव्यं तासां किन्तु विशेषतः ॥४॥[1]
परं दक्षिणभागेऽपि या भाषाः सन्ति ता अपि ।
मयैव निजपुत्रीवत् पोषिता परिवर्धिताः ॥५॥[2]
आसां तमिलभाषैका न मां स्निह्यति यद्यपि ।
तथापि मम भावस्तु तस्यामपि न भेदभाक् ॥६॥
एतासां कीदृशं रूपं कीदृशी च दशाऽधुना ।
भाषायामथ साहित्ये का वा कस्या विशेषता ॥७॥
एतत्सर्वमपि प्रीत्या ज्ञेयं संस्कृतपण्डितैः ।
एकैकाऽप्यपरा भाषाऽभ्यसनीया तथैव तैः ॥८॥
अभ्यासेऽन्योन्यभाषाणां प्रवर्तेरन् बुधा यदि ।
भवेद् बहुविधो लाभस्तेषां देशस्य चाऽधुना ॥९॥
भाषाज्ञानं प्रवर्धेत प्रीतिः परिचयस्तथा ।
सङ्कीर्णता विनश्येच्च प्रवासे च सुखं भवेत् ॥१०॥
सम्पूर्णेऽप्यधुना देशे दक्षिणोत्तरयोस्तथा ।
ऐक्यार्थं विकलाः सन्ति सर्वे राष्ट्रहितैषिणः ॥११॥
यदि संस्कृतविद्वद्भिर्दक्षिणोत्तरवासिभिः ।
इतरेतरभाषाणां ज्ञानं सम्पाद्यतेऽधुना ॥१२॥
तदा राष्ट्रस्यैकताया इतिहासे मनीषिणाम् ।
स्वर्णाक्षरैर्विलिख्येरन्नभिधेयानि सादरम् ॥१३॥
अथ संस्कृतशब्दानां बाहुल्याद् विदुषां कृते ।[3]
अन्यभाषापरिज्ञानं सर्वथा सुकरं खलु ॥१४॥

१—उत्तरभारतस्य भाषाः—बँगला, उड़िया, आसामी, मराठी, गुजराती, मैथिली, सिन्धी, हिन्दी, राजस्थानी, कश्मीरी प्रभृतयः ।

२—दक्षिणभारतस्य भाषाः—तमिल (मद्रास), तेलगू (आन्ध्र), कन्नड (कर्णाटक), मलयालम (केरल) प्रभृतयः ।

३—एतद्विषये विशेषपरिज्ञानाय उदाहरणानामवलोकनाय च कार्यालयद्वारा प्रकाश्यमानः "संस्कृत और भारतीय भाषायें" इतिनामको निबन्धो द्रष्टव्यः ।

आसाञ्च गद्यपद्याना हृद्यानां भिन्नरूपिणाम् ।
भवेदध्ययनान्नून विनोद॰ सुधिया महान् ॥१५॥
केरल्या गद्यपद्यानि अधीयेरन् बुधैर्यदि ।
नून मुग्धा भवेयुस्ते वाक्ये वाक्ये पदे पदे ॥१६॥
मणिप्रवालशैली सा केरलीया मनोरमा ।*
मन कस्य रसज्ञस्य प्रसभ न हरेदहो ॥१७॥
एवमान्ध्री च कार्णाटी सुरभाषोपबृंहिता ।†
कस्य वा संस्कृतज्ञस्य हृदय नैव मोहयेत् ॥१८॥
आन्ध्रभागवत भव्य कलापूर्णोदयस्तथा ।
शृङ्गारनैषध नाम मनोश्वग्तिमेव च ॥१९॥
अमुक्तमाल्यदाधाश्च य थास्तेलगुभाषया ।
लिखिता कीदृशा रम्या अहो पीयूषवर्षिण ॥२०॥
कचित् कचिदिय भाषा संस्कृतस्यापि सौष्ठवम् ।
अतिशेत इति द्रष्टु शक्य भागवते यथा ॥२१॥
एव कर्णाटभाषाया॰ कविपपादिनिर्मिता ।
कृतय कमनीयत्वे नितरामसृतोपमा ॥२२॥
संस्कृतज्ञैर्यदीमानि नाधीतानि श्रुतानि वा ।
तदा नूनमह मन्ये एतान् सौभाग्यवञ्चितान् ॥२३॥
अन्या तमिलभाषा तु संस्कृतस्याप्रयोगत ।
अल्पत्वाच्चापि वर्णाना शिक्षणे विकटा खलु ॥२४॥

* संस्कृतभाषाया सुबन्ततिङन्तपदै समन्वितया केरलीयभाषया निब गद्यपद्यमयी रचना मणिप्रवालमित्युच्यते । इमा शैलीमवलम्ब्य केरली कविभिर्बहूनि काव्यानि विरचितानि ।
अस्मिन् विषये विशेषपरिज्ञानाय "प्राचीन मणिप्रवालम्" इति नाम मलयालमभाषाया निबन्ध श्री पी॰ के॰ नारायण पिल्लै महोदयप्रणी द्रष्टव्य ।

† आन्ध्रभाषाया कर्णाटकभाषायाश्च प्राचीने साहित्ये प्राय सर्वेऽपि ग्र संस्कृतशब्दबहुला सन्ति । वर्तमानसाहित्येऽपि इय शैली सर्व परिहृता नास्ति ।
एतादृशा॰ सर्वे ग्रन्था कार्यालये आगत्य एकत्रैव द्रष्टु शक्यन्ते ।

अस्यास्तथापि भाषाया पूर्णं प्राचीनमेव च ।
विशाल किल साहित्य नून दृश्य मनीषिभि ॥२५॥
अथास्या· खलु भाषाया निसर्गमधुरा गिर· ।
श्रोतु श्रुतिपुटे नून भरति मधुर मधु ॥२६॥
एवमेव महाराष्ट्रया मोरोपन्तादिनिर्मिता ।
अद्भुता कृतयोऽस्य द्रष्टव्या रसिकैर्बुधै ॥२७॥
अथ वङ्गीयभाषाया सौन्दर्यं केन वर्ण्यताम् ।
यत्र साक्षाद् रवीन्द्राद्या वन्द्या विश्वकवीश्वरा ॥२८॥
अस्यान्तु खलु भाषाया यावनीषु कृतिष्वपि ।
वहु सस्कृतशब्दाना सुल॥ ललितावलि ॥२९॥*
अथ मैथिलभाषाया विद्यापतिपदावली ।
कीदृशी ललिता रम्या मधुरा मधुवर्षिणी ॥३०॥
श्रोतव्या कविसूर्यस्य पठिता कृतयो यदि ।
नून प्रफुल्लितानि स्युर्हृत्पद्मानि मनीषिणाम् ॥३१॥
एव गुर्जरभाषाया वीटादकरनिर्मिता ।
कस्य नो हरते चेतो ललिता कवितावलि ॥३२॥
एव सर्वा इमा भाषा भारतीया मनोहरा ।
तास्वेका वाऽधिका वापि ज्ञेया नून मनीषिभि ॥३३॥
अष्टादशाना भाषाणा ज्ञातारो यत्र वाऽभवन् । †
छात्राणां शिक्षणे तत्र सन्त्रासो नु कथ भवेत् ॥३४॥
देवनागरलिप्याश्चेत् प्रयोगो विपुलो भवेत् ।
अन्यभाषापरिज्ञान नितान्त सरल भवेत् ॥३५॥§

---

* यथा श्री नजरुल इस्लाम प्रभृतियवनकवीना रचनासु ।

† यथा साहित्यदर्पणकारो विश्वनाथ स्वग्रन्थ आत्मान बहुधा "अष्टादशभाषावारविलासिनीभुजङ्गम" इति विशेषयति ।

§ अस्मिन् विषये "भारतीय भाषायें तथा देवनागरी लिपि" इति नामक कार्यालयाल्लभ्य लेखकप्रणीत पुस्तकमवलोकनीयम् ।

अत सम्भूय विद्वद्भि सर्वैर्भारतवासिभि ।
तदर्थमपि कर्तव्य प्रयत्नो विपुल सदा ॥३६॥
एषा संस्कृतभाषा च तथैषा नागरी लिपि ।
एतद् द्वयं भारतस्य दृढमेकत्वसाधकम् ॥३७॥
उभयोरेतयोर्देशे प्रचारे यदि पण्डिता ।
निरता स्युस्तदा लाभो देशस्य सुमहान् भवेत् ॥३८॥
अथ चैतासु भाषासु द्विज्ञाणामपि शिक्षणात् ।
विदुषामपरोऽप्येको महान् लाभो भविष्यति ॥३९॥
आसु प्रान्तीयभाषासु तत्तद्भाषामनीषिभि ।
लेखा संस्कृतसम्बन्धे लिखिता बहवोऽद्भुता ॥४०॥
पठेयुस्तानपि ग्रन्थान् यदि संस्कृतपाठका ।
तेषा सस्कृतसम्बन्धि ज्ञान स्यादधिक तत ॥४१॥
पश्यन्तु वङ्गभाषाया रवीन्द्रेण कवीन्दुना ।
कति संस्कृतसम्बन्धे सुनिबन्धा प्रकाशिता ॥४२॥
सर्वं प्राचीनसाहित्य कालिदासकृतीस्तथा ।
कादम्बरीं तथालम्ब्य रसधारा प्रवाहिता ॥४३॥
श्री श्रीहरप्रसादेन शास्त्रिणैकेन केवलम् ।
कालिदासीयकाव्येषु लिखिता लेखराशय ॥४४॥*
श्रीमद्गुरुपदाख्येन हाल्दारेण मनीषिणा ।
कीदृग् व्याकरणेऽपूर्वो निबन्धो लिखितो महान् ॥४५॥
संस्कृतज्ञेन येनैते ग्रन्था नैवावलोकिता ।
मन्ये, संस्कृतसाहित्यरसादेभ्यस्ते नु वञ्चिता ॥४६॥
एव सस्कृतसम्बन्धे भाषासु निखिलास्वपि ।
मननीयनिबन्धाना प्राचुर्यं चारु विद्यते ॥४७॥
अत संस्कृतविद्वद्भिरन्या भाषाश्च काश्चन ।

* अवलोकयतां वङ्गभाषाया "वसुधारा" मासिक पत्रिकाया "हरप्रसाद शास्त्री श्रो कालिदासेर व्याख्या" इति शीर्षकेण प्रकाशितो निबन्ध ।
(अक्टूबर, नवम्बर १९६०)

दृष्ट्वा बहुविधान् लाभानभ्यस्यन्ता नरा नवा' ॥४८॥
एवमेवाग्लभाषाया फ्रेञ्चजर्मनभाषयो ।
तथा रूसीयभाषाया अप्यध्ययनमिष्यते ॥४९॥
एतासु खलु भाषासु वैदेशिकमनीषिभि ।
ये ये ग्रन्थास्तथा लेखा लिखिता उत्तमोत्तमा' ॥५०॥ ※
यान्यो ते विलोक्यन्ते नहि सस्कृतपण्डितै ।
तेषामध्ययन तावत् पूर्णं मन्तु न शक्यते ॥५१॥
अहो तपस्विता तेषामहो पुरुषकारिता ।
अहो विद्यानरागश्च तेषां त्रिभुवनोत्तर' ॥५२॥
यदेतैर्भारतीयाया विद्याया सस्कृतेस्तथा ।
नहि क्षुद्रतमोऽप्यश कश्चित्त्यक्तो विवेचने ॥५३॥
अत' सस्कृतविद्वद्भि सर्वैरपि वयोऽधिकै ।
काचिदेतासु भाषासु भाषैका शिक्ष्यता ध्रुवम् ॥५४॥
स्वस्वविषयसम्बद्धान् सर्वान् ग्रन्थानधीत्य च ।
पुनस्तत्र विधातव्या युक्तायुक्तविचारणा ॥५५॥
आग्ल्या तु भारतीयैरप्यनेकैर्मान्यपण्डितै ।
ग्रन्था सस्कृतसम्बन्धे निबद्धा बहवोऽद्भुता ॥५६॥
अथ शोधप्रधानासु पत्रिकास्वप्यहर्निशम् ।
बहुलेखा॰ प्रकाश्यन्ते पठनीया मनीषिभि ॥५७॥†

※ भारतीय भाषा साहित्य सस्कृति सम्बन्धे वैदेशिकभाषानिबद्धपुस्तकाना परिज्ञानाय निम्नाङ्कितस्थानाना सूचीपत्राणि द्रष्टव्यानि—

१—मोतीलाल बनारसी दास, पटना, वाराणसी, दिल्ली ।
२—चौखम्भा विद्याभवन, वाराणसी ।
३—ओरिएन्टल बुक एजेन्सी, पूना ।
४—भारतीय विद्याभवन, चौपाटी, बम्बई ।
५—अदयार लाइब्रेरी, अदयार, मद्रास ।

† सस्कृतसम्बद्ध शोधपत्रिकाणा विषये परिशिष्टभागो द्रष्टव्य ।

ते ते ग्रन्था निबन्धा वा ज्ञायन्ते नैव पण्डितै ।
इति मे रोचते नैव बहु कष्ट च जायते ॥५८॥
यदि ग्रन्था अधीयेरन्नेते सस्कृतपण्डितै ।
नून तेषा विनोद स्यात् ज्ञाने वृद्धिस्तथैव च ॥५९॥
काशीस्थे सुरभाषाया विश्वविद्यालयेऽधुना ।
कृता विदेशभाषाणा शुभा शिक्षणयोजना ॥६०॥
अत्र तिब्बत-बर्मीय-श्याम सिहल-देशजा ।
भाषा अपि यथाकाम शक्यन्ते शिक्षितु बुधै ॥६१॥
भाषास्वेतासु भूयासो बौद्धग्रन्था सुदुर्लभा ।
अनूदिता मौलिका वा लभ्यन्ते सुप्रकाशिता ॥६२॥
तेषामध्ययनार्थन्तु बौद्धवाड्मयपाठकै ।
एतासामपि भाषाणामभ्यास क्रियता ध्रुवम् ॥६३॥
एव चीनीयभाषाऽपि भाषाज्ञानाय पण्डितै ।
राजनैतिकदृष्ट्या च नून ज्ञेया विशेषत ॥६४॥
भाषाविज्ञानदृष्ट्या तु पठनीया मनीषिभि ।
अवेस्ता-फारसी-पस्तोभाषा अपि यथाबलम् ॥६५॥
आसुभाषास्वभ्र शान् सस्कृतस्य बहूनहो ।
दृष्ट्वा जायेत विदुषामानन्दो विस्मयस्तथा ॥६६॥ ❀
अथासा यदि भाषाणा सम्यग् ज्ञान न जायते ।
लिपिज्ञानन्तु कासाञ्चित् कार्यमेव सुनिश्चितम् ॥६७॥

किं पण्डिता अथ निशेषनिकरपजालै
सकल्प एष हृदये त्वरित विधेय ।

❀ एतदर्थं निम्नाङ्किता ग्रन्था अवलोकनीया —

१—फारसी में सस्कृत (भाषानुसन्धान भवन, देवरिया)
२—Comparative Grammar of the sanskrit, gend, Greek, latin etc
३—अवेस्ताभाषाया शब्दकोशा व्याकरण च ।

अद्यैव काऽपि च यथारुचि नव्यभाषा
आरभ्यतां यदि समीहितसाधनं स्यात् ॥

दशमः सन्देशः

(भाषणे लेखने वार्तालापादौ च पाटवस्याभावमुद्दिश्य)

इदं दृष्ट्वाऽपि मे लज्जा महती जायते हृदि ।
बहवो भाषणे लेखे पटवो न भवन्ति यत् ॥१॥
तादृशा एव भूयांस सन्ति संस्कृतपण्डिता[१] ।
भाषितुं लिखितुं हिन्द्यां संस्कृते वा न ये क्षमा ॥२॥
नाक्षराणि सुरम्याणि न भाषाऽशुद्धिवर्जिता ।
न वा मनोहरा भावा भवन्ति भवतामहो ॥३॥
बहूनां विदुषां लेखे नहूनामथ भाषणे ।
वार्तालापे बहूनां च देहकम्पः प्रजायते ॥४॥
बहूनां पण्डितानां तु तादृशी जायते दशा ।
यादृगासीत् कुरुक्षेत्रे दशा गाण्डीवधन्वनः ॥५॥
अभावाद् भाषणस्यापि अभावाल्लेखनस्य च ।
बहुकार्याणि सिद्ध्यन्ति यशश्च बहु जायते ॥६॥
परन्तु व्यवहारिक्याः शक्तेरस्या अभावतः ।
व्यवहारे महान्तोऽपि क्लिश्यन्ति बहुधा बुधाः ॥७॥
अनेन कारणेनैव शङ्किता भीतचेतसः ।
पण्डिता नाम्नतो यान्ति सभासम्मेलनादिषु ॥८॥
न वक्तुं लिखितुं सम्यक् न च बोधयितुं परान् ।
शक्ष्यन्ते पण्डितास्तेन प्रायस्तिष्ठन्ति पृष्ठतः ॥९॥
बह्वीनां पाठशालानामुत्सवेषु मयेक्षितम् ।
सभासञ्चालनं कर्तुं पारयन्ति न पण्डिताः ॥१०॥

१—मातृभाषाया उपलक्षणमेतत् ।

सस्थापरिचय दातु प्रस्तोतुमनुमोदितुम् ।
धन्यवाद प्रदातु वा न सम्यक् शक्नुवन्ति ते ॥११॥
बहु सस्कृतससत्सु अन्यभाषाविदो बुधा ।
प्रभाषन्ते, पर तत्र मूकास्तिष्ठन्ति पण्डिता ॥१२॥
सस्कृतस्यापि विषये सस्कृतस्यैव पण्डिता ।
भाषितु न क्षम ते चेत् कथ जीवन्ति ते बुधा ? ॥१३॥
यद्यपि प्रौढवक्तृत्व सर्वेषा नैव जायते ।
पर सामान्यशक्तिस्तु सर्वेषामप्यपेक्ष्यते ॥

अथ च—

अथ सस्कृतसम्बन्धे वृत्तपत्रेषु साम्प्रतम् ।
प्रकाश्या विविधा लेखा सुप्रचाराय पण्डितै ॥१४॥
परन्तु विषयाज्ञानात् लेखशक्तेरभावत ।
लघोरपि न लेखस्य लेखने पण्डिता क्षमा ॥१५॥
चिर जीवन्तु ते धन्या आङ्गलहिन्दीविदो बुधा ।
अन्यभाषाविदश्चैव वर्धन्तामुत्तरोत्तरम् ॥१६॥
ये निजप्रौढलेखन्या लेखान् मद्विषये बहून् ।
लिखित्वा वृत्तपत्रेषु मत्प्रचार वितन्वते ॥१७॥
पर पण्डितजीवास्तु पत्रमप्येकमुत्तमम् ।
लिखितु न क्षमा यत्र तत्र लेखस्य का कथा ॥१८॥
लेख-व्याख्यान-वार्तादौ पाटवस्योपलब्धये ।
निधय सन्ति भूयास प्रोक्ता सस्कृतवाङ्मये ॥१९॥
चरके चाऽर्थशास्त्रे च न्यायमन्थेषु भूरिषु ।
काव्यनाटकसाहित्य पुराणादिषु च स्फुटम् ॥२०॥ ❀

❀ यथा—

१—चरकसहिताया विमानस्थाने अष्टमोऽध्याय ।
२—कौटलीयार्थशास्त्रस्य अध्यक्षप्रचारे शासनाधिकरणे दशमोऽध्याय
३—महाभारतस्य शान्तिपर्वणि ३२५ तमोऽध्याय । (अग्रेऽपि)

परिडता वहवो, मन्ये, अर्थचिन्तातुरा सदा ।
योग्या अपि न लेखादौ प्रवर्तन्ते कदाचन ॥२१॥
पर ये तु लभन्तेऽद्य सहस्र वा शतानि वा ।
तै' कथ नहि लिख्यन्ते लेखा साधारणा अपि ॥२२॥
विदुषां लेखनाभावात् सस्कृतस्यापि पत्रिका ।
प्रायो लेखाय सीदन्ति कष्टान्यनुभवन्ति च ॥२३॥
एवञ्च सस्कृताचार्या लेखव्याख्यानदुर्बला ।
कारयन्त्युपहास मे सभासम्मेलनादिषु ॥२४॥
परिडता एव वर्तन्ते अयोग्या ईदृशा यदा ।
लेखव्याख्यानसामार्थ्य छात्रेषत्पद्यता कथम् ॥२५॥
अतो हे विबुधा सर्वे नवीनाश्च विशेषत ।
यत्नतामस्य दोषस्य नाशे शपथपूर्वकम् ॥२६॥
स्थाप्यतां वादसमिति चाल्यता पाक्षिकी सभा ।
शिक्ष्य ता निखिलाश्छात्रा वादव्याख्यानकौशलम् ॥२७॥
दीयता लेखने ध्यान छात्रैरध्यापकैस्तथा ।
पत्रिका हस्तलिखिता स्थाने स्थाने प्रकाश्यताम् ॥२८॥
एको लेख समीचीनो लघीयानपि परिडतै ।
लेखनीयो यथाशक्ति प्रतिमास निरन्तरम् ॥२९॥
हिन्दी सस्कृतपत्रेषु प्रेषणीयाश्च तेऽखिलाः ।
तदर्थञ्चान्वेष्यन्ता कतिचिन्नूतना पणा ॥३०॥
अथवा प्रेषणेऽशक्तौ आलस्ये वा गरीयसि ।
कार्यालये एव सर्वे लेखा प्रेष्या मनीषिभिः ॥३१॥

४—काव्यमीमासाया अनेकेऽध्याया ।
५—न्यायग्रन्थाना वादप्रकरणानि ।
६—स्कन्दपुराणस्य महेश्वरखण्डे ४५ तमोऽध्याय ।
८—श्री प० बलदेवमिश्र विरचित "गपसप विवेक" नामक मैथिली-भाषानिबद्ध पुस्तक यत्र सस्कृतग्रन्थाना बहूनि उद्धरणानि वर्तन्ते ।

अथ चक्तृत्वशक्तिञ्च लब्ध्वाऽभ्यासादनुत्तमाम् ।
*निर्धना अपि गर्जन्तु श्रीदामोदरभट्टवत् ॥३१॥**
यावच्छक्तिर्यमुखे नास्ति लेखशक्ति करे तथा ।
महामहोपाध्यायोऽपि स विद्वान् किं करिष्यति ॥३२॥

पूजापाठ-जपप्रयोग तिलककालङ्कार चर्चादिषु,
भूयास समय नयन्ति सुधिय स्वर्लोकलाभाशया ।
व्याख्यालेखनपाटवे पुनरिह प्रत्यक्षलाभप्रदे,
न ध्यान ददतीत्यहो मतिमतामेषा विचित्रा स्थिति ॥३३॥

एकादशः सन्देशः

(विद्यार्थिषु आवश्यकगुणाना तथाऽदर्शस्वरूपस्य चाभावमुद्दिश्य)

अथाप्यवगुणा केचिद् भवद्विद्यार्थिनामपि ।
हेतवो मम तु तेऽस्मिन् सदा चोद्वेगकारिण ॥१॥
न तेषु कश्चिदादर्शो नियमो वा विलोक्यते ।
ये यथैव समीहन्ते आचरन्ति तथैव ते ॥२॥
कञ्चुक चोटिकाहीन धौत निर्मुक्तबन्धनम् ।
शिर शिखासमाकीर्ण बटनामवलोक्यते ॥३॥

तमालभक्षणे केचित् केचित् केशप्रसाधने ।
केचिच्चाश्लीलगानेषु रमन्ते हन्त निस्त्रपम् ॥४॥
न सन्ध्या क्रियते सर्वै तिलक वा न धार्यते ।
वेषभूषादिके चापि परानुकरणे रता ॥५॥

---

* यथा केरलीयेन विदुषा दामोदरभट्टेन कस्याञ्चित् सभायां कथितम्—
नो छत्र, न तुरङ्गमो, न वदता वृन्दानि, नो वन्दिनो,
न श्मश्रूणि, न फालपट्टवसन, न ह्यम्बराडम्बरम् ।
अस्त्यस्माकममन्दमन्दरगिरि प्रोद्धूतदुग्धोदधि—
वेलावीचिपरम्परापरिणता वाणी तु नारायणी ॥
The contribution of Kerala to sanskrit literture पृ०८६

न व्यायामस्य नियमः क्रीडाकूर्दनयोर्न वा ।
दृश्यते पाठशालासु न च तत्साधनादिकम् ॥६॥
दैहिकोऽपि ततस्तेषां विकासो नैव जायते ।
हर्ष स्फूर्ति-समुल्लासा अपि नो दृष्टिगोचरा ॥७॥
राष्ट्रियेषु न कार्येषु न च सामाजिकेषु वा ।
समुत्साहोऽनुरागो वा दृश्यते तेषु कुत्रचित् ॥८॥
न व्याख्याने न वा लेखे मिलने स्वागतेऽपि वा ।
साधारणे वा वार्तादौ पाटवं नैव दृश्यते ॥९॥
बहुसंस्कृतशालासु भ्रमणावसरे मया ।
दृष्टा लुकायितारछात्रा वार्तालापभयादहो ॥१०॥
सन्तोषरहिता सर्वे सर्वे चाद्यनलोलुपा ।
सर्वे व्यग्रा विलोक्यन्ते समायाते निमन्त्रणे ॥११॥
स्वच्छता चापि वस्त्रादे स्थानादीनां परिष्कृतिः ।
पार्श्वभूमेश्च रम्यत्वं जायते नाक्षिगोचरम् ॥१२॥
विनयो गुरुशुश्रूषा सेवाभावो महीयसाम् ।
आदेशकारिता चैते गुणा अपि लयं गता ॥१३॥
येभ्य संस्कृतिरक्षाया आशा लोकैर्विधीयते ।
न तेषां व्यवहारेषु संस्कृतिः क्वापि दृश्यते ॥१४॥
केचिन्नितान्त प्राचीना केचिदत्यन्तनूतना ।
केचित्तु भयथा भ्रष्टाश्छात्रा दृष्टिपथं गता ॥१५॥
छात्रावासेषु तिष्ठत्सु छात्रेष्वपि मनोहरा ।
विशिष्टा नियमा केचिन्नास्माभिरवलोकिता ॥१६॥
एवं कश्चिद् गुणा , किञ्चिद् वैशिष्ट्य , काऽपि सभ्यता ।
किञ्चिदाकर्षणं वापि छात्रेषु न विलोक्यते ॥१७॥
अतस्ते लज्जिता भीता शङ्किता कुण्ठिता इव ।
स्वाभिमानविहीनाश्च दृश्यन्ते प्रायश सदा ॥१८॥
भवद्विद्यार्थिनामेतां दुरवस्थां विलोक्य मे ।
यादृशं जायते कष्टं वचसां तदगोचरम् ॥१९॥

इमामवस्था छात्राणामुच्चकक्षानुपामपि ।
दृष्ट्वा मदीय हृदय शतधा भिद्यते ननु ॥२०॥
देशोन्नतेर्महान् भारो येषामुपरि वर्तते ।
आदर्शो ये च लोकस्य अहो तेषामिय दशा ? ॥२१॥
जीविष्यन्ति कथन्त्वेते सुखसम्मानपूर्वकम् ।
सङ्घर्षयुग एतस्मिन्निति चिन्ता गरीयसी ॥२२॥
अत केनापि कल्पेन तथा यत्नो विधीयताम् ।
यथाप्नुयुर्भवच्छिष्या सर्वाङ्गीणा समुन्नतिम् ॥२३॥

तथा च—

छात्रा यद्यपि लभ्यन्ते केचिद् योग्यतमा अपि ।
पर तादृशछात्राणा सख्या नैव महीयसी ॥२४॥
अथ ये खलु दृश्यन्ते छात्रा केचिद् भविष्णव ।
तेऽपि प्रोत्साहनाऽभावात् उत्कर्ष प्राप्नुवन्ति नो ॥२५॥
छात्राणा योग्यतावृद्ध्यै चित्तोत्कर्षाय वा पुन ।
योजना वा प्रयत्नो वा न कश्चिदवलोक्यते ॥२६॥
"मूर्खा एव तु सर्वेऽपि दीना हीनास्तथैव च ।
पठितु पाठशालासु छात्रा आयान्ति, नोत्तमा ॥२७॥"
इत्येषाऽपि मया चर्चा सर्वेषा विदुषा मुखात् ।
श्रूयते हन्त यच्छ्रुत्वा शरीर ज्वलतीव मे ॥२८॥
अभव्यैरीदृशैर्भावै हीनै सम्बोधनैस्तथा ।
नीयन्ते हीनताभाव छात्रा विद्वद्वरै स्वयम् ॥२९॥
अनेनैव च दोषेण छात्रैर्योग्यतमैरपि ।
आत्मनो विषये किञ्चिद् गौरव नानुभूयते ॥३०॥
तस्मादेतादृशान् भावान् दूरे कृत्वा मनीषिभि ।
उत्कर्षभावनाऽनेया विद्यार्थिषु लघुष्वपि ॥३१॥
नीच-मूर्ख-महामूर्ख-शठ-दुष्टेतिभाषणै ।
गालिभिश्चापि सम्बोध्याश्छात्रा नैव कदाचन ॥३२॥

तथा च यत्न कर्तव्यो यथा छात्रगणेऽखिले ।
आदर्शरूपता भव्या, आगच्छेदधिकाऽधिका ॥३३॥

तथा हि—

सुवेष स्वास्थ्यसम्पन्न सदाचारसमन्वित ।
विद्योतितललाटाङ्गो ब्रह्मचर्येण भास्वता ॥३४॥
सेवाऽतिथ्यादिके दक्ष स्वावलम्बी परिश्रमी ।
उच्चलक्ष्यो विनीतात्मा दम्भपाखण्डवर्जित ॥३५॥
अधीयमाने विषये सुयोग्य प्रतिभानवान् ।
संस्कृते मातृभाषायां लेख-व्याख्यानशक्तियुक् ॥३६॥
व्यवहारे सुनिपुण पत्राद्यैर्देशकालवित् ।
विषयाणां नवीनानामपि सामान्यवेदक ॥३७॥
मन्वादिधर्मशास्त्राणां वेदोपनिषदां तथा ।
आवश्यकज्ञानयुत परधर्मिकुचक्रवित् ॥३८॥
धर्माचारप्रचारार्थमुत्पन्नोऽस्मीति चिन्तक ।
सामाजिककुरीतीनां संस्कर्ताऽधर्मबाधक ॥३९॥
ग्रामे देशे विदेशेषु भारतीयार्यसंस्कृते ।
विश्वकल्याणकारिण्या प्रचारणपरायण ॥४०॥
कथं न पतनं जातमुन्नतिश्च कथं भवेत् ।
मयाऽत्र किमनुष्ठेयमितिचिन्तासमन्वित ॥४१॥
एतादृशानां छात्राणां निर्माणाय निरन्तरम् ।
सर्वाभि पाठशालाभि पूर्णयत्नो विधीयताम् ॥४२॥

अथ च—

भो भो विद्यार्थिन सर्वे युष्माकं क्व गता मति ।
अन्धीभूता यथा यूयं स्वहितं नैव पश्यथ ॥४३॥
दक्षिणाभिस्तथा दानै क्षेत्रे क्षेत्रेऽन्नभोजनात् ।
युगेऽस्मिन् भवतां वृत्ति कियत्कालं चलिष्यति ॥४४॥
अनेन च स्वभावेन तथा योग्यतयाऽनया ।
निर्वाहोऽसम्भवो नूनं प्रतिस्पर्धायुगेऽधुना ॥४५॥

लब्ध्वा सकुचित ज्ञान व्यवहारेऽपि दुर्बला ।
भीरवो भाषणे लेखे कथं कुत्र गमिष्यथ ॥४६॥
दृष्ट्वा देश तथा कालम् आत्मनोऽयोग्यता तथा ।
स्वयमेवात्मनिर्माणे यत्नश्छात्रैर्विधीयताम् ॥४७॥
"क काल कानि मित्राणि को देश कौ व्ययागमौ ।
कश्चाह का च मे शक्तिरिति चिन्त्य मुहुर्मुहु ॥४८॥"
इत्याचार्यवरस्यार्यचाणक्यस्य वचोऽमृतम् ।
धृत्वा मनसि लोकेऽस्मिन् वर्तितव्य विपश्चिता ॥४९॥
अस्मिन्नुदासते कार्ये यदि वो गुरवोऽलसा ।
भवद्भि स्वहित दृष्ट्वा स्वय यत्नो विधीयताम् ॥५०॥
भवन्त स्वीययत्नेन अर्जित्वा निखिलान् गुणान् ।
साधयन्तु समाजे स्व नून नागरिकोत्तमम् ॥५१॥
भविष्यस्य कृते चापि नैराश्य माऽवलम्ब्यताम् ।
सर्वदैव सुख सिद्धि योग्यानां श्रमिणा वृते ॥५२॥
महत्त्वेऽथ गते चाग्ल्या हिन्द्याश्चापि समागते ।
उत्कर्षो भविता नून भवता नाऽत्र सशय ॥५३॥
अतो भवद्भिर्योग्यत्व वैशिष्ट्य व्यवहारिता ।
अर्जनीया प्रयत्नेन निधाय दृढनिश्चयम् ॥५४॥
"सैनापत्य च राज्य च दण्डनेतृत्वमेव च ।
सर्वलोकाधिपत्य च वेदशास्त्रविदर्हति ॥५५॥"
इति य मनुना प्रोक्त तत्सर्व व्यवहारत ।
छात्रैरध्यापकैश्चापि चरितार्थ विधीयताम् ॥५६॥
अयोग्या सस्कृतच्छात्रा भवन्तीति जनश्रुति ।
मूलान्निर्मूलनीयाऽमु योग्यताया प्रदर्शनात् ॥५७॥
यथा च शिक्षया सार्द्ध तथा योग्यतया सह ।
सस्कृतिश्च समागच्छेत् तथा यत्नो विधीयताम् ॥५८॥
सस्कृतज्ञानसम्पन्ने नरनारीगणेऽखिले ।
इष्यते काऽपि सर्वोच्चा सभ्यता सस्कृतिस्तथा ॥५९॥

तस्मादध्यापकश्छात्रैरधिकारिभिरेव च ।
विषयेष्वेषु सर्वेषु ध्यान देय विशेषत ॥६०॥
अमूल्य जीवनञ्चेद छात्राणा राष्ट्रसम्पदाम् ।
नाशनीय न वा नश्यद् द्रष्टव्य मौनधारिभि ॥६१॥

विद्यार्थिनो यदि न हन्त भवन्ति निष्ठा
निद्यासु, शिष्टचरिता, व्यवहारदक्षा ।
कि तेन हन्त पठितेन किमु श्रमेण
विद्यालयेन किमु वा किमु पण्डितेन ॥६२॥ ❀

❀ १—अस्मिन् विषये कार्यालयात् "संस्कृतच्छात्राणा प्रतिज्ञा" "संस्कृतच्छात्राणा पालनीया सदाचारा" इत्यादिनामभि प्रकाशितानि पत्रकाण्यपि अवलोकनीयानि अवलम्बनीयानि च सर्वेषु विद्यालयेषु छात्रावासेषु च ।

२—वाराणसेयसंस्कृतविश्वविद्यालयस्य दीक्षान्तभाषणानि च पठनीयानि ।

देश-समाज-सेवाविषयकम्

चतुर्थं प्रकरणम्

प्रथमः सन्देशः

(धर्मप्रचारे सामाजिकदोषाणां निराकरणे च प्रवृत्तेरभावमुद्दिश्य)

इदं तु परमं दुःखं मन्यतां मम पण्डिताः ।
कार्यं धर्मप्रचारस्य यद् भवन्तो न कुर्वते ॥१॥
देशे धर्मप्रचारस्याऽधर्मनाशस्य चोभयोः ।
मुनिभिर्निखिलो भारो भवत्स्वेव प्रतिष्ठितः ॥२॥
या याः कुरीतयो देशे तथा याश्च कुरूढयः ।
तासां निवारणं यत्तु भवतामेव कर्म तत् ॥३॥
अयञ्चापि निजो धर्मो भवद्भिर्विस्मृतोऽधुना ।
अतः समाजे सर्वत्र धर्मह्रासो विलोक्यते ॥४॥

तथा हि—

आश्रमाणामव्यवस्था, विवाहो बालवृद्धयोः ।
कन्यानां विक्रयश्चापि, मादकद्रव्यसेवनम् ॥५॥
भिक्षादानमदीनेषु, साधुज्ञानमसाधुषु ।
पाखण्डिनां वञ्चकानां सम्मानश्चापि सर्वशः ॥६॥
मठ-मन्दिर-तीर्थानां तदीशानां च दुःस्थितिः ।
सन्यासि साधुवर्गेषु कामिनीकाञ्चनस्पृहा ॥७॥
अस्पृश्यानां महान् क्लेशो विधवानामुपेक्षणम् ।
जातिच्युत-नृनारीणामप्रवेशः स्वजातिषु ॥८॥
दीक्षागुरूणां मूर्खत्वं, मन्त्राऽज्ञत्वं पुरोधसाम् ।
नेतॄणां शासकानाञ्च स्वार्थसाधननिष्ठता ॥९॥
संस्कार-यज्ञ पूजादिकर्मणां विधिहीनता ।
अपव्ययो विवाहोपनयनश्राद्धकर्मसु ॥१०॥

भूत प्रेत-पिशाचादे पूजनं सर्वतोदिशम् ।
स्त्रीणां चातिशयश्रद्धा पीरपैगम्बरादिषु ॥११॥
भृशमार्थिकवैषम्य, वर्णानामुच्चनीचता ।
विविधा भेदभावाश्च वर्गजात्युपजातिषु ॥१२॥
प्रचारश्चलचित्राणां, वेश्यावास पुरे पुरे ।
दूषित खाद्यपानादि, यूनामविनयस्तथा ॥१३॥
अभाव शुद्धवस्तूनां, मिश्रण सर्ववस्तुषु ।
प्रयोगो धर्मकृत्येषु वनस्पतिघृतस्य च ॥१४॥
प्रचारोऽश्लीलचित्राणां, सौन्दर्यप्रतियोगिता ।
क्रये शृङ्गारवस्तूनां देशस्य विपुलो व्यय ॥१५॥
फिल्मीगीतानि सर्वत्र, धूमपान मुखे मुखे ।
द्विजेष्वपि सुरापान, गॉजापान च साधुषु ॥१६॥
विद्यालयेषु कन्यानां युवकै सहशिक्षणम् ।
युवतीनां स्वशृङ्गार-चारुचित्रप्रदर्शनम् ॥१७॥
असख्यानां द्विजातीनां गायत्रीज्ञानशून्यता ।
पङ्क्तिपावनविप्राणामपि मासादिभक्षणम् ॥१८॥
नदीतटेषु मूर्खाणां पण्डानां कर्मकाण्डिता ।
सत्ता सखीसमाजस्य भक्तिव्याजादनैतिकी ॥१९॥
नृत्येष्वश्लीलसम्वादैरश्लीलैश्च प्रदर्शनै ।
प्रचारोऽश्लीलभानानां बालेषु तरुणेषु च ॥२०॥
प्राय पुस्तकपत्रेषु तिथिपत्रेषु दर्पणे ।
सर्वत्रैव सुरम्याणां स्त्रीचित्राणां प्रकाशनम् ॥२१॥
प्रायेणाऽनुचिते स्थानेऽनुचितेऽवसरे तथा ।
देवीदैवतचित्राणां स्वलाभाय प्रकाशनम् ॥२२॥
ब्राह्मणानां मिथो युद्ध मत्स्यमारणहेतवे ।
शैव-वैष्णव साधूनामीर्ष्या द्वेष परस्परम् ॥२३॥
बालवैधव्ययुक्तानां युवतीनां निरन्तरम् ।
व्यभिचारोऽपहारो वा हिन्दुभिर्यवनैस्तथा ॥२४॥

एते सर्वे दुराचारा आर्यजातिविनाशका ।
धर्मसंस्कृतिसिद्धान्त-विरुद्धा शास्त्रगर्हिता ॥२५॥
परन्त्वेषां विनाशाय धर्मसंस्थापनाय च ।
किमु पण्डितमूर्धन्यैरपि किञ्चिद् विधीयते ॥२६॥
अनर्थान् सकलानेतान् पश्यन्तोऽपि दिवानिशम् ।
निश्चेष्टा पण्डिता सन्ति मूकान्धबधिरा इव ॥२७॥
विधिना ब्राह्मणा सृष्टा धर्मकोशस्य गुप्तये । ❀
विनश्यन् किन्तु कोशोऽद्य पण्डितैः किमु रक्ष्यते ॥२८॥
चातुर्वर्ण्यव्यवस्थाया आदिसंस्थापको मनु ।
धर्मान् शिक्षयितुं प्राह पृथिव्यां सर्वमानवान् ॥२९॥ †
परं पृथिव्यां का वार्ता स्वदेशे स्वपुरेऽपि वा ॥
प्रतिवेशेऽपि वा निजैश्चारित्र्यं शिक्ष्यते नु किम् ॥३०॥
स्वकर्तव्यपरित्याग पण्डिता भवतामयम् ।
ह्रासे हिन्दूसमाजस्य सुमहत् कारणं मतम् ॥३१॥
हिन्दूसमाजे व्याप्तानां दोषाणां बहुभिर्दिने ।
विनाशाय यतन्तेऽद्य भूयांसो देशवासिन ॥३२॥
परन्तु भवतामेव ध्यानं तत्र न गच्छति ।
भवद्भिर्न च सम्भूय कश्चिद् यत्नो विधीयते ॥३३॥
एतेषां दोषजातानां देशजातिविनाशिनाम् ।
वक्तारोऽपि तु निर्भीका पण्डितेषु सुदुर्लभा ॥३४॥
रामावतारशर्माणो धन्यास्ते त्रिदिवंगता ।
स च मे धन्यवादार्हो मणिशंकरपण्डित ॥३५॥

❀ उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती ।
स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ॥
ब्राह्मणो जायमानो हि पृथिव्यामधि जायते ।
ईश्वर सर्वभूतानां धर्मकोशस्य गुप्तये ॥
मनुस्मृति अ० १, ९८–९९ ।

† एतद्देशप्रसूतस्य सकाशादग्रजन्मन ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥ मनुस्मृति

मोतीलालस्तथा विद्वान् वैदिकार्थप्रकाशक ।
स्वामी भगवदाचार्य शास्त्री श्रीलक्ष्मणस्तथा ॥३६॥
धर्मनाम्ना प्रचलिता दोषा ये सम्यगीरिताः । ❀
अन्ये तु पण्डिता प्राय सर्वे मौनावलम्बिन ॥३७॥
सत्यं सत्य बुधा वच्मि स्वकर्तव्यपराङ्मुखै ।
भवद्भिर्निजदेशस्य हानि सुमहती कृता ॥३८॥
भवन्तो धर्मरक्षायै प्रेरयन्त्यपरान् बहून् ।
परमेष निजो धर्मो भवद्भि पाल्यते न किम् ॥३९॥
एतेषा दोषराशीना तस्मादालस्यवर्जिता ।
निरोधाय बुधा यूय यतध्वमविलम्बितम् ॥४०॥ †

अथ च—

निजधर्मप्रचारार्थं विदेशेभ्य समागतै ।
विहिता हिन्दवोऽसख्या क्रिश्चियनूधर्मदीक्षिता ॥४१॥
पर्वतेष्वपि नैकेषु निवसन्ति चिरादिह ।
मुण्डा उराव सन्थाली प्रमुखा बहुजातय ॥४२॥ $
तेषु शिक्षाप्रचाराय सभ्यताशिक्षणाय च ।
वैदेशिका नरा नाया बहव सन्ति तत्परा ॥४३॥
तेषामेतेन यत्नेन बहुपर्वतवासिन ।
परित्यज्य निज धर्मं क्रिश्चियनूधर्ममाश्रिता ॥४४ ।

❀ विषयेऽस्मिन् एतेषा ग्रन्था लेखाश्च अवलोकनीया । विदुषा परिचयस्तु परिशिष्टभागे अवलोकनीय ।

† अस्मिन् विषये "सस्कृतपाठशालाओं में दैनिक धर्मशिक्षा की आवश्यकता और उसकी योजना" इतिनामक कार्यालय द्वारा प्रकाशित पुस्तक द्रष्टव्यम् ।

$ अवलोक्यताम् 'आदिवासी' नामक केन्द्रीयसूचनाविभागप्रकाशित पुस्तकम् । स्थानम्-प्रकाशनविभाग, सूचनाकार्यालय, भारत सरकार दिल्ली८ म०१॥)

इदानीं भारते जाते स्वतन्त्रे तु विदेशिनः ।
*पूर्वतोऽप्यधिक सक्ता निजधर्मप्रचारणे ॥४५॥**
परन्त्वस्यामवस्थायामपि संस्कृतपण्डिताः ।
निजधर्मप्रचाराय प्रयत्न किमु कुर्वते ॥४६॥
धन्य स्वामी दयानन्द स तु येन तपस्विना ।
स्थापनाऽर्यसमाजस्य कृता जातिहिताय वै ॥४७॥
आर्यैर्विदेशिनामेषा प्रचारस्याऽवरोधने ।
निजधर्मप्रचारे च प्रयत्नो विहितो महान् ॥४८॥
परं तु पण्डितैरस्मिन् विषये किं विधीयते ।
अथवा भवतामेतत् कर्तव्य नैव विद्यते ॥४६॥

अपर च—

अधुना बहवोऽस्पृश्या हित्वा धर्म पुरातनम् ।
"अम्बेडकर" नेतृत्वे जाता बुद्धानुयायिन ॥५०॥
द्वाविंशतिमितास्तेषा प्रतिज्ञा सर्वसम्मता ।
जनयन्ति भिय चित्ते हिन्दुविद्वेषकारणात् ॥५१॥ †
सर्वेषा पुरतो हिन्दुमन्दिराद्देवमूर्तय ।
निष्काश्यन्ते नवैर्बौद्धै ब्रह्मविष्णुशिवादय ॥५२॥
अत्र किन्तु समाधान कि कर्तव्य च हिन्दुभि ।
विषयेऽस्मिन् न वै दृष्टो विदुषां कोऽपि निर्णय ॥५३॥
वर्तमाने समाजेऽस्मिन्नस्माक चिरकालत ।
दोषा समागता सन्ति शतशोऽथ सहस्रश ॥५४॥

---

* अवलोक्यतामेतत् पुस्तकत्रय हिन्दुरक्षाभिलाषिभिर्विद्वद्भिरवश्यमेव च—
१—खिस्ती धर्मप्रचाराचे शैतानी उपाय, (मराठी) (स्वाध्यायमडल, पारडी जि० सूरत)
२—ईसाई मिसनरियों का कुचक्र (हिन्दू धर्म सेवासघ, सब्जीमण्डी, देहली)
३—नियोगी रिपोर्ट (ईसाई मिशनरीसम्बन्धे मध्यप्रदेशशासनद्वारा प्रकाशित मिशनरीदुर्नीतिसूचकं विस्तृत विवरणम्) ।
† अवलोक्यता नागपुरसम्मेलनस्य विस्तृत विवरणम् ।

नूतनाश्चापि भूयांसो देशकालविपर्ययात् ।
दुर्विचारा दुराचारा दृश्यन्ते सर्वतोऽनिशम् ॥५५॥
भक्षितो बहुभिर्नव्यैः प्राचीनैरपि कीटकैः ।
पुराणो हि द्रुमश्चोऽय साम्प्रतं शीर्णतां गतः ॥५६॥
बहुभिश्च विपर्यासैरिमौ धर्मसमाजयोः ।
ऊर्ध्वमूलमधः शाखं जातं पश्यामि साम्प्रतम् ॥५७॥
अतस्तत्सुव्यवस्थायै पुनः संरक्षणाय च ।
विदुषामपि कर्तव्यं नूनं किञ्चिदपेक्ष्यते ॥५८॥

दृष्ट्वाऽनिशं जगति धर्मविलोपलीला,
यो ब्राह्मणोऽपि नहि विह्वलतामुपैति ।
किं जन्मना किमथवाऽध्ययनेन किं वा,
ज्ञानेन तस्य खलु विप्रकुलाधमस्य ॥५९॥

द्वितीयः सन्देशः

(धर्मोपदेशकेषु सात्विकताया अभावमुद्दिश्य)

इदमप्यपरं कष्टं यद् धर्मस्योपदेशकाः ।
साम्प्रतं शुद्धया वृत्त्या निजकार्यं न कुर्वते ॥१॥
सन्ति केचन विद्वांसो देशे धर्मोपदेशकाः ।
व्याख्यानं ददते गत्वा धार्मिकीषु सभासु ये ॥२॥
परं प्रचारो धर्मस्य तेषां लक्ष्यं न विद्यते ।
तेषां तु मुख्यमुद्देश्यं केवलं द्रविणार्जनम् ॥३॥
यावच्च तेषां द्रव्यस्य प्राप्तिर्भवति निश्चिता ।
तावत्ते नैव गच्छन्ति सभासु प्रार्थिता अपि ॥४॥
आचारतोऽपि धर्मेषु तेषां निष्ठा न विद्यते ।
बहुधर्मोपदेष्टारः सन्ध्यामपि न कुर्वते ॥५॥
सभायां बहुधाऽचार्या दत्ताऽचारस्य शिक्षणम् ।
अस्माभिः "स्टेशने" दृष्टाः शष्कुलीशाकभोजिनः ॥६॥

प्रायो धार्मिकलोकेषु धर्माचार्यवरेष्वपि ।
बाह्यप्रदर्शनस्यैव प्रवृत्तिरवलोक्यते ॥७॥
बाह्याऽडम्बरबाहुल्य स्पर्शास्पर्शाभिभावना ।
स्वार्थसिद्धिमयी दृष्टिस्त्रयमाचार्यलक्षणम् ॥८॥
एवमाचारहीनाना लुब्धानां धर्मजीविनाम् ।
उपदेशेन लोकेषु धर्मश्रद्धा कथ भवेत् ॥९॥

अपर च

धर्मोपदेशका प्रायस्तादृशा एव वीक्षिता ।
परलोकप्रधान ये कुर्वते धर्मदेशनम् ॥१०॥
अहिंसा-त्याग-वैराग्य मुक्तीनामेव शिक्षणम् ।
मन्यन्ते ते महाधर्म शिक्षयन्ति तदेव च ॥११॥
सांसारिक सुख सर्व भुञ्जाना अपि ते स्वयम् ।
परेभ्योऽसारता वाचा ससारस्य प्रचक्षते ॥१२॥
इह लोके मनुष्याणा कथमभ्युदयो भवेत् ।
एतस्मिन् विषये प्रायेणासते मौनमेव ते ॥१३॥
दम्भ-पाखण्डरहित शुद्धधर्मोपदेशक ।
जनताया हितैषी च धर्माचार्य सुदुर्लभ ॥१४॥

अथ च—

अयमप्यपरो दोषो दृष्टो धर्मोपदेष्टृषु ।
यत्ते शूद्रान्त्यजादीना समह नैव कुर्वते ॥१५॥
प्रायो धार्मिकसस्थाभिर्धर्माचार्यवरैस्तथा ।
शूद्राणामन्त्यजानाञ्च सदोपेक्षा विधीयते ॥१६॥
केवल ते द्विजातीना धनिनां श्रेष्ठिनां तथा ।
तथा साधुमहान्तानां दृश्यन्ते पक्षपातिन ॥१७॥
व्याख्यानेषु तु ते शूद्रान् घोषयन्त्यात्मनोऽनुजान् ।
परन्त्वनुज-सौहार्द दर्शयन्ति न ते कृतौ ॥१८॥
अतो धर्मप्रचारादौ धार्मिकीषु सभासु वा ।
शूद्राणामन्त्यजानां च सहयोगो न दृश्यते ॥१९॥

अस्मादेव च विच्छेदात् वैमनस्यात्तथैव च ।
प्रायो धर्मसभा सर्वा समजायन्त पञ्चत्व ॥२०॥
अतो धर्मसभोन्नत्यै शूद्रोन्नत्यै तथैव च ।
उभयो स्नेहसम्बन्ध सविशेषमपेक्ष्यते ॥२१॥
अथ जातिच्युता ये च येचाऽन्यधर्मदीक्षिता ।
तेषामुद्धारसम्बन्धे इमे किञ्चिद् वदन्ति नो ॥२२॥
आसीदेकस्तदा कालो यदा कैश्चिन्मनीषिभि ।
मलकानादिशुद्ध्यर्थं प्रयत्नो विहितो महान् ॥२३॥*
पर तैरपि तत्पश्चाद् आलस्येन भयेन वा ।
स सिद्धान्तः स यत्नश्च सर्वथैव विसर्जित ॥२४॥
तदारभ्याऽधुना यावत् धर्माचार्येषु कोऽपि नो ।
तदर्थं चिन्तयति वा यतते वा मनागपि ॥२५॥
तस्मादद्यापि भूयासो हिन्दवोऽथ द्विजा अपि ।
वर्तन्ते हन्त खृष्टेषु यवनेषु च सङ्गता ॥२६॥
कथन्नु धार्मिका एते विषयेऽस्मिन्नुदासते ।
इति मे महदाश्चर्यं महती वेदना च मे ॥२७॥
धर्माचार्याभिधेरेतैर्धर्मव्यापारिभिस्तत ।
वस्तुतो धर्मरक्षाया काचिदाशा न विद्यते ॥२८॥
विदुषा पुरतो मूर्खा आचार्या लिङ्गधारिण ।
धर्माधर्मादिसम्बन्धे स्वपाण्डित्य वितन्वते ॥२९॥
एतादृश्या स्थितौ सर्वैर्बुधै राष्ट्रहितैषिभि ।
भारो धर्मप्रचारस्य हस्ते ग्राह्यो निजे द्रुतम् ॥३०॥
देशकालानुवर्तिन्या दृष्ट्या व्यापिकयाऽधुना ।
बुद्ध्वा वास्तविक धर्म तत्प्रचारो विधीयताम् ॥३१ ।
स्वस्वानां पाठशालाना प्रदेशे पार्श्ववर्तिनि ।
गुरुशिष्यैर्यथाशक्य कार्यं धर्मप्रचारणम् ॥३२॥

---

* अवलोक्यता मलकानाशुद्धिसम्बन्धे वाराणसेय भारतधर्ममहामण्डलात् प्रकाशितो निबन्ध पण्डिताना शुद्धिसमर्थन सिद्धान्तश्च ।

कल्पयन्तु च विद्वांस सर्वे विद्यालयं निजम् ।
धर्मस्य संस्कृतेश्चापि जीवनस्थानमुत्तमम् ॥३३॥
भाले धर्मोपदेष्ट्रणा लग्नं यल्लाञ्छनं परम् ।
शुद्धधर्मप्रचारेण प्रक्षाल्य तन्मनीषिभि ॥३४॥

धर्मोपदेशकपदे विनिवेशितोऽपि
तद्रूप साधनयुतोऽपि सुपूजितोऽपि ।
य॰ कोऽपि हन्त कुरुते प्रतिकूलकार्यं
कोऽन्यस्ततो ननु नृशंसतरो नरः स्यात् ॥३५॥

तृतीयः सन्देशः

(राष्ट्रीयेषु सामाजिकेषु च कार्येषु कर्तृत्वनेतृत्वयोरभावमुद्दिश्य)

अथ राष्ट्रीयकार्येषु तथा सामाजिकेषु च ।
भवतां यन्न नेतृत्वं कर्तृत्वं वापि दृश्यते ॥१॥
अयमप्यपरो हेतु क्लेशे मम महत्तर ।
भवताञ्चाप्यसम्माने संस्कृतस्यापि च क्षये ॥२॥
विद्वासोऽन्यान्यभाषाणामेव देशे समन्तत॰ ।
दृश्यन्ते लोकनेतारा लोकसेवापरास्तथा ॥३॥
परन्तु सुनहो कालादालस्यादिसमन्विते ।
भवद्भिस्तदिदं स्वीयं पदं त्यक्तं सनातनम् ॥४॥
न राज्ये न प्रजावर्गे न स्वतन्त्रदलेषु वा ।
अपि पण्डितवर्याणां नेतृत्वं श्रूयते क्वचित् ॥५॥
नेतृत्वं वाक्पटुतया क्रियापटुतया तथा ।
उभाभ्यामेव हेतुभ्यामवाप्तु शक्यते जनै ॥६॥
परं सम्प्रति दुर्दैवात् सुमहत्स्वपि शास्त्रिषु ।
क्रियायां वक्तृतायां वा पटुत्वं नोपलभ्यते ॥७॥
प्रायो वाक्पाटवाभावात् भाषाशुद्धिभयात्तथा ।
सभा-सम्मेलनादिभ्यो दूरे तिष्ठन्ति पण्डिता ॥८॥

एव सस्थासभादीनां प्रबन्धकरणेऽपि ते ।
साधने वाऽन्यकार्याणा न दृष्टा कुशला क्वचित् ॥९॥
तीर्थादौ वहुसम्मर्दे रोगे सक्रामके तथा ।
जलप्लावन दुर्भिक्ष-प्रमुखे लोकसङ्कटे ॥१०॥
एतादृशेषु कालेषु सेवाकर्मणि दु खिनाम् ।
पण्डिता प्रायशो दृष्टास्तटस्था एव सवदा ॥११॥
इय पण्डितलोकाना समाजनिरपेक्षता ।
जात तेषामुपेक्षाया समाजे कारण परम् ॥१२॥

यतो हि—

हिताय ये तु लोकाना सहन्ते महदापद ।
ते महापुरुषा लोके पूज्यन्ते देवता इव ॥१३॥
निजानामेव पश्यन्तु पूर्वजानामहो बुधाः ।
आदर्श लोकसेवाया येन ते पूज्यतां गता ॥१४॥

तथा हि—

रोगमस्तान् जनान् दृष्ट्वा चिन्तामग्ना महर्षय ।
अहो कीदृशमुद्योग चक्रु रोगोपशान्तये ॥१५॥*
राजान वेनमालोक्य लोकाना त्रासकारकम् ।
ऋषय सहता भूत्वा जघ्नुस्त लोकहेतवे ॥१६॥†
स्त्री शूद्र द्विजबन्धूनामज्ञानध्वान्तनष्टये ।
व्यासो भारतमाख्यान पुराणानि च निर्ममौ ॥१७॥
महर्षिर्नारदो नृणां दु ख दृष्ट्वाऽतिविह्वल ।
तन्नाशकारण प्रष्टु जगाम हरिसन्निधौ ॥१८॥
महामना दधीचिस्तु परेषा हितकाम्यया ।
प्रसन्नमनसा स्वीयान्यस्थीन्यपि समर्पयत् ॥१९॥
एव महर्षयोऽनेके मुनयश्चाभवन् पुरा ।
प्राणान् दत्वाऽपि लोकाना निरता हितसाधने ॥२०॥

---

* अवलोकयन्ता चरकसुश्रुतादिग्रन्थाना प्रारम्भिका अध्याया ।
† श्रीमद्भागवतस्य चतुर्थे स्कन्धे चतुर्दशोऽध्यायो द्रष्टव्य ।

एवमार्थिकदृष्ट्यापि न देशस्य दशा शुभा ।
अप्यावश्यकवस्तूनामभावे पीडिता जना ॥४६॥
जनसंख्या तु देशेऽस्मिन् वृद्धिं याति दिने दिने ।
परन्तूत्पादनं तादृक् वर्द्धमानं न दृश्यते ॥४७॥
अत एव विदेशेभ्यो भूयो भूयोऽन्नयाचनात् ।
ऋणादानाच्च निर्वाह कथञ्चिदिह जायते ॥४८॥
अथ किं खलु वक्तव्यं शिक्षाया विषये यदा ।
विश्वविद्यालया जाता हन्त सद्दर्पभूमयः ॥४९॥
एवं क्षेत्रेषु सर्वेषु दृश्यते दुर्व्यवस्थिति ।
यस्या निवारणं सर्वै कर्तव्यं देशवासिभि' ॥५०॥
अतएव तु भूयांस पुरुषा सन्ति तत्परा ।
संस्थाश्च राष्ट्रनिर्माणे स्वस्वोद्देश्यानुसारत ॥५१॥
समाजे राजनीतौ च शिक्षाया संस्कृतौ तथा ।
उत्थानार्थं स्वदेशस्य सर्वैर्यत्नो विधीयते ॥५२॥
एतस्मिन् राष्ट्रसेवाया विशिष्टेऽवसरेऽधुना ।
शुभे समाजोत्थानस्य मुहूर्ते च समागते ॥५३॥—
संस्कृतज्ञसमाजेन विपुलेनापि न कृतम् ।
कार्यं किञ्चित् समुल्लेख्यमिति मे महती व्यथा ॥५४॥
अत एव च निन्द्यन्ते प्राय सर्वत्र पण्डिता ।
तेषामेव च दोषेण जाताऽहमपि निन्दिता ॥५५॥
विषये यत्र युक्ताऽऽसीद् बुधानामग्रगामिता । ※
पृष्ठगामित्वमपि नो तत्र तेषां विलोक्यते ॥५६॥
राष्ट्रोत्थानस्येतिहासे पण्डितानां भविष्यति ।
स्थानं किमिति शोचन्ती निमज्जामि मुहुर्मुहु ॥५७॥
अनया च समाजस्योपेक्षया पण्डिता अपि ।
उपेक्षिता समाजेन नेतृत्वं च ततो गतम् ॥५८॥

※ १—ब्राह्मणो वै प्रजानामुपद्रष्टा । काठकसंहिता, ११, १६ ।
२—ब्राह्मण सर्वभूतानां योगक्षेमसमर्पिता । म० भा० अनु० ९६, ६ ।

नेतृनशे समुत्पन्ना विख्यातेऽसत्यवत्सरे।
भवन्तो निजदोषेण नीयन्तेऽन्यैरहोऽधुना ॥५९॥
शिक्षादोषात्तथाऽलस्यात् तपस्त्यागाद्यभावत ।
क्षुद्रस्वार्थैकलक्ष्यत्वाद् भवन्तो नेयता गता ॥६०॥
कृत्वा भाले वृहट्टीका नद्ध्वा च महतीं शिखाम् ।
भवन्तो हन्त मन्यन्ते आत्मान ब्राह्मणोत्तमम् ॥६१॥
पर नैतावता युष्मद्-ब्राह्मण्य सिद्ध्यति क्वचित् ।
ब्राह्मणत्व तु लभ्य स्यात् त्यागेन तपसा तथा ॥६२॥
अतो राष्ट्रीयकार्येषु तथा सामाजिकेष्वपि ।
नूनमेव यथाशक्य ध्यान ददत पण्डिता ॥६३॥
पृथक् सघ विनिर्माय सङ्गता वाऽपरै सह ।
भवन्तोऽपि प्रवर्तन्तां लोककल्याणकर्मणि ॥६४॥

तथा हि—

समूहे द्विजबन्धूना स्त्रीशूद्राणा तथैव च ।
श्रीमद्भागवतादीना पुराणाना प्रवाचनम् ॥६५॥
उद्धारोऽस्पृश्यजातीनाम् अनाथानां सहायता ।
अन्यायाना प्रतीकारो वचसा कर्मणापि च ॥६६॥
अधर्म्यचलचित्राणां मद्यपानादिकर्मणाम् ।
भ्रष्टाचारादिकाना च विरोध कर्मणा गिरा ॥६७॥
ग्रामे ग्रामे सभा कृत्वा कथयित्वा कथा शुभा ।
जनेभ्य सत्तु मूढेभ्य सन्मार्गस्य प्रदर्शनम् ॥६८॥
एवमादीनि कार्याणि यथाकाल यथाबलम् ।
अनयमेन विद्वद्भिरनुष्ठेयानि निष्ठया ॥६९॥
इह यद्यपि वर्तन्ते देशे स्थानेषु केषुचित् ।
जीवन्त्यो म्रियमाणाश्च पण्डिताना सभा अपि ॥७०॥
पर सामाजिके कार्ये राष्ट्रीये वापि कर्मणि ।
नवासु वा समस्यासु तासा ध्यान न गच्छति ॥७१॥

अथ चेत् कायत कार्य कर्तुं कालो न लभ्यते ।
विचारोऽपि कथं योग्यः समाजाय न दीयते ॥७२॥
शास्त्रोक्तो ज्ञानदानस्य धर्मदानस्य चाऽधुना ।
अपूर्वो महिमा कस्माद् भवद्भिः खलु विस्मृतः ॥७३॥
विचारदानतो वापि श्रमात् प्रेरणयापि वा ।
किञ्चित् सामाजिकं कार्यं नूनं सर्वैर्विधीयताम् ॥७४॥

कालेऽस्मिन् निजदेशजातिविषये कर्णे निधायाङ्गुली—
नेत्रे चापि निमील्य वाचि निपुणं दत्त्वा ह्यर्गलाम् ।
श्रीमन्तो यदि शेरते सुखमये शय्यातले पण्डिताः
स्वदेशं प्रति भो भवेदयमहो विश्वासघातो महान् ॥७५॥

चतुर्थः सन्देशः

(भारतीयगौरवस्य ज्ञाने प्रचारे वा कर्तव्यबुद्धेरभावमुद्दिश्य)

इदञ्चापि ममाऽसह्यं विद्वांसो यन्न तत्पराः ।
भारतीयमहत्ताया ज्ञाने वापि प्रचारणे ॥१॥
इयं संस्कृतभाषा तत्साहित्यं चाऽथ संस्कृतिः ।
एतत्त्रयं मतं सर्वैर्भारतीयं धनं परम् ॥२॥
लोके केवलमेतेषां त्रयाणामेव कारणात् ।
भारतीयं यशः शुभ्रं दिशामन्तमुपागतम् ॥३॥
वैज्ञानिकत्वं भाषाया, साहित्यस्य विशालता ।
उदात्तता संस्कृतेश्च भारतीया विशेषता ॥४॥
परन्तु परतन्त्रत्वाद्देशस्य मनसस्तथा ।
भारतस्य महत्ता सा स्वकीया विस्मृता शनैः ॥५॥

---

* यथोक्तं धर्मशास्त्रकारैः —
ब्राह्मणस्य हि देहोऽयं क्षुद्रकामाय नेष्यते ।
इह क्लेशाय तपसे प्रेत्यानन्तसुखाय च ॥
ब्राह्मणस्य तु देहोऽयं न सुखाय कदाचन ।
तपः क्लेशाय धर्माय प्रेत्य मोक्षाय सर्वदा ॥ बृहद्धर्मपुराण २।४४ ।

देशस्योन्नतये नून हृदये देशवासिनाम् ।
स्वदेशविषयेऽपूर्वा श्रद्धा काचिदपेक्ष्यते ॥६॥
सैव श्रद्धा पुराऽस्माक नाश नीता विदेशिभि ।
स्वसाम्राज्यप्रसाराय स्वबलस्थापनाय च ॥७॥ *
तेषामनुकृतिं कृत्वा देशस्थैरपि बन्धुभि ।
बहुभिर्निजवस्तूनां निन्दा सुमहती कृता ॥८॥
अतो भारतसम्बन्धेऽश्रद्धा यूनामजायत ।
भारतीया जना एव रता भारतगर्हणे ॥९॥
तस्मादाङ्गललोकाना भाषाया संस्कृतेस्तथा ।
प्रचारो भारते जातो गेहे गेहे जने जने ॥१०॥
इदानीं तु पुनर्लब्धे स्वातन्त्र्ये, देशवासिनाम् ।
आकृष्टा वर्तते दृष्टि प्राचीन गौरव प्रति ॥११॥
यदि भारतमाहात्म्य वास्तव लोकससदि ।
पुन पुन प्रकाश्येत बोध्येरन्नखिला जनाः ॥१२॥—
तदा शिक्षितलोकानामास्था पाश्चात्यशिक्षया ।
विनष्टाऽपि पुनर्नून प्ररोहेत शनै शनै ॥१३॥
अस्मिन् काले तु विदुषामेवैवास्त्युचिता क्रिया ।
भारतीयमहत्त्वस्य पुनर्देशे प्रचारणम् ॥१४॥†

---

* यथा लार्ड मेकाले (Lord Macaulay), मिस मेयो (Miss Mayo), सेनार्ट (Senart), ग्रेव्हस् (Graves), (Frank Thilly) फ्रैन्क थिल्ली, मि० विलियम आर्चर (MR William Archer) प्रभृतिभिर्विदेशवासिभि ।

† यथा—

W Hopkain महोदय —"Ethice in India" इति नामके ग्रन्थे "What India needs is to realise itself"

Evolution of Hindu Moral ideals"

श्री स्वामि विवेकानन्द महोदयस्तु इतोऽप्यधिक विदेशेष्वपि आध्यात्मिकताया प्रचारार्थं विजययात्रायै च भारतीयान् विदुष समुद्बोधयति । यथा—

(अग्रेऽपि)

पर पण्डितलोकाना हा कष्ट कथयामि किम् ।
भारतीयमहत्ताया सम्यग् ज्ञान न विद्यते ॥१५॥
उचिता संस्कृतज्ञाना यन्नासीत् पारगामिता ।
तत्र प्राथमिक ज्ञान बहूना नोपलभ्यते ॥१६॥
न भाषाविषये तस्मान्न साहित्ये न संस्कृतौ ।
महत्त्ववर्णन कर्तुं शक्ता प्रायेण पण्डिता ॥१७॥
अनेन कारणेनैव भारतीयैरुपेक्षिता ।
इदानीमपि भूयोभिर्विपीदामि दिवानिशम् ॥१८॥
पर पण्डितलोकानां ध्यानमत्र न गच्छति ।
ज्ञानव्याख्यानसामर्थ्यं लब्धु नो तै प्रयत्यते ॥१९॥
पर प्रमाणैर्दृष्टान्तैस्तथा तुलनयाऽपरै ।
गिरा प्रभावशालिन्या शैल्याऽऽकर्षिकया तथा ॥२०॥—
उक्तस्य त्रितयस्यापि महत्त्व यदि कीर्तितुम् ।
क्षमा स्यु पण्डिता सर्वे तन्मे प्रीतिकर भवेत् ॥२१॥

अथ च—

भूयास सस्कृताचार्या आग्लविद्यालयेष्वपि ।
अध्यापयन्ति पर्याप्त समय प्राप्नुवन्ति च ॥२२॥
तत्र ते यदि तत्रत्यान् स्वशिष्यान् शिक्षकास्तथा ।
सम्यग् महत्त्वमेतेषा बोधयेयुर्निरन्तरम् ॥२३॥—
शङ्कानां च तदीयाना दद्युस्तोपदमुत्तरम् ।
तदा भूयान् प्रचार स्यान्मम शिक्षितमण्डले ॥२४॥

"Once more the world must be conquered by India this is the dream of my life We must go out, we must conquer the world through our spirituality and philosophy There is no alternative We must do or die"

India's cultural Empire and Her future

परं तेऽपि विद्वत्सु चाकचिक्यपरेप्वहो ।
एतादृशा शुभा भावा उदयन्ति न जातुचित् ॥२५॥
परं भारतराष्ट्रस्य सेवाकाले समागते ।
पण्डितानामिदं मौनं न कथञ्चन शोभते ॥२६॥
अत सर्वे बुधा ज्ञानं लब्ध्वाऽभ्यस्य च वक्तृताम् ।
भारतीयमहत्ताया गानं कुर्वन्तु सर्वश ॥२७॥
भारतीयमहत्ताया विपये वहुभिर्बुधै ।
लिखिता वहवो ग्रन्था देश्यैर्वैदेशिकैस्तथा ॥२८॥*
विधाय तेषां सर्वेषां समहश्चानुशीलनम् ।
बुधा भवत सन्नद्धा विलम्बो नाऽधुनोचित ॥२९॥
विपयत्रयसम्बन्धे एकहोरावसायिनी ।
एकैका वक्तृता रम्याऽभ्यस्याऽवश्य मनीपिभि ॥३०॥
एका सप्तदीनीं दत्वा पक्ष वा मासमेव वा ।
अभ्यस्या वक्तृतैका तु सर्वचेतोविमोहिनी ॥३१॥
ये विद्वांसो दुरूहाणां ग्रन्थानां पाठने क्षमा ।
तेषां कृते किमेकं भो भाषण नन्वसम्भवम् ॥३२॥

---

* यथा—

१—श्री लोकमान्य तिलक, स्वामी विवेकानन्द, स्वामी रामतीर्थ, कवीन्द्र रवीन्द्र, योगिराज अरविन्द, डा० एस० राधाकृष्णन्, स्वामी दयानन्द, महामना मालवीय, डा० भगवान दास, प्रभृतिभिर्लिखिता ग्रन्था ।

२—वैदेशिकैर्लिखितानां ग्रन्थानां परिज्ञानाय शास्त्रधर्मप्रचार सभा, चौरंगी, कलकत्ता द्वारा प्रकाशित Hindu glory नामक पुस्तक द्रष्टव्यम् ।

३—एतादृशग्रन्थानां लघ्वी सूची परिशिष्टभागे अवलोकनीया ।

४—संस्कृतभाषाया संस्कृतसाहित्यस्य च महत्त्वविषये विविधा संस्कृत साहित्येतिहाससम्बन्धिनो ग्रन्थास्तथा कार्यालयद्वारा प्रकाश्यमान संस्कृत-भाषणानां तथा संस्कृतसम्बन्धिनां लेखानां सग्रहश्च अवलोकनीय ।

५—भाषणोपयोगिनां विविधविषयाणां परिज्ञानाय तथा भाषणस्य अभ्यासाय च सार्वभौमसंस्कृतप्रचारकार्यालयत साहाय्य लब्धुं शक्यते । अभिलाषिभि एतदर्थं पत्रव्यवहार साक्षात्कारश्च कर्तव्य ।

पण्डिता भाषणं दातु न क्षमा इति लाञ्छनम् ।
शीघ्रात् शीघ्रतर यूय नाशयध्व विपश्चित ॥२३॥
मासस्याऽभ्यन्तरे कृत्वाऽभ्यास सम्यक् प्रभाषितुम् ।
निजयोग्यतया कार्या लोका विस्मितमानसा ॥२४॥
जनतन्त्रयुगे चास्मिन् सम्यग् भाषणकौशलम् ।
स्वप्रभावप्रसाराय परमावश्यक बुधा ॥२५॥
इदमेकमपि प्रौढ वैशिष्ट्य विबुधेषु चेत् ।
तेन स्वान्त सुख गर्वो यशश्चापि भवेत् खलु ॥२६॥
एतावदपि य कार्य कर्तु नो पारयेद् बुध ।
मुख तस्य न वाञ्छामि कदाचिदपि वीक्षितुम् ॥२७॥

अद्यापि पण्डितवरा समयोऽस्ति शेष
शैथिल्यदोषमपनीय भवन्तु सज्जा ।
आपूरयन्तु च दिशो दश देवभाषा—
साहित्यसस्कृतिगुरुत्वगिरा निनादै ॥२८॥

विचार-व्यवहार-विषयकम्

पञ्चमं प्रकरणम्

प्रथमः सन्देशः

(पण्डितेषु परस्पर सौहार्दसङ्घटनादीनामभावमुद्दिश्य)

इयद्यापि न युष्माकं प्रवृत्तिर्भेऽल्पदु सदा ।
सौहार्दं साहचर्यं वा यमिथो नैव रक्षथ ॥१॥
एकस्मिन् नगरेऽनेके निवसन्ति सुपण्डिता ।
पर तेषु न पश्यामि स्नेह वा सहगामिताम् ॥२॥
भूतिरेतस्य नायाति विद्या तस्य दुर्गमा ।
असौ तु सर्वथाऽशक्त कौमुद्या अपि पाठने ॥३॥
एव परस्पराक्षेप—निन्दानिक्षिप्तचेतस ।
पण्डिता अपर नैव मन्यन्ते पण्डित स्वत ॥४॥
गुर्जरोऽयमय गौड शाकद्वीपीय एप रे ।
अय तु सरयूपारी सारस्वतसुधीरसौ ॥५॥
इत्येव चिन्तयन्तो वै विद्वांसो निखिला अपि ।
ईर्ष्याद्वेषादिसयुक्ता न प्रीतिं कुर्वते मिथ ॥६॥
पण्डिता पण्डितानां तु लाभ दृष्ट्वा तथोदयम् ।
ज्वलन्ति मनसाऽत्यन्त द्रुह्यन्ति च निरन्तरम् ॥७॥
एकश्चेत् पण्डित कश्चिल्लभते पदमुत्तमम् ।
तदा तत्पातनायाऽन्ये प्रयत्न बहु कुर्वते ॥८॥
"अह महानह योग्य सर्वेषामुत्तमोऽस्म्यहम् ।
तत् किमर्थं नु गच्छेय लघुपण्डितसन्निधौ" ॥९॥
"यद्यप्यस्मि लघु सत्य तथापि यदि गम्यते ।
मया समीपे महता लाघव मेऽधिक भवेत्" ॥१०॥

अनया हीनया बुद्धया महान्तो लघवोऽपि वा ।
पण्डिता यान्ति न प्रायोऽपरपण्डितसन्निधौ ॥११॥
परीक्षावऽसरे केन्द्रे बहवो यान्ति पण्डिता ।
मिलन्ति नहि ते स्नेहात् किन्त्वेकत्र स्थिता, अपि ॥१२॥
धृत्वा तु तत्र ते मौनम् उपविष्टाः पृथक्-पृथक् ।
दृष्ट्याऽऽशङ्कितया शश्वन्निरीक्षन्ते परस्परम् ॥१३॥
महता चेत् प्रयत्नेन सभा तत्र विधीयते ।
आनीयन्ते हठादेते धृत्वा धृत्वा तु पण्डिता ॥१४॥
"सङ्गच्छध्व सवदध्व" "सङ्घे शक्ति कलौ युगे" ।
"शुष्कैर्वैर विवाद च न कुर्यात् केनचित् सह" ॥१५॥
श्रुतिस्मृतिपुराणाना वचास्येतानि पण्डिता ।
यथा भवद्भिर्लङ्घयन्ते न तथाऽन्येन केनचित् ॥१६॥
अत एव भवन्तो वै सङ्घशक्तेरभावत ।
सहन्ते शक्तिमन्तोऽपि दुर्दशा परमामिह ॥१७॥
न समाजे न राज्ये वा भवतां यदिहादर ।
यथायमार्थिक क्लेशो मम वापि परिक्षय ॥१८॥
या इमा अवलोक्यन्ते दुर्दशा आवयोरिह ।
भवत्सङ्घटनाभाव कारणं तत्र केवलम् ॥१९॥ ❀
अतो दुर्भावनां हित्वा सङ्घशक्तिर्विधीयताम् ।
सभाश्च सस्कृतज्ञानां स्थापनीया पुरे पुरे ॥२०॥
दुर्गापाठं पठित्वापि भवद्भिर्जीवनावधि ।
सङ्घशक्ते प्रभावस्य लब्ध परिचयो नहि ॥२१॥

❀ तावत्सस्कृतभारतीसमुदयस्याशा दुराशा भृशं
तावत्संस्कृतवेदिनामपि पुनर्भाग्योदयो दुर्लभ ॥
ईर्ष्या द्वेष विरोध [illegible] वृत्ति विहायाऽखिला ।
प्रीति संस्कृतपण्डितेषु न पुनर्यावत् समुज्जृम्भते ॥
(लेखकस्य)

अरे सङ्घटन कृत्वा भवद्भिर्यलवत्तरम् ।
सङ्घशक्तिमयी दुर्गादेवी निर्मीयता नया ॥२२॥
तस्याधीनानि राज्यानि तस्याधीना महाजना ।
तस्याधीनाश्च नेतारो यस्य सङ्घटन दृढम् ॥२३॥
तस्माद्दुर्भावना हित्वा मिलन्तश्च मिथो मुदा ।
दृढं सङ्घटन स्वस्वस्थाने कुर्वन्तु पण्डिता ॥२४॥

दृष्ट्वाऽपि हन्त बहु सङ्घटनानि लोके
तेषा बल तदनुकूलफल च नित्यम् ।
अद्यापि सङ्घरहिता विबुधा भवन्तो
दु ख सहन्त इति मे विपुलो विषाद ॥२५॥

द्वितीयः सन्देशः

(शास्त्रार्थसमये विद्वत्सु शान्तिसौजन्ययोरभावमुद्दिश्य)

अनेनापि च दोषेण क्षोभो मे जायते महान् ।
शास्त्रार्थेषु भवन्तो यत् सौजन्य दर्शयन्ति नो ॥१॥
शास्त्रार्थे समवेतेषु पण्डितेषु महत्स्वपि ।
दृश्यते व्यवहारो नो मिथो भद्रजनोचित ॥२॥
न ते मिलन्ति सौहार्दात् स्निग्ध पश्यन्ति नो मिथ ।
आलपन्ति न वा प्रीत्या कुपिता इव योषित ॥३॥
त्यक्त्वा सन्धायसम्भाषाशैलीमानन्ददायिनीम् ।
प्रायो विगृह्यसम्भाषा बुधै सर्वै विधीयते ॥ ❀
शास्त्रार्थसमयस्यादौ दूरे दूरे स्थिता अपि ।
शनै शनै प्रसर्पन्तो योद्धुकामा इवासते ॥४॥
धैर्यं शान्ति परित्यज्य दूरे निक्षिप्य सभ्यताम् ।
विस्मृत्य विषय मुख्य कलह कुर्वते बुधा ॥५॥

❀ अवलोकयता चरकसहिताया विमानस्थानस्याष्टमेऽध्याये सन्धायसम्भाषाया विगृह्यसम्भाषायाश्च लक्षण तथा तयोर्जायमाना हानिर्लाभश्च ।

[illegible]विचर्चासु प्रवीणैरपि पण्डितै ।
[illegible] परित्यज्य छात्रियत्व प्रदर्श्यते ॥६॥*
[illegible]रत्चैव च सूत्राणि सुपरिष्कृत्य यत्नतः ।
केचित् शास्त्रार्थकण्डूतिं शमयन्ति वितण्डया ॥७॥
केचिद्दर्शयितु स्वीया शास्त्रार्थपु निमीपिकाम् ।
ख्यापयन्ति निज नाम "प्रतिवादिभयङ्करम्" ॥८॥
ततश्चापरपक्षीया विद्वास कौतुकान्विता ।
श्रुत्वा तत्र बहुव्रीहि तस्य हास्य वितन्वते ॥६॥
कासुचित्तु समज्यासु शास्त्रार्थसमये मया ।
पण्डितानामहो दृष्ट युद्धकाण्ड भयङ्करम् ॥१०॥
अनेन हेतुना लोके प्रवादोऽप समन्तत ।
कुक्कुरा इव युद्ध्यन्ति पण्डिता इत्यजायत ॥११॥
यस्मिन् तु खलु शास्त्रार्थे न जयो न पराजय ।
न यशो नापि वित्ताशा न च कापि पुरस्क्रिया ॥१२॥
तत्र केन तु लोभेन त्यक्त्वा सद्भावना मिथ ।
भवन्त खलु युध्यन्ति यान्ति चैवोपहास्यताम् ॥१३॥
आसीदेक पुराकालो यदा लाभाशया बुधै ।
विजिगीषाधिया वापि कुमार्गोऽप्यनलम्बित ॥१४॥ †
पर सम्प्रति को लाभ परस्परजिगीषया ।
येन युद्ध नु जायेत पण्डितानां परस्परम् ॥१५॥
अथ चेदाकुला सन्ति भवन्तो विजिगीषया ।
दर्शयन्तु तदा शौर्य शास्त्रार्थे साम्यवादिभि ॥१६॥

---

* यथा "मिलिन्द प्रश्न" नामके बौद्धग्रन्थे प्रारम्भ एव पण्डितराजधर्मो शास्त्रार्थपद्धतिगतो भेदः प्रदर्शित ।

† यथा दर्शनग्रन्थेषु प्राचीने वैदिके [illegible] विद्वद्भि परमव सप्तदशाक्षरे भूयांसोऽपशब्दा प्रयु[illegible] विस्तृतं विमर्द [illegible]
— [illegible]
इति नामके । [illegible]

अधुनेश्वरसम्बन्धे धर्मे चापि तदाश्रिते ।
क्रियन्ते बहव प्रश्ना नूतना अधुनातने ॥१७॥
तेषामद्य समाधानं जनसन्तोषकारकम् ।
कार्यं लोकव्यवस्थायै शास्त्रार्थकुशलैर्बुधै ॥१८॥
एकोऽपि विषयो नास्ति प्राचीन कोऽपि तादृश ।
यो नवीनविचाराणा पण्डितैर्नैव खण्डित ॥१६॥
स्वय सस्कृतशिक्षाया विषये बहुलेखकै ।
तीव्रा विरोधिनो भावा भूयास प्रकटीकृता ॥२०॥ †
भवता वस्तुत कर्तुं शास्त्रार्थं शक्तिरस्ति चेत् ।
कुर्वन्तु सकला सर्वैर्नवसिद्धान्तवादिभि ॥२१॥
पर शान्त्या मृदुगिरा गाम्भीर्येण च वादिन ।
भवद्भिर्विजिता स्युश्चेत्तदा युष्मद्यशो भवेत् ॥२२॥
अतो रीतिमिमा हित्वा विदुषां हास्यकारिणीम् ।
शास्त्रार्थं खलु कुर्वन्तु भवन्त शान्तिपूर्वकम् ॥२ ॥
स्नेहश्रद्धादरौदार्य धैर्यप्रीतिपुरस्सरम् ।
गिरा मधुरया सम्यक् शास्त्रचर्चा विधीयताम् ॥२४॥

सस्मितेन मधुरेण मञ्जुना
वर्षतेव नतिशीलसम्पदम् ।
भाषितेन मृदुना सुधीजनै
शास्त्रचिन्तनसुधा निपीयताम् ॥

तृतीयः सन्देशः

(यज्ञादिषु सभादिषु च समवेताना पण्डिताना परस्पर
छिद्रान्वेषणात्मिका प्रवृत्तिमुद्दिश्य)

इद तु दृष्ट्वा दुर्दृश्य भृश रोदिमि दु खिता ।
यज्ञादौ पण्डिता यत्तु कलह कुर्वते मिथ ॥१॥

---

† जन (मासिक पत्र, कलकत्ता) जुलाई १६५६ ।
नया समाज (मासिक-पत्र) कलकत्ता) फरवरी १६५७ ।
सरिता (मासिक-पत्र, नई दिल्ली) मई १६६२

यज्ञे विवाहे श्राद्धे वा पूजापाठादिकर्मणि ।
भवन्ति मिलिता दैवाद् भूयांसो यत्र पण्डिताः ॥२॥
तत्रैकैकः समालम्ब्य विषयं क्षुद्रमप्यहो ।
स्ववैदुष्यप्रकाशाय विवादं कुर्वते बुधाः ॥३॥
कुत्र केन कृताऽशुद्धिः कुत्र कस्याऽभवत् त्रुटिः ।
अस्यैवान्वेषणे सर्वे दृश्यन्ते दत्तचेतसः ॥४॥
अशुद्धिरेका सम्प्राप्ता यदि केनापि कस्यचित् ।
तदाऽऽक्रामति तत्कालं पण्डितोऽपरपण्डितम् ॥५॥
अहमेव महान् ज्ञाता अहमेव महान् सुधी ।
इति ज्ञापयितुं सर्वे प्रयतन्ते यथाबलम् ॥६॥
पण्डितानामनेनैव दर्पेण बहुकर्मसु ।
विलम्बो जायते भूयान् कार्यहानिश्च जायते ॥७॥
अत एव च भूयांसो यजमानजना अपि ।
शङ्कन्तेऽधिकसंख्यानां पण्डितानां निमन्त्रणे ॥८॥
इदं च निखिलं दृश्यं दृष्ट्वा श्रुत्वा च पण्डिताः ।
यादृशं जायते कष्टं तद् वक्तुं नैव पारये ॥९॥
किं करोमि ? क्व गच्छामि ? किं ब्रुवे ? क निवारये ।
म्रिये वा कथमित्येवं शोचन्ती यामि मूर्च्छनाम् ॥१०॥
यदि कुत्राऽप्यशुद्धिः स्यात् यदि कुत्रापि वा त्रुटिः ।
परमावश्यकं मन्ये तदा तस्या निवारणम् ॥११॥
परं तत् खलु कर्तव्यं शान्तिसम्मानपूर्वकम् ।
सङ्केतेन च, येन स्यादुपहासो न कस्यचित् ॥१२॥
परमेतादृशो भावः पण्डितेषु न दृश्यते ।
पण्डिता हन्त दृप्यन्ति पण्डितानामनादरे ॥१३॥
अहो मे तादृशं भाग्यं कदा भव्यं भविष्यति ।
यदा द्रक्ष्याम्यहं प्रीतिं पण्डितानां परस्परम् ॥१४॥
मात्सर्यमार्य्यपुरुषा विनिवार्य्य सर्वे
सौहार्दमाशु परितः परिवर्धयन्तु ।

लज्जास्पद कियदिद यदहो भवन्त
सज्जा भवन्ति निजवर्गविमाननायै ॥१५॥

चतुर्थ सन्देशः

(धार्मिकेषु विचारेषु व्यवहारेषु च असामञ्जस्यमुद्दिश्य)

इद दृष्ट्वाऽपि मे दु खं यदत्मविषयेऽधुना ।
विचारा व्यवहाराश्च विदुषां दुर्बला भृशम् ॥१॥
पण्डितानां समाजेऽपि स्वय धर्मोपदेशके ।
दृश्यन्ते विविधाचारा धर्मशास्त्रविरोधिन ॥२॥
गतेऽपि वयसि प्राय स्थितेषु तनयेष्वपि ।
विश्रुता अपि विद्वांसो दृष्टा उद्वाहकारिण ॥३॥
अष्टवर्षा भवेद् गौरीतिगिरो गानतत्परे ।
विवाह क्रियते प्राय कन्याना विंशवत्सरे ॥४॥
अथ वर्णाश्रमाचारप्रचारैकपरायणै ।
बुधै वर्णाश्रमो धर्म स्वयमेव न पाल्यते ॥५॥
किमु तैस्तनया स्वीया विहिता ब्रह्मचारिण ।
स्वय वा किमु वार्द्धक्ये सन्यासो गृह्यते नु तै ॥६॥
जानद्भिरथ सम्पूर्णान् सस्कारान् षोडशाऽधुना ।
सस्कारा निजबालाना क्रियन्ते कति पण्डितै ॥७॥
ब्रह्मचर्याश्रम सर्वं समावर्तनमेव च ।
उभय याममात्रेण धर्माचार्यैं समाप्यते ॥८॥
बाल्ये विवाह बालाना तिलकग्रहण तथा ।
वेश्यानृत्यादिक चापि बुधा किं कारयन्ति नो ॥९॥
वेदाना प्रत्यह पाठो धर्मप्रवचन तथा ।
ब्राह्मणाना कृते धर्म परमावश्यको मत ॥१०॥
पर पण्डितलोकेषु वेदाना पठन प्रति ।
उत्कण्ठा वा प्रयत्नो वा प्रायो नैवाऽवलोक्यते ॥११॥

भृतकाध्यापकपदं स्पष्टं शास्त्रेषु गर्हितम् ।
परं तत्प्राप्तये यत्नं पण्डिताः के न कुर्वते ॥१२॥
आङ्गलभाषा सभामध्ये निन्दद्भिरपि पण्डितैः ।
शिक्ष्यन्ते बालिका बालाः स्वीयास्तामेव यत्नतः ॥१३॥

एवमेव—

धर्मशास्त्रेष्वनिर्दिष्टा अप्याचारा अनेकशः ।
पण्डितैरथ मन्यन्ते धर्मत्वेनातिसम्मताः ॥१४॥
द्विजानां द्विजपक्वान्न-भोजने बाधकं वचः ।
श्रुतौ स्मृतौ पुराणे वा क्वचिन्नैवोपलभ्यते ॥१५॥ ❀
परन्तु विदुषामस्मिन् विषये त्वाग्रहो महान् ।
अपि पण्डितपक्वान्नं पण्डिता नैव भुञ्जते ॥१६॥
पण्डितेषु समेतेषु कस्याञ्चिदपि संसदि ।
प्रबन्धो भोजनस्यैव प्रायो भवति दुष्करः ॥१७॥
अगारकर्कटीं † केचित् केचिच्च द्विदलौदनम् ।
अपरे भोक्तुमीहन्ते केवलं शाकशष्कुलीः ॥१८॥
एवं सर्वेऽपि विद्वांसः पृथक् पाकपरायणाः ।
कालं शक्तिं तथा द्रव्यं नाशयन्ति वृथा बहु ॥१९॥
चुल्लीनां हण्डिकानां च करीषेन्धनयोस्तथा ।
प्रबन्ध एव भूयासो भवन्ति विकला जनाः ॥२०॥
पाके परिश्रमभयात् चिपुटस्य च वर्जनात् ।
दुग्धं दधि फलान्येव केचिदिच्छन्ति पण्डिताः ॥२१॥

❀ अपितु समर्थनमेव लभ्यते । यथा—

"लोके हि ब्राह्मणान् भोजयेदिति विधौ किं येन कथम् इत्याकाङ्क्षायां तृप्तिमुद्दिश्य ओदनेन द्रव्येण शाकसूपादिपरिवेषणप्रकारेण इति यथा उच्यते　　　।"

ऋग्वेदभाष्यभूमिकायां पौरुषेयत्वापौरुषेयत्वप्रकरणे सायणाचार्यः ।

† भिंडी, घाटी, गँकैया इत्यादिनाम्ना लोके प्रसिद्धं भाजनम् ।

निखिलोऽपि प्रपञ्चश्चेदन्त्यजैर्नो न जायते ।
तदा नु बहवो दृष्टा रोपानिष्टा मनीषिण ॥२२॥
स्वपाकस्यामहादेवं विदुषामधिवेशने ।
विविधा अनुभूयन्ते बाधा संयोजकैर्जने ॥२३॥
एव घृतादिनिष्पन्न मिष्टान्न शूद्रपाचितम् ।
ब्राह्मणैरपि भोक्तव्य स्मृतिकारा प्रचक्षते ॥२४॥
तथाऽप्यनेके विद्वासो मिष्टान्न नैव भुञ्जते ।
स्व च स्थापयितु लोके यतन्ते धार्मिकोत्तमम् ॥२५॥
सेवाकर्मणि शूद्रास्तु नियुक्ता स्मृतिभि स्वयम् ।
सच्छूद्राणां जल ग्राह्य तामिश्चैवोपपादितम् ॥२६॥
तथाप्यनेकैर्विद्वद्भिर्जलपानादिकर्मणि ।
सच्छूद्रा अपि वर्ज्यन्ते किमिद धर्मसम्मतम् ॥२७॥
एवञ्चेत् पण्डितैरेव स्वय धर्मो न पाल्यते ।
अधर्मो धर्म इत्येव स्थाप्यते चेन्निजेच्छया ॥२८॥
तथा कथन्नु धर्मस्य सभवेत् परिरक्षणम् ।
विदुषा चापि सम्मान कथ स्याज्जनससदि ॥२९॥
अत समस्तैर्विद्वद्भिस्तथा यत्नो विधीयताम् ।
यथा वास्तवरूपेण धर्मरक्षा भवेद् भुवि ॥३०॥
अथ चेन्मन्यते नैते नियमा सकला अपि ।
साम्प्रत रक्षितु योग्या देशकालविपर्ययात् ॥३१॥
तदा कथ न सर्वेषा इतै सम्मिल्य पण्डितै ।
व्यवस्था क्रियते काचिद् देशकालानुसारिणी ॥३२॥
परन्तु पण्डिता प्रायो योग्यताया अभावत ।
संस्कृतज्ञसमाजे च गर्हणाया भयात्तथा ॥३३॥—
तथा धार्मिकलोकेभ्यो लाभाभावस्य शङ्कया ।
नवधर्मव्यवस्थाया वार्तामपि न कुर्वते ॥३४॥
वाचा सनातन धर्म श्लाघन्ते ते तु साग्रहम् ।
पर कार्येऽनुवर्तन्ते नवीनामेव पद्धतिम् ॥३५॥

व्याघातेनामुना चैव वचन व्यवहारयो ।
पण्डिताना वच प्रायो यथार्थं नैव मन्यते ॥३६॥
अतो धर्मस्य सम्बन्धे वाणीव्यापारयोर्बुधै ।
विरोधपरिहारार्थं कर्तव्य कोऽपि निर्णय ॥३७॥
आत्मनस्त्वखिले कार्ये मान्यता देशकालयो ।
कि त्वयेषां कृते नित्य धर्मरक्षानुशासनम् । ॥३८॥
ईदृशो द्विविधो भाव सुप्रबुद्धयुगेऽधुना ।
न प्रवर्तयितु पूर्णैनैरन्तरेणापि शक्यते ॥३६॥
अत सर्व विविच्येद विद्वद्भिर्बुद्धिपूर्वकम् ।
प्राच्यनव्याग्रह हित्वा कार्या काचिद् व्यवस्थिति ॥४०॥
धर्मो धर्म इति प्राय क्रन्दन्ति बहुपण्डिता ।
पर क्रन्दनमात्रेण धर्मरक्षा सुदुर्लभा ॥४१॥
पाल्यन्तां नियमा सर्वे प्राणान् दत्वापि पण्डितै ।
अथवा तदशक्यत्वे पन्था निर्मीयता नव ॥४२॥
द्वयोरेकतरस्यैवाश्रयणेन विचारयो ।
धर्मस्य धार्मिकाना च मर्यादा रक्षिता भवेत् ॥४३॥

अथ च—

एषा पाश्चात्यदेशीया सभ्यतासुन्दरी नवा ।
प्रविष्टा याऽधुना देशे गेहे गेहे जने जने ॥४४॥
चाकचिक्यमयै रूपैरेतस्या हृत मोहकै ।
पण्डिता अपि भूयांसो दृष्ट्वा आकृष्टचेतस ॥४५॥
साम्प्रत तेऽपि हस्तेषु घटीयन्त्राणि बिभ्रति ।
"सेफ्टी रेजर" द्वारा च स्वयं क्षौर प्रकुर्वते ॥४६॥
विवाहाद्युत्सवे तेषां जलपानादिकर्मणि ।
"कुर्सी टी-टेबुला" दीनां व्यवस्था दृश्यते नवा ॥४७॥
सेविका 'प्लेट' पात्रेषु भुक्त्वा लवणपाचिता ।
चीनीपात्रेषु विद्वद्भिश्चायपानं विधीयते ॥४८॥

एवञ्चेत् सत्कृताचार्यैः सभ्यताऽङ्गीकृता नवा ।
तदा तदेव कुर्वाणा कथमन्येऽपराधिनः ॥४९॥
बहवः पण्डिता हित्वा नापितानधुना स्वयम् ।
सौविध्यार्थं स्वहस्तेन कुर्वते श्मश्रुमुण्डनम् ॥५०॥
तदा नापितवश्येन सत्त्वतज्ज्ञैर्न शक्यते ।
पूजापाठादिकं स्वीयं स्वयं कर्तुं कथं नहि ॥५१॥

पुनश्च—

सन्ति केचिद् बुधा नूनं प्राचीनाचारपालकाः ।
तेषामेव सुता जाताः परं तस्य विरोधिनः ॥५२॥
पिता निर्मति "चौबन्दीं" "कोट" धारयते सुतः ।
पिता पचति हस्तेन पुत्रः खादति "होटले" ॥५३॥ ❀
पित्रा पापभयाद् येन पचन्दी जातु नो धृता ।
सुतस्तस्य महा "बूटं" धारयन् कुरुतेऽशनम् ॥५४॥
यत् पित्रा हिन्दुभिः सार्धं स्पर्शेऽपि विहिता घृणा ।
तनयस्तस्य "पार्टीसु" भुनक्ति यवनैः सह ॥५५॥
धर्मदृष्ट्या धृतं येन विदुषा नाऽङ्गरक्षकम् ।
"सूटबूट"—समायुक्तस्तत्सुतः "साहबो"ऽधुना ॥५६॥
विहिताऽजीवनं येन सन्ध्या होरात्रयं सदा ।
गायत्रीमपि तत्पुत्रः क्षणार्धं न जपत्यहो ॥५७॥
कृतं विदेशयात्रायाः खण्डनं येन सर्वदा ।
मनस्तस्य सुपुत्रस्य विदेशेष्वेव मोदते ॥५८॥
पिता यस्य सुनिख्यातो देशे धर्मोपदेशकः ।
तत्सुतः साम्प्रतं जातः साम्यवादप्रचारकः ॥५९॥
येषां धौतेषु न दृष्टा कदाचिन्मुक्तकच्छता ।
नीलं "लुङ्गी" धरास्तेषां विचरन्त्यधुना सुताः ॥६०॥

❀ काष्ठाङ्किताः शब्दाः अंग्रेजीहिन्दीभाषयोः अवगन्तव्याः ।

दशा पण्डितपुत्राणामथेदानीं यदीदृशी ।
तदा सामान्यलोकानां भविता कीदृशी दशा ॥६१॥
अतः सर्वमवेक्ष्येदं पण्डितैः सूक्ष्मया दृशा ।
अधुना धर्मसम्बन्धे कर्तव्यः कोऽपि निर्णयः ॥६२॥
दृष्ट्वापि स्वगृहस्येमां लीलां, सम्मील्य लोचने ।
धर्मशिक्षणमन्येषामुचितं प्रतिभाति नो ॥६३॥

सम्यक् परिस्थितिमिमामवलोक्य सर्वा—
मात्मानमेव च विधाय तथोपमानम् ।
धीरेण धर्मविषये सुविवेकपूर्णः
कालोचितो हितकरश्च विधिर्विधेयः ॥६४॥*

पञ्चमः सन्देशः

(वर्तमानभविष्यतोरुपेक्षा, भूतकालैकनिष्ठा, परिवर्तनेषु पश्चाद्गामिताञ्च उद्दिश्य)

इदं दृष्ट्वापि मच्चित्तं नित्यं दोदूयते चिरात् ।
भूतार्थेष्वेकमात्रं यद् विद्वांसो विपुलादराः ॥१॥
भूतं दृष्ट्वा भविष्यञ्च वर्तमानं तथा च यः ।
समीक्ष्य कार्यं कुर्वीत स नरः पण्डितो मतः ॥२॥
विदुरादिभिराचार्यैः समस्तैर्नीतिकोविदैः ।
समीक्ष्यकारिता बुद्धेः प्रथमं लक्षणं मतम् ॥३॥
भूतार्थैकसमासक्ता दृष्टिः किन्तु मनीषिणाम् ।
वर्तमानं भविष्यं च प्रायो नैवाऽवलोकते ॥४॥

---

* अस्मिन् विषये निम्नाङ्किता निबन्धा अपि अवलोकनीयाः ।—

१—वेदान्तधर्म (स्वामी विवेकानन्द) पृ० १४०
२—जाति संस्कृति और समाजवाद (स्वामी विवेकानन्द) पृ० ५०-५५
३—साप्ताहिक हिन्दुस्तान (सम्पादकीय) २२ दिसम्बर १६४२
४—महात्मा मालवीय जी के लेख तथा व्याख्यान (धार्मिक) पृ० १५०

भूतामहमय पाशै प्रायो निगडिता पदा ।
विदुषां न प्रसर्पन्ति वर्तमाने भविष्यति ॥५॥
इद शास्त्रेषु निर्णीतम् इदं प्रोचु पुरातना. ।
इदमीदृगकुर्वन्त पितरश्च पितामहा ॥६॥
यत्किञ्चिन् पूर्वजै प्रोक्त यत्किञ्चिल्लिखित च तै ।
यच्च किञ्चित् कृत तस्मात् किमन्यन्नूतन भवेत् ॥७॥
इति मन्त्र जपन्तस्ते सुनिमलितलोचना ।
महत्त्व नहि पश्यन्ति वर्तमानभविष्ययो ॥८॥
अतो नूतनकल्याणा देशकालोपयोगिनाम् ।
निश्चये व्यवहारे वा न परोगामिनो बुधा ॥९॥
पश्चात्तदेव कुर्वन्ति यद्यप्यन्यै कृते सति ।
परन्तु सुसमीक्ष्यादौ प्रवर्तन्ते स्वय नहि ॥१०॥

तथा हि—

प्रारम्भे पण्डितैराङ्ग्ल्या महती गर्हणा कृता ।
अस्या अध्ययन चापि नास्तिक्य खलु घोषितम् ॥११॥
परमद्य तु तैरेव त्यक्त्वा सस्कृतभारतीम् ।
स्वगृहे श्रद्धयाऽत्यन्त पूजा तस्या विधीयते ॥१२॥
शूद्राणां सस्कृताधीतेर्निरोधो निखिलैर्बुधै ।
विहित सुमहो कालात् पाठशालासु सर्वत ॥१३॥
परमद्य तु तास्वेव पाठशालासु पण्डितै ।
आनीयानीय पाठ्यन्ते बलादस्पृश्यबालका ॥१४॥
कदाचित् समये काशीविश्वविद्यालये पुरा ।
विवादो विपुलो जात कल्याणीवेदपाठने । १५॥
परमद्योत्तरप्रान्ते भूयास खलु पण्डिता ।
परीक्षानियतान् मन्त्रान् पाठयन्त्यखिलानपि ॥१६॥
अन्त्यजाना प्रवेशस्य निषेधाय तु मन्दिरे ।
बहुभि साग्रह पूर्वं बहुकोलाहल कृत ॥१७॥

पर साम्प्रतमस्पृश्यैर्दूषितेऽपि सुरालये ।
बहव पण्डिता यान्ति अर्चन्ति च महेश्वरम् ॥१८॥
अस्पृश्यै सह सम्भोजं श्रुत्वाऽपि श्रवणेन ये ।
कुप्यन्ति स्म विरोध च कुर्वन्ति स्म समन्तत ॥१९॥
त एव संस्कृताचार्या अशिक्षणकालये ।
अस्पृश्यै सह भुञ्जति विहारे बहुशोऽधुना ॥२०॥
ये पङ्क्तिपावना विप्रा इतरैर्ब्राह्मणै सह ।
जलपानेऽपि सङ्कोच चक्रु सम्मानगुप्तये ॥२१॥
त एव धनलोभेन यशोमानार्थमेन वा ।
पर्यटन्ति विदेशेषु स्वच्छन्दमधुना सुखम् ॥२२॥
शिक्षायां नूतना प्रायो विषया निखिला अपि ।
वर्जिता अभवन् पूर्व बुधै सस्कृतशिक्षणे ॥२३॥
परं सम्प्रति सर्वेऽपि विषया नूतना खलु ।
बुधै सस्कृतशिक्षाया साग्रह सन्निवेशिता ॥२४॥
अष्टाध्यायीपथा नून ज्ञान व्याकरणस्य वै ।
जायते स्वल्पकालेन स्वल्पेनैव श्रमेण च ॥२५॥
अत एवाधुना देशे बहुसंस्कृतपण्डितै ।
प्राचीनशब्दशास्त्रस्य प्रचाराय प्रयत्यते ॥२६॥
हरिशंकरपाण्डेयै ब्रह्मदत्तमहाशयै ।
गोपालशास्त्रिभिश्चापि प्रयत्न क्रियते बहु ॥२७॥
पर प्राचीनविद्वांसो मत्वाऽनर्थकरीमिमाम् ।
पद्धतिं दूषयामासुर्विरोधं चापि चक्रिरे ॥२८॥
इदानीं तु पुनर्मत्वा लाभं पद्धतिना तया ।
प्रशसन्तो विलोक्यन्ते तामेव बहवो बुधा ॥२९॥
एष प्रायोऽन्यलोकानां दृष्ट्वाऽनुकरणं यदि ।
पश्चात्तान्येव कार्याणि विधीयन्ते मनीषिभि ॥३०॥—
तदा कथन्न प्रागेव सर्वं सम्यग् विविच्य तै ।
निर्णीयेत नव पन्था स्वबुद्ध्यैव स्वयं तथा ॥३१॥

तथा सति भवेत् कश्चिदधर्मो यदि, सह्यताम् ।
लभ्यतेऽनुकृतौ यस्मान्न वा धर्मो न वा यश ॥३२॥
नून रुगो यदि कर्तव्य परानुकरणं चलात् ।
तदधैव स्वय कृत्वा यश कस्मान्न लभ्यते ॥३३॥
वीरो नूतनपन्थान निर्माय लभते यश ।
इतरे तु पुन सर्वे गतानुगतिका जना ॥३४॥
यशो पथिकृता जाता भवन्तो ननु पण्डिता ।
तदिदानीं नव पन्था पुनर्निर्मीयते न किम् ॥३५॥

पश्यन्त्यहो प्रतिदिन परिवर्तनानि
कुर्वन्त्यथानुकरणं च पुन परेषाम् ।
आदौ तदा नवयुगोचितरीतिनीति—
प्रस्थापने स्वयमहो न कथ यतन्ते ॥

षष्ठ: सन्देश.

(वर्तमानयुगस्य नवीनविचाराणां परिज्ञाने तथा तेषां हेयोपादेय-
बुद्ध्या परीक्षणे च नितान्तमौदासीन्यमुद्दिश्य)

इदं दृष्ट्वाऽपि मच्चित्ते सङ्कोचो जायते महान् ।
यन्नवीनविचारेषु पण्डितैर्दृग् न दीयते ॥१॥
अद्यैतस्मिन् युगे नव्ये नवशिक्षितमण्डले ।
नवीनैव विचाराणां धारा वहति सर्वत ॥२॥
अध्यात्मविषये धर्मे दर्शने पुण्यपापयो. ।
वर्णाश्रमव्यवस्थाया कार्याकार्यविनिर्णये ॥३॥—
जातिभेदेऽर्थनीतौ च ईश्वरे देवतासु च ।
पाताले नरके स्वर्गे तथा लोकान्तरेष्वपि ॥४॥—
विषयेष्वेषु सर्वेषु नवशिक्षणदीक्षिता ।
नवेन दृष्टिकोणेन विचार कुर्वतेऽधुना ॥५॥
पाश्चात्यज्ञानविज्ञान-सम्पर्काद् भारतेऽधुना ।
भारतीयविचारेषु क्रान्तिर्जाता गरीयसी ॥६॥

प्राचीनेषु विचारेषु निश्वासेषु च साम्प्रतम् ।
आस्था शिक्षितलोकाना विनश्यन्ती विलोक्यते ॥७॥
वैज्ञानिकविचाराणा झञ्झावातेन भूयसा ।
प्राचीनव्यवहाराणा वहुवृक्षा निपातिता ॥८॥
विचारै साम्यवादीयैरपीदानीन्तने युगे ।
शिरो बुद्धिमता नून बहूना परिवर्तितम् ॥९॥
अद्य केनापि लोकेन शिक्षितेन जडेन वा ।
प्रभावाज्जनभावाना पृथक् स्थातु न शक्यते ॥१०॥
न च केवलमाङ्ग्लज्ञै संस्कृतज्ञैर्बुधैरपि ।
प्राचीना बहुसिद्धान्ता निद्रास्तर्केषुभि खरै ॥११॥ ⊛

यथा हि—

श्रीमद्रामावतारेण विख्यातेन मनीषिणा ।
सिद्धान्ता बहव प्राच्या नीता आलोच्यतां भृशम् ॥१२॥[1]
श्रीमत्प्रमथनाथेन भट्टाचार्येण धीमता ।
अस्पृश्यतादयो भावा अधर्म्या एव घोषिता ॥१३॥[2]
वेदविद्याप्रवीणेन श्रीमच्छ्रीपादशास्त्रिणा ।
नरक-स्वर्ग-पाताला पृथिव्यामेव साधिता ॥१४॥[3]
साधुना शान्तिनाथेन भारतीयमनीषिणाम् ।
सर्वे दार्शनिका वादा आद्योपान्तं विखण्डिता ॥१५॥[4]
श्रीमद्भगवदाचार्यवर्येण स्वामिना तथा ।
विचारा बहव प्रत्ना सोपहासं निराकृता ॥१६॥[5]

⊛ अस्मिन् विषये तत्तद्विद्वद्भि प्रणीता निम्नाङ्किता ग्रन्था अवलोकनीया—
१—परमार्थदर्शनम्, साधिकरणम्, सवार्तिकम् ।
२—सनातनी हिन्दू (वंगभाषायां लिखितम्)
३—महाभारत की आलोचना, दो भाग ।
४—प्राच्य दर्शन समीक्षा ।
५—विविधा संस्कृत हिन्दी गुजराती-ग्रन्था ।

(क्रमशः)

सुविख्यातेन विदुषा श्रीमोतीलालशास्त्रिणा ।
अनेके धर्मसिद्धान्ता घोषिता देशनाशका ॥१७॥[६]
श्रीमत्केशवसञ्ज्ञेन पण्डितेन सुयुक्तिभि ।
प्राचीनोपनिषद्व्याख्या दूषिताश्चापि खण्डिता ॥१८॥[७]
विदुषा तर्कतीर्थेन श्रीमल्लक्ष्मणशास्त्रिणा ।
धर्माध्यात्मविचाराणां सुभृश भर्त्सना कृता ॥१९॥[८]
विवेचकवरेण्येन सम्पूर्णानन्दवर्मणा ।
प्राचीना धारणा बह्वयो निराधारा निरूपिता ॥२०॥[९]
श्रीमता राहुलेनापि विचारा बहवो नवा ।
प्राचीनधर्मसिद्धान्तविरुद्धा प्रतिपादिता ॥२१॥[१०]
एषा नवमतानान्तु निष्पक्ष परिशीलनात् ।
अवश्य जायते पुसां बुद्धिश्रद्धाविपर्यय ॥२२॥
विपर्ययमिम सर्व दृष्ट्वा प्राचीनपण्डिता ।
प्रायशो नवलोकेभ्य कुप्यन्ति च शपन्ति च ॥२३॥

६—सस्कृति और सभ्यता । (महान् ग्रन्थ) अन्ये च अनेके निबन्धा ।
७—औपनिषदिक जीवनसौख्य (मराठीभाषाया लिखितम्)
८—हिन्दूधर्मकी समीक्षा तथा वैदिक सस्कृति का विकास ।
९—"गणेश" ब्राह्मण, सावधान तथा अन्येऽपि सस्कृतिसम्बन्धिनो लेखा ।
१०—अनेके ग्रन्था निबन्धाश्च ।

* एषु विषयेषु पुनरेतेऽपि ग्रन्था अवश्य द्रष्टव्या —
१—मानवधर्मशास्त्रम् तथा पुरुषार्थ, डा० भगवान दास ।
२—मानवार्षभाष्यम्, इन्दिरारमण शास्त्री ।
३—दर्शन अने चिन्तन (हिन्दी, गुजराती) श्री प० सुखलाल जी सघवी ।
४—लोकायत दर्शन (अग्रेजी, बँगला) श्री देवीप्रसाद चट्टोपाध्याय ।
५—हिन्दुजाति विनाश के द्वार पर, श्री एम० के० पणिक्कर ।
६—सस्कृति सगम (बँगला) श्री क्षितिमोहन सेन शान्तिनिकेतन ।
सस्कृति सगम (मराठी) दत्तात्रेय केशव केलकर, पूना ।
७—जाति, सस्कृति और समाजवाद, स्वामी विवेकानन्द ।
८—भारतीय समाज का वैज्ञानिक विश्लेषण डा० भगवत शरण उपाध्याय ।

प्राचीनेषु विचारेषु विश्वासेषु च साम्प्रतम् ।
आस्था शिक्षितलोकाना विनश्यन्ती विलोक्यते ॥७॥
वैज्ञानिकविचाराणा झञ्झावातेन भूयसा ।
प्राचीनव्यवहाराणा वहुवृक्षा निपातिता ॥८॥
विचारै साम्यवादीयैरपीदानीन्तने युगे ।
शिरो बुद्धिमता नून वहूना परिवर्तितम् ॥६॥
अद्य केनापि लोकेन शिक्षितेन जडेन वा ।
प्रभावान्नवभावाना पृथक् स्थातु न शक्यते ॥१०॥
न च केवलमाङ्ग्लज्ञै सस्कृतज्ञैर्बुधैरपि ।
प्राचीना बहुसिद्धान्ता विद्वास्तर्केषुभि स्वरै ॥११॥ ⊕

यथा हि—

श्रीमद्रामावतारेण विख्यातेन मनीषिणा ।
सिद्धान्ता बहव प्राच्या नीता आलोच्यतां भृशम् ॥१२॥[१]
श्रीमत्प्रमथनाथेन भट्टाचार्येण धीमता ।
अस्पृश्यतादयो भावा अधर्म्या एव घोषिता ॥१३॥[२]
वेदविद्याप्रवीणेन श्रीमच्छ्रीपादशास्त्रिणा ।
नरक-स्वर्ग-पाताला पृथिव्यामेव साधिता ॥१४॥[३]
साधुना शान्तिनाथेन भारतीयमनीषिणाम् ।
सर्वे दार्शनिका वादा आद्योपान्तं विखण्डिता ॥१५॥[४]
श्रीमद्भगवदाचार्यवर्येण स्वामिना तथा ।
विचारा बहव भ्रान्ता सोपहासं निराकृता ॥१६॥[५]

⊕ अस्मिन् विषये तत्तद्विद्वद्भि प्रणीता निम्नाङ्किता ग्रन्था अवलोकनीया—
१—परमार्थदर्शनम्, साधिकरणम्, सवार्तिकम् ।
२—सनातनी हिन्दू (वंगभाषायां लिखितम्)
३—महाभारत की आलोचना, दो भाग ।
४—प्राच्य दर्शन समीक्षा ।
५—विविधा सस्कृत हिन्दी गुजराती-ग्रन्था ।

(अग्रे दृष्टि)

सुविख्यातेन विदुषा श्रीमोतीलालशास्त्रिणा ।
अनेके धर्मसिद्धान्ता घोषिता देशनाशका ॥१७॥[६]
श्रीमत्केशवसत्त्वेन पण्डितेन सुयुक्तिभि ।
प्राचीनोपनिषद्व्याख्या दूषिताश्चापि खण्डिता ॥१८॥[७]
विदुषा तर्कतीर्थेन श्रीमल्लक्ष्मणशास्त्रिणा ।
धर्माध्यात्मविचाराणा सुभृश भर्त्सना कृता ॥१९॥[८]
विवेचकवरेण्येन सम्पूर्णानन्दवर्मणा ।
प्राचीना धारणा बह्वो निराधारा निरूपिता ॥२०॥[९]
श्रीमता राहुलेनापि विचारा बहवो नवा ।
प्राचीनधर्मसिद्धान्तविरुद्धा प्रतिपादिता ॥२१॥[१०]
एषां नवमतानान्तु निष्पक्ष परिशीलनात् ।
अवश्य जायते पुंसां बुद्धिश्रद्धाविपर्यय ॥२२॥
विपर्ययमिम सर्वं दृष्ट्वा प्राचीनपण्डिता ।
प्रायशो नवलोकेभ्य कुप्यन्ति च शपन्ति च ॥२३॥

६—सस्कृति और सभ्यता । (महान् ग्रन्थ) अन्ये च अनेके निबन्धा ।
७—औपनिषदिक जीवनसौख्य (मराठीभाषाया लिखितम्)
८—हिन्दूधर्मकी समीक्षा तथा वैदिक सस्कृति का विकास ।
९—"गणेश" ब्राह्मण, सावधान तथा अन्येऽपि सस्कृतिसम्बन्धिनो लेखा ।
१०—अनेके ग्रन्था निबन्धाश्च ।

* एषु विषयेषु पुनरेतेऽपि ग्रन्था अवश्यं द्रष्टव्या —
१—मानवधर्मशास्त्रम् तथा पुरुषार्थ, डा० भगवान दास ।
२—मानवार्थभाष्यम्, इन्दिरारमण शास्त्री ।
३—दर्शन अने चिन्तन (हिन्दी, गुजराती) श्री प० सुखलाल जी सघवी ।
४—लोकायत दर्शन (अंग्रेजी, बँगला) श्री देवीप्रसाद चट्टोपाध्याय ।
५—हिन्दुजाति विनाश के द्वार पर, श्री एम० के० पणिक्कर ।
६—सस्कृति सगम (बँगला) श्री क्षितिमोहन सेन शान्तिनिकेतन ।
सस्कृति सगम (मराठी) दत्तात्रेय केशव केलकर, पूना ।
७—जाति, सस्कृति और समाजवाद, स्वामी विवेकानन्द ।
८—भारतीय समाज का वैज्ञानिक विश्लेषण डा० भगवत शरण उपाध्याय ।

पर गालिप्रदानेन निन्दया व्यथयापि वा ।
प्रभावो नवमानानां निरोद्धु नैव शक्यते ॥२४॥
एतादृश्या स्थितौ तेषा विचाराणा परीक्षणम् ।
पण्डितानां कृते ज्ञेया परमावश्यकी क्रिया ॥२५॥
को दोष को गुणस्तेषु हानिर्लाभोऽथवा च क ।
किं युक्त किमु वाऽयुक्त ग्राह्य त्याज्य तथा च किम् ॥२६॥
एताभिर्दृष्टिभिस्तेषा सम्यक् कृत्वा विवेचनम् ।
तेषा पक्षे विपक्षे वा मत देयं मनीषिभि ॥२७।
आदौ युक्त्यादिभिस्तेषा संसाध्या दोषयुक्तता ।
युक्त्यादीनामभावे तु स्वीकर्तव्या विमत्सरम् ॥२८॥
पर नवविचाराणा सम्यग् ज्ञाने परीक्षणे ।
ग्रहणे वा विरोधे वा बुधा मीलितलोचना ॥२९॥
अनयोपेक्षया नव्यज्ञानाध्ययनवर्जिता ।
भवन्ति पण्डिता प्राय सर्वे संकीर्णबुद्धय ॥३०॥
अतएव नवप्रत्न श्रेष्ठाश्रेष्ठत्वनिर्णये ।
अनिश्चितधिय सर्वे पण्डिता प्रायशोऽधुना ॥ ३१॥
किन्तु प्राचीननव्याना संघर्षसमयेऽधुना ।
नहि पण्डितलोकानां युज्यते मौनधारणम् ॥३२॥
पण्डितो मन्यते प्राय सर्वे प्रतिनिधिर्महान् ।
प्राचीनार्यविचाराणां वक्ता संरक्षकस्तथा ॥३३॥
अतो निर्मत्सर सर्वा ज्ञातव्या स्थापना नवा ।
ततस्तासां च कर्तव्या शास्त्रैस्तर्कैर्विवेचना ॥३४॥
यद् ग्राह्य तचतो ग्राह्य यत् त्याज्यं त्याज्यमेव तत् ।
विमर्शं गहनं कृत्वा पक्षो ग्राह्यो यथोचित ॥३५॥*

---

* यथोक्त पुरातनैराचार्यै —
अपि पौरुषमादेयं शास्त्रं चेद्युक्तिबोधकम् ।
अन्यत्त्वार्षमपि त्याज्यं भाव्यं न्याय्यैकसेविना ॥
युक्तियुक्तमुपादेयं वचनं बालकादपि ।
अन्यत्तृणमिव त्याज्यमप्युक्तं पद्मजन्मना ॥

(क्रमशः)

एतेषां विषये ये ये ग्रन्थाश्च लिखिता नवे ।
तेषामध्ययनं कृत्वा कार्यं कश्चन निर्णयः ॥३६॥

प्रत्न-नव्य-विषय-ग्परत्वे
पण्डितेन परिहाय ममत्वम् ।
शास्त्र-तर्क-जनमङ्गल बुद्ध्या
निश्चयः सपदि कोऽपि विधेय ॥३७॥

सप्तमः सन्देशः

(परिश्रमापेक्षया प्रतिग्रहादिद्वारा द्रव्यार्जने प्रवृत्तिमुद्दिश्य)

इदं च मे महद्दुःख महच्चापि ममाऽप्रियम् ।
पण्डिता यत् श्रम त्यक्त्वा प्रतिग्रहपरा भृशम् ॥१॥
परिग्रहे श्रमे चापि श्रमस्यैव सुगौरवम् ।
लोके वेदे च शास्त्रे च सर्वत्र प्रतिपादितम् ॥२॥
ये कठोर श्रम कृत्वा जीविकार्जन-तत्परा ।
तेषामेव यशो लोके प्रतिष्ठा चापि जायते ॥३॥
ये पुनर्याचना कृत्वा गृहीत्वा दानमेव वा ।
जीवन्ति, न यशस्तेषा, निन्दा हास्य च जायते ॥४॥

योऽस्मत्तातस्य कूपोऽयमिति कौप पिबत्यप ।
त्यक्त्वा गाङ्ग पुर स्थ त कोऽनुशास्त्यतिरागिणम् ॥
योगवाशिष्ठे मुमुक्षुव्यवहारप्रकरणम् १८, २-४ ।

श्रद्दधान शुभा विद्यामाददीताऽवरादपि ।
अन्त्यादपि पर धर्मम् ॥
मनुस्मृति २, २३८ ।

पुराणमित्येव न साधु सर्व
न चापि काव्य नवमित्यवद्यम् ।
सन्त परीक्ष्याऽन्यतरद् भजन्ते
मूढ परप्रत्ययनेयबुद्धि ॥
मालविकाग्निमित्रे कालिदासः ।

शुद्धे फलमनाग्रह ।

दानेन दक्षिणाभिर्वा याचनेनापि यो जनः ।
धनमर्जयते तं तु स्वयमात्मैव गर्हते ॥५॥
प्रतिग्रहं विप्रधर्मं मन्वानैरपि पूर्वजैः ।
प्रतिग्रहणतो विप्रा वारं वारं निवारिताः ॥६॥
प्रतिग्रहप्रवृत्तानां ब्राह्मणानां यतस्ततः ।
धर्मशास्त्रेषु सर्वेषु सुस्पष्टं गर्हणा कृता ॥७॥
परं पण्डितलोकेषु भवत्सु निखिलेष्वपि ।
प्रतिग्रहणतः क्वापि विरक्तिर्नैव दृश्यते ॥८॥
न केवलं वृत्तिहीनाः, वृत्तिमन्तोऽपि पण्डिताः ।
प्रतिग्रहोत्सुकाः प्रायः सर्वत्रैवावलोकिताः ॥९॥
काश्यां तु "पण्डितसभा" नाम्न्येका जायते सभा ।
दक्षिणा यत्र सम्पन्नैः पण्डितेभ्यो वितीर्यते ॥१०॥
तत्र पण्डितजीवास्तु अपि वैभवशालिनः ।
दक्षिणालेशलोभेन धावन्तो यान्ति निस्त्रपम् ॥११॥ *
अथवा धनिनां गत्वा श्रेष्ठिनां वापि वेश्मसु ।
शुश्रूषां चाटुकारान् वा बुधाः प्रायो वितन्वते ॥१२॥
परन्तु लेख-व्याख्यान-कथावाचन-पाठनैः ।
श्रमं कृत्वा धनं लब्धुं कामयन्ते न हन्त ते ॥१३॥

तथा हि—

गुणः प्रवचनं नाम परमं हितसाधनम् ।
स्वतन्त्रजीविका चेति शंसितं श्रुतिभिः स्वयम् ॥१४॥ †

---

* यथाह कश्चित्—
एक एव महान् दोषः शालेर्द्विजवरस्य च ।
पुरस्कृतगुणोऽपि हस्तोदकमपेक्षते ॥

† यथा—"प्रिये स्वाध्यायप्रवचने भवतः । युक्तमना भवति, अपराधीनोऽहरहरर्थान् साधयते, सुखं स्वपिति, परमचिकित्सक आत्मनो भवति । इन्द्रियसंयमश्च, एकारामता च, प्रज्ञावृद्धिः, यशो, ... (शत...)

कथावाचनमप्येक तथा कर्म द्विजन्मनाम् ।
पूर्वजै स्वीकृत धर्म्यं जीविकासाधन मतम् ॥१५॥
रामायण भारते च श्रीमद्भागवत तथा ।
गीता चैवोपनिषदो योगवाशिष्ठमेव च । १६॥
नाना सुभाषितग्रन्था नीतिग्रन्थास्तथैव च ।
काव्यादीनां मनोहारिग्रन्थाश्च शताधिका ॥१७॥
एतेषा सुस्वर पाठात् तथा ग्रन्थार्थबोधनात् ।
साधुशिक्षाप्रचाराच्च लाभो भूयान् भवेत् किल ॥१८॥
अद्यापि यदि कथ्येत स्थाने स्थाने कथा शुभा ।
सामाजिकं धार्मिक च सम्यक् प्रवचन भवेत् ॥१९॥
तदात्मन समाजस्य देशस्य च मनीषिभि ।
श्रेयो महत् साधित स्यात् प्रतिष्ठा च परा भवेत् ॥२०॥
परन्त्वेषाऽपि सद्वृत्ति पण्डितैरपवर्जिता ।
इदानीं रोचयन्ते ते शुश्रूषा चाटुकारिताम् ॥२१॥
एतेषु कल्पवृक्षेषु सद्ग्रन्थेषु स्थितेष्वपि ।
विद्वासो,हन्त सीदन्ति किमाश्चर्यमत परम् ॥२२॥
सामान्यजनतामध्ये भक्तिज्ञानोपदेशत ।
यथा भगवत प्रीतिर्न तथाऽन्येन केनचित् ॥२३॥
इत्येव भगवान् प्राह स्वयमेव मुहुर्मुहु ।
तथापि नहि विद्वासो दृश्यन्ते तत्र सोद्यमा॰ ॥२४॥

अथ च—

ग्रन्थानां भूमिका व्याख्याऽनुवादै सह मुद्रणम् ।
अयमप्यपर पन्था विदुषा लाभदायक ॥२५॥

पक्ति । प्रज्ञा वर्द्धमाना चतुरा धर्मान् ब्राह्मणानामभिनिष्पादयति । ब्राह्मण्य, प्रतिरूपचर्यं, यशो, लोकपक्तिम् । लोक पच्यमानश्चतुर्भिर्धर्मैर्ब्राह्मण भुनक्ति । अर्चया च दानेन च अज्येयतया च अवध्यतया च ॥

शतपथब्राह्मणम्, का॰ ११, अ॰ ५ ब्रा॰ ७, क॰ १ ।

कार्येऽस्मिन् खलु सलग्ना भवेयुर्यदि पण्डिता ।
व्युत्पत्त्या यशसा सार्धं द्रव्यलाभोऽपि जायताम् ॥२६॥
पर सम्प्रति ये ग्रन्था व्याख्यायन्ते नवा नवा ।
भूमिकादिभिरुत्कृष्टै प्रकाश्यन्ते च साम्प्रतम् ॥२७॥
तत्रापि दृश्यते प्राय पुरुषार्थो विशेषत ।
हिन्द्याङ्ग्लविदुषामेव न तु सस्कृतवेदिनाम् ॥२८॥
अद्यापि खलु भूयासो ग्रन्था सस्कृतवाङ्मये ।
प्रकाशनीया वर्तन्ते नवसज्ञादिभि सह ॥२९॥
पर पण्डितलोकाना दृष्टिस्तत्र न गच्छति ।
न तदर्थं श्रम कर्तुं दृष्टा वा ते समुत्सुका ॥३०॥
सर्वं कार्यमिद मत्वा दुरूह दुष्कर च ते ।
पूजापाठ प्रतीक्षाया वीक्ष्यन्ते नवदृष्टय ॥३१॥
अथ चापि श्रम कृत्वा सम्यक् चालोच्य सर्वश ।
एकोऽपि लेखो लिख्येत प्रतिमासं विपश्चिता ॥३२॥—
तावतापि यशोलाभो वित्तप्राप्तिश्च सम्भवेत् ।
अभ्यासश्चापि जायेत गणना लेखकेषु च ॥३३॥
भट्टाचार्यं तु पश्य तु युवान रामशङ्करम् ।
कति वा लिखिता लेखा असत्याख्येन धीमता ॥३४॥
तथैव यदि जायेरन्नन्येऽपि कतिचिद्बुधा ।
लेखकास्तेन मे भूयान् सन्तोष स्यात् सुख तथा ॥३५॥
पर लेखकार्यं तु पाप मत्वा महत्तरम् ।
पण्डितै शपथं कृत्वा सर्वथा परिवर्जितम् ॥३६॥

अपर च—

अथ संस्कृतग्रन्थेषु पठने शिक्षिता जना ।
उत्सुका अत्र सम्मान्ते स्थाने स्थाने पुरे पुरे ॥३७॥
नेतारोऽप्यापात्रा नैके महत्त्वाधिकारिण ।
सामाजिका गृहस्थाश्च दृष्टा उत्कण्ठिता मया ॥३८॥

पर तेषां कृते कश्चित् सुबोधोऽध्यापनक्षम ।
रीत्या सरलया, प्राय शिक्षको नोपलभ्यते ॥३६॥
पण्डिता यदि जायेरन् तादृशाध्यापनक्षमा ।
संस्कृतस्य प्रचार च मन्येरन् कर्म चेन्निजम् ॥४०॥
तदा बहूना विदुषां नगरे नगरेऽधुना ।
निर्वाहो भविता नून यश सम्मानपूर्वकम् ॥४१॥
परन्तु योग्यतां लब्धु श्रम कर्तुं तथाविधम् ।
अन्यान् शिक्षयितु वापि पण्डित कोऽपि नेच्छति ॥४२॥

एवमेव—

बहुविद्यार्थिन क्षेत्रे भोक्तु धावन्ति नित्यम् ।
परन्तु ते श्रमं कृत्वा समीहन्ते न वर्तितुम् ॥४३॥
संस्कृत पाठयेयुश्चेदुच्चविद्यार्थिन परान् ।
लाभो भूयान् भवेत्तेषा निश्चिन्ता स्युस्तथा च ते ॥४४॥
क्षेत्रेषु भोजन, वृत्तिं, दक्षिणा च निमन्त्रणम् ।
मन्यन्ते संस्कृतच्छात्रा पर सौभाग्यकारणम् ॥४५॥
एव गुरुषु शिष्येषु पण्डितेष्वितरेष्वपि ।
यथा प्रतिग्रहे श्रद्धा दृश्यन्ते न तथा श्रमे ॥४६॥
तादृशा पुरुषा दृष्टा अत्य त विरला मया ।
एतस्या हीनवृत्त्या ये भवेयु सर्वथा पृथक् ॥४७॥
ईदृशेन स्वभावेन विबुधैर्देववागियम् ।
स्वयञ्चापि च ते निन्दामुपहासञ्च लम्भिता ॥४८॥
अहो यस्या नु भाषाया सर्वोच्च श्रमगौरवम् ।*
तत्सेवका एव जाता एव श्रम-पराङ्मुखा ॥४६॥
अतो हे पण्डिता युष्मत्पादौ धृत्वा निवेदये ।
त्यक्त्वा प्रतिग्रहे प्रीतिं श्रमे भवत तत्परा ॥५०॥

* यथा ऐतेरयब्राह्मणस्य" चरैवेति चरैवेति" इति श्रममहत्त्वसूचके मन्त्र-समूहे प्रतिपादितम् ।

अध्यापने प्रवचने लेखे संस्कृतशिक्षणे ।
कथाया वा श्रमं कृत्वा जीवन्तु गुरुतायुता ॥५१॥
एवं हे निखिलाश्छात्रा भवद्भिरपि साम्प्रतम् ।
प्रतिग्रहे रुचिं त्यक्त्वा भवितव्यं श्रमोन्मुखै ॥५२॥
नाऽदातव्यं न भोक्तव्यं यावच्छक्यं यतस्ततः ।
न च लड्डुकलोभेन कार्यं सम्मानविक्रयः ॥५३॥
यथाऽदानं विनाऽप्यन्ये दरिद्रा अपि बालकाः ।
पठन्त्येव तथा सर्वैः भवद्भिरपि पठ्यताम् ॥५४॥
अथ चेद् वृत्तिकार्यं स्यात् तदा कृत्वा परिश्रमम् ।
संस्कृतं पाठयित्वा वा कृत्वा वा सूत्रकर्तनम् ॥५५॥
अथवा लेखनं कृत्वा अपरेषां मनीषिणाम् ।
सम्मानेन समं नित्यं कार्यो निर्वाह आत्मनः ॥५६॥
पण्डितैरीदृशी बुद्धिर्निधार्थिभ्यः प्रदीयताम् ।
तथैव च स्वयं कृत्वा आदर्शः स्थाप्यतां नवः ॥५७॥

त्यागमूर्तिभिरहो नु पूर्वजै-
रर्जितं शुचि यदुज्ज्वलं यशः ।
लाभलेशवशतो न तद्बुधा
धूलिसाद्विह मुधा विधीयताम् ॥५८॥

अष्टमः सन्देशः

(तमालपत्रस्य भक्षणमुद्दिश्य)

दृष्ट्वा तमालपत्रस्य भक्षणञ्चापि धीमताम् ।
मम चित्ते महद्दुःखं घृणा चैवापि जायते ॥१॥
यदा पश्याम्यहं विप्रान् तत्रापि पण्डितान् ।
तमालपत्रनिर्माणे लग्नान् [illegible] ॥२॥
तदा मन्यामहे [illegible] जायते तथा ।
यथा [illegible] ॥३॥
अहो [illegible] महान् ।

यत्र वास श्रुतेरासीत्तत्र "सुर्ती" विराजते ॥४॥
दन्तहानिकर निन्द्य दोषवद् द्रव्यनाशनम् ।
पार्श्वभूदूषक याञ्चाकारक सर्वनिन्दितम् ॥५॥*
भवन्त ईदृश द्रव्यमहो भूत्वा नु शिक्षका ।
यद्भ्या च महदुर्ण्णीप कथं सादत परिडता । ॥६॥
स्वाध्यायेऽध्यापने यज्ञे पूजापाठादिकेष्वपि ।
यूय यदिदमश्नीथ किमु तद्धर्मसम्मतम् ॥७॥
सादन्तश्च स्वयं शिष्यानपि यत् शिक्षयन्त्यहो ।
निर्मापणादिव्याजेन तच्च कष्टकरं महत् ॥८॥
भवन्त एव सेवन्ते निन्द्य वस्तु यदीदृशम् ।
कथ निवारयिष्यन्ति उपदेक्ष्यन्ति वाऽपरान् ॥९॥
तस्मादिद महाऽशुद्धं विरुद्ध लोकवेदयो ।
मूढैरपि त्यज्यमान द्रुत त्यजथ परिडता ॥१०॥
वसद्भि पाठशालाया छात्रैरध्यापकैस्तथा ।
तमाल जातु न स्पृश्यमिति कार्यो विनिश्चय ॥११॥

हरिजनैपि जातिसभाभिया,
यदधुना बहुभि परिवर्जितम् ।
तदधुनापि सुधेन बुधैरहो,
ननु तमालदल परिसेव्यते ॥१२॥

नवमः सन्देशः

(निवास वस्त्र शयनासनादिपु स्वच्छताया परिष्कारस्यचाभावमुद्दिश्य)

इदञ्चाप्यपर चित्ते मम पीडाकर महत् ।
बहुभिर्देहवस्त्रादौ स्वच्छता य न रक्ष्यते ॥१॥

---

* न स्वादु नौषधमिद न च वा सुगन्धि
नाऽस्तिप्रिय किमपि शुष्कतमाकुचूर्णम् ।
किं चाक्षिरोगजनक च तदस्य भोगे,
बीज नृणा नहि नहि व्यसन विनाऽन्यत् ॥

बहूना विदुषां गेहे गत्वा गत्वा मयेक्षितम् ।
स्वच्छताविषये सम्यग् ध्यानं नो ददते बुधा ॥२॥
नीचैर्धूलिमयी भूमि उपर्युपरि जालकम् ।
भित्तया मलिनैश्चिह्नै रङ्किता, सकर क्वचित् ॥३॥
तमालभक्षिणा गेहे स्तितोऽपि निकृष्टा स्थिति ।
निष्ठीवनेन सर्वोऽपि लक्ष्यते दूषिता मही ॥४॥
किं नाम लगति द्रव्य प्रत्यह गृहमार्जने ।
किंतु सामान्यमप्येतत् कार्यं न क्रियते जनै ॥५॥
कामसूत्रे तु शोभाया स्वच्छतायाश्च वेश्मन. ।
वात्स्यायनेन मुनिना माहात्म्यं बहु कीर्तितम् ॥६॥ *
परं नियमितं यत्र जायते नैव मार्जनम् ।
तत्र शृङ्गार-शोभादि-विषये किन्तु कथ्यताम् ॥७॥
एवमेव समस्तेषु प्रायो विद्यालयेष्वपि ।
स्वच्छताविषये ध्यानं ददते नहि पण्डिता ॥८॥
यादृशे तादृशे वापि स्थाने स्थित्वा मलीमसे ।
आचार्या अथवा शिष्या पाठयन्ति पठन्ति च ॥९॥
"स्वच्छे स्थाने निवस्तव्यं, मार्जनीयं स्वक गृहम् ।
भित्तयो निर्मला रक्ष्या, अपनेयं च जालकम् ॥१०॥
सुदूरेऽवस्कर क्षेप्यो, दूरे निष्ठीवन तथा ।
भवनं परितो रोप्य तुलसीकुसुमादिकम् ॥११॥

---

* यथा—वेश्म च शुचि, सुगन्धपुष्पभारम्, विरचितविविधकुसुमम्, [illegible]
भूमितल, हृद्यदर्शनम्, त्रिषवणाभिषेचनम्, पूजादेवायतन [illegible]

नखाग्राऽन्यत् गृहस्थाना चित्रमात्रमस्तीति शास्त्रीय ।

वात्स्यायनकामसूत्रम्, चतुर्थेऽधिकरणे प्रथमाध्याय

[illegible] स्वच्छताशोभादिसम्पादनविषय [illegible]
मेऽस्माभिरपि द्रष्टव्य ।

देवानां, प्राकृतानां च वस्तूनां, विदुषां तथा ।
आदर्शपुरुषाणां च कर्तव्यश्चित्रसंग्रहः ॥१२॥*
सुन्दराणि च वाक्यानि लेखित्वा सुन्दराक्षरैः ।
बहिरन्तस्तथा द्वारे लम्बनीयानि भित्तिषु ॥१३॥†
एवं शुभविचाराणामुदयो नहि जायते ।
हृदये गुरुशिष्याणामित्याश्चर्यपदं महत् ॥१४॥
हिन्दीआङ्गलपाठशालानां दृश्याऽपि रमणीयताम् ।
पण्डिता अथवा छात्रास्तथा कार्यं न कुर्वते ॥१५॥
एवमेव च वस्त्राणां स्वच्छताविषयेऽप्यहो ।
वहवः पण्डिता ध्यानं प्रायेण ददते नहि ॥१६॥
बहुवेतनवन्तोऽपि बुधाः केचन वीक्षिताः ।
मया संस्कृतशालासु मलिनाम्बरधारिणः ॥१७॥
वेतनस्य तु वृद्ध्यर्थं यतन्ते ते निरन्तरम् ।
परं स्वरूपरक्षार्थं यत्नस्तेषां न दृश्यते ॥१८॥
वसते मलिनं वस्त्रं आसते मलिने कटे ।
शेरते मलिने तल्पे समर्था वहवो बुधाः ॥१९॥
आङ्गलप्राध्यापकेभ्योऽपि वाञ्छन्त्यधिकवेतनम् ।
व्ययं तथाविधं किन्तु कर्तुं नेच्छन्ति पण्डिताः ॥२०॥
स्थाने स्थाने मया दृष्टा बहवस्तादृशा बुधाः ।
व्ययमात्रानुरूपं ये वस्त्रादौ नैव कुर्वते ॥२१॥
कञ्चुकं मलिनं धृत्वा बद्ध्वोष्णीषं मलीमसम् ।
उपानद्रहिता एव विचरन्ति यतस्ततः ॥२२॥
श्रुत्वा समागमिष्यन्तं पाठशालानिरीक्षकम् ।
अथवाऽवसरे प्राप्ते विशिष्टे दैवयोगतः ॥२३॥

---

* प्राचीनानां तथा आधुनिकानाञ्च देशविदेशवासिनां संस्कृतविदुषां चित्रसंग्रहविषये कार्यालयेन सह पत्रव्यवहारः कर्तव्यः ।

† भित्तिषु अवलम्बनाय कार्यालयद्वारा प्रकाशितानि सूक्तानि संस्कृतमहत्वसूचकानि वाक्यानि च समाह्याणि ।

बहूनां विदुषां गेहे गत्वा गत्वा मयेक्षितम् ।
स्वच्छताविषये सम्यग् ध्यानं नो ददते बुधाः ॥२॥
नीचैर्धूलिमयी भूमिः उपर्युपरि जालकम् ।
भित्तयो मलिनैश्चिह्नै रङ्किताः, सकरः क्वचित् ॥३॥
तमालभक्षिणां गेहे त्वितोऽपि निकृष्टा स्थितिः ।
निष्ठीवनेन सर्वोऽपि लक्ष्यते दूषिता मही ॥४॥
किं नाम लगति द्रव्यं प्रत्यहं गृहमार्जने ।
किन्तु सामान्यमप्येतत् कार्यं न क्रियते जनैः ॥५॥
कामसूत्रे तु शोभायाः स्वच्छतायाश्च वेश्मनः ।
वात्स्यायनेन मुनिना माहात्म्यं बहु कीर्तितम् ॥६॥ ॐ
परं नियमितं यत्र जायते नैव मार्जनम् ।
तत्र शृङ्गार-शोभादि-विषये किन्तु कथ्यताम् ॥७॥
एवमेव समस्तेषु प्रायो विद्यालयेष्वपि ।
स्वच्छताविषये ध्यानं ददते नहि पण्डिताः ॥८॥
यादृशे तादृशे वापि स्थाने स्थित्वा मलीमसे ।
आचार्या अथवा शिष्याः पाठयन्ति पठन्ति च ॥९॥
"स्वच्छे स्थाने निवस्तव्यं, मार्जनीयं स्वयं गृहम् ।
भित्तयो निर्मला रक्ष्याः, अपनेयं च जालकम् ॥१०॥
सुदूरेऽवकरः क्षेप्यो, दूरे निष्ठीवनं तथा ।
भवनं परितो रोप्यं तुलसीकुसुमादिकम् ॥११॥

ॐ यथा—वेश्म च शुचि, सुसमृष्टस्थानम्, विरचितविविधकुसुमम्, श्लक्ष्ण भूमितलं, हृद्यदर्शनम्, त्रिषवणाचरितबलिकर्म, पूजितदेवायतनं कुर्यात् ।

नह्यतोऽन्यत् गृहस्थानां चित्रग्राहकमस्तीति गोनर्दीय ।
वात्स्यायनकामसूत्रम्, चतुर्थेऽधिकरणे प्रथमोऽध्याय ।

गृहवस्त्रादीनां स्वच्छतासौन्दर्यादिसम्पादनविषये काव्यमीमांसाया दश मोऽध्यायोऽपि द्रष्टव्य ।

देवाना, प्राकृतानां च वस्तूनां, विदुषां तथा ।
आदर्शपुरुषाणां च कर्तव्यश्चित्रसंग्रहः ॥१२॥*
सुन्दराणि च वाक्यानि लेखित्वा सुन्दराक्षरैः ।
बहिरन्तस्तथा द्वारे लम्बनीयानि भित्तिषु ॥१३॥†
एवं शुभविचाराणामुदयो नहि जायते ।
हृदये गुरुशिष्याणामित्याश्चर्यपदं महत् ॥१४॥
हिन्त्याङ्ग्लपाठशालानां दृष्ट्वाऽपि रमणीयताम् ।
पण्डिता अथवा छात्रास्तथा कार्यं न कुर्वते ॥१५॥
एवमेव च वस्त्राणां स्वच्छताविषयेऽप्यहो ।
बहवः पण्डिता ध्यानं प्रायेण ददते नहि ॥१६॥
बहुवेतनवन्तोऽपि बुधाः केचन वीक्षिताः ।
मया संस्कृतशालासु मलिनाम्बरधारिणः ॥१७॥
वेतनस्य तु वृद्ध्यर्थं यतन्ते ते निरन्तरम् ।
परं स्वरूपरक्षार्थं यत्नस्तेषां न दृश्यते ॥१८॥
वसते मलिनं वस्त्रं आसते मलिने कटे ।
शेरते मलिने तल्पे समर्था बहवो बुधाः ॥१९॥
आङ्ग्लाध्यापकेभ्योऽपि वाञ्छन्त्यधिकवेतनम् ।
व्ययं तथाविधं किन्तु कर्तुं नेच्छन्ति पण्डिताः ॥२०॥
स्थाने स्थाने मया दृष्टा बहवस्तादृशा बुधाः ।
व्ययमायानुरूपं ये वस्त्रादौ नैव कुर्वते ॥२१॥
कञ्चुकं मलिनं धृत्वा बद्ध्वाप्युष्णीषं मलीमसम् ।
उपानद्रहिता एव विचरन्ति यतस्ततः ॥२२॥
श्रुत्वा समागमिष्यन्तं पाठशालानिरीक्षकम् ।
अथवाऽवसरे प्राप्ते विशिष्टे दैवयोगतः ॥२३॥

---

* प्राचीनानां तथा आधुनिकानाञ्च देशविदेशवासिनां संस्कृतविदुषां चित्रसंग्रहविषये कार्यालयेन सह पत्रव्यवहारः कर्तव्यः ।
† भित्तिषु अवलम्बनाय कार्यालयद्वारा प्रकाशितानि सूक्तानि संस्कृतमहत्त्वसूचकानि वाक्यानि च संग्राह्याणि ।

अन्येषां प्रेरणाद् वापि लोकलज्जाभयात्तथा ।
बुधैर्वस्त्राणि स्वच्छानि विधीयन्ते कथंचन ॥२४॥
मलिनैः वसनैः केचित् श्मश्रुवृद्धया च केचन ।
ईहन्ते प्रकटीकर्तुम् ऋषितुल्यत्वमात्मनः ॥२५॥
परन्तु नहि मालिन्याद् ऋषित्वमुपलभ्यते ।
श्मश्रुवृद्धया न वा कश्चिद् महात्मा खलु जायते ॥२६॥
अतः समस्तैर्विद्वद्भिर्देहे गेहे च वाससि ।
सततं स्वच्छता रक्ष्या यथासमयसाधनम् ॥२७॥
न वाऽडम्बरबाहुल्यं नरा दैन्यमयी स्थितिः ।
मध्यमेन पथा सर्वैर्वर्तितव्यं मनीषिभिः ॥२८॥

गेह-देह-परिधान भूषणाऽच्छादनास्तरण कादि वस्तुषु ।
स्वच्छता यदि बुधेन रक्ष्यते शिक्षितेषु विपुलादेशः भवेत् ॥२९॥

दशमः सन्देशः

(संस्कृतशिक्षितानां जीवने प्रायेण आध्यात्मिकोत्कर्षस्य मनोबलस्य चाभावमुद्दिश्य)

इदं च मे महद्दुःखं यदाधुनिकशिक्षया ।
न कोऽप्याध्यात्मिकोत्कर्षः संस्कृतज्ञेषु दृश्यते ॥१॥
प्रायः संस्कृतशिक्षेयं सर्वैरपि मनीषिभिः ।
दृष्ट्याऽध्यात्मिकयाऽत्यन्तं मन्यते लाभकारिणी ॥२॥
परन्त्वाध्यात्मिको लाभः को वा सम्प्रति जायते ।
छात्राणां पण्डितानां वा इति चिन्त्यं विचारकैः ॥३॥

तथाहि—

मनसः शुचिता, सत्यं, सर्वेषां हितचिन्तनम् ।
परदुःखासहिष्णुत्वं सौहार्दं सकलैः सह ॥४॥
औदार्य्यम्, आर्जवं, साम्यं विचारव्यवहारयोः ।
ईर्ष्याऽसूयापरित्यागो दम्भपाखण्डवर्जनम् ॥५॥
निरहङ्कारिता, सौम्यः स्वभावो, नम्रता परा ।
न निन्दा न घृणा क्वापि नोपहासश्च कस्यचित् ॥६॥

लघूनामपि सम्मान सर्वेषां गुणकीर्तनम् ।
कष्टेऽपि दृढता धर्मे दुःखेऽपि मुदिता परा ॥७॥
अलाभेऽप्यथवा लाभे तथा हर्षविषादयो ।
निर्विकार मन , कामक्रोधलोभादिसंयम ॥८॥
महीयानात्मविश्वासोऽदम्य उत्साह एव च ।
मनोबलमजेयं चाऽपराजेया सहिष्णुता ॥६॥
एतासामेव वृत्तीनां शुभानामुदयेन तु ।
आध्यात्मिक समुत्कर्षो मानवस्याऽनुमीयते ॥१०॥
यावन्नोदयते सैषा ज्योत्स्ना हृदयमन्दिरे ।
तावन्मानवताया न प्रकाश सुमनोहर ॥११॥
अतस्तादृशवृत्तीनामुदये खलु सत्तमम् ।
उपकारीति तज्ज्ञान शिक्षाविद्भि प्रशस्यते ॥१२॥
पर संस्कृतशिक्षेय यादृशी दीयतेऽधुना ।
तत्राऽध्यात्मगुणोन्नत्यै व्यवस्था नास्ति काचन ॥१३॥
के केऽध्यात्मगुणास्तेषामुदयश्च कथ भवेत् ।
बाधास्तत्र च का मुख्या कथं तासाञ्च वारणम् ॥१४॥
केन केन च यत्नेन कया भावनया तथा ।
जीवन सुखद शुद्ध शक्यते कर्तुमञ्जसा ॥१५॥
एतेषा विषये चर्चा चिन्तन वाऽथ शिक्षणम् ।
नास्ति संस्कृतशिक्षाया महाविद्यालयेष्वपि ॥१६॥
तस्मादेव सुधीवृन्दे छात्राणामथवा गणे ।
नहि तन्निर्मल दिव्य स्वरूपमुपलभ्यते ॥१७॥

तथा हि—

मनस शुचिता तावत् सर्वैरध्यात्मवादिभि ।
आध्यात्मिकाना लाभाना परमो लाभ ईरित ॥१८॥
महत्त्व मनस शुद्धे यथा शास्त्रेषु कीर्तितम् ।
न तथाऽपरशुद्धीनामिति सर्वत्र निर्णय ॥१९॥

शिक्षायाश्चरम लक्ष्यं विद्याया परमं फलम् ।
ज्ञानस्यात्यन्तिको लाभो हृदयस्य पवित्रता ॥२०॥
स्नानसन्ध्याव्रतस्तोत्रपूजाभजनकर्मणाम् ।
सर्वेषामन्तिम साध्य केवल शुद्धजीवनम् ॥२१॥
पर संस्कृतशिक्षाया पारगेषु बहुष्वपि ।
प्रायशो मनस शुद्धिर्विरलैवोपलभ्यते ॥२२॥
पूजायामथवा पाठे यज्ञेऽनुष्ठानकर्मणि ।
नियुक्तावथ माध्यस्थ्ये परीक्षोत्तरशोधने ॥२३॥
दक्षिणासु, व्यवस्थाना दाने, वादविवादयो ।
शुद्धान्त•करणा प्रायो दृश्यन्ते विरला जना ॥२४॥
मन्यते वैदिको धर्म सर्वश्रेष्ठोऽस्मदादिभि ।
पर वैदिकलोकाना कीदृशी नु दशाऽधुना ॥२५॥
क्षेमेन्द्रकथिता प्राय सर्वे दम्भादयोऽधुना ।
संस्कृतज्ञसमाजेऽस्मिन् विलोक्य ते यतस्तत ॥२६॥*
एव साधारणैश्चापि हेतुभिर्बहवो बुधा ।
व्यवहारपथ शुद्ध हित्वा प्राप्नुवतेऽयश• ॥२७॥
बहूना विदुषा दोषादेतस्मादेव विश्रुतात् ।
निशुद्धा अपि विद्वास शङ्क्यन्ते प्रायशो जनै ॥२८॥
अत संस्कृतशिक्षाया व्यवस्था तादृगिष्यते ।
यथा तत्पाठकाना स्यात् जीवन खलु संस्कृतम् ॥२९॥
यदि नो संस्कृता भाषा यदि नो संस्कृता क्रिया ।
यदि नो संस्कृता दृष्टि संस्कृताऽध्ययनेन किम् ॥३०॥
अत स्वोत्कर्षलाभाय राष्ट्रस्यापि हिताय च ।
बुधै संस्कृतशिक्षायामादर्श स्थाप्यतां नव ॥३१॥

---

* अवलोक्यता क्षेमेन्द्रविरचितस्य कलाविलासस्य दम्भप्रकरणम् । एतस्यैव देशोपदेश-नर्ममालानामकौ ग्रन्थावपि अवश्यमवलोकनीयौ ।

ये ये संस्कृतसाहित्ये प्रसंगा उत्तमोत्तमाः ।
*उपदेशाश्च वर्तन्ते ध्यात्मगुणवर्द्धका ॥३२॥**
तथैव हिन्दीभाषायामन्यभाषासु चोत्तमा ।†
ग्रन्था ये सन्ति लोकाना चेत:संस्कारकारका ॥३३॥
तेषामध्ययनस्यापि, मननस्यापि, कर्मणा—
तथैवाऽऽचरणस्यापि शिक्षण देयमुत्तमम् ॥३४॥
शुद्धजीवननिर्वाहे काठिन्य चेत् प्रतीयते ।
तन्निवारयितुञ्चापि पन्था कश्चिद् विचिन्त्यताम् ॥३५॥
केवल पाठमात्रेण केवलञ्च परीक्षया ।
धर्माऽध्यात्मसमस्यानां समाधान न जायते ॥३६॥
एतस्मिन् विषये सर्वैर्विद्वद्भि शान्तिपूर्वकम् ।
विचारो गहन कार्यो निर्णयश्चापि कश्चन ॥३७॥
धर्माऽध्यात्मगुरून् हित्वा भवतो नु पुरातनान् ।
अन्य क प्रार्थये, दु ख कमन्य वा निवेदये ॥३८॥

---

* यथा—

उपनिषदाम्, आरण्यकानाम्, गीताया , योगवाशिष्ठस्य, मनुस्मृते , महाभारतीयशान्तिपर्वण , श्रीमद्भागवतस्य, बोधसारस्य, अष्टावक्रसंहिताया , अध्यात्मरामायणस्य, योगसूत्रस्य, पञ्चदश्या , उपदेशसाहस्र्या तथा अन्येषामपि दर्शनग्रन्थानामाध्यात्मिका अशा ।

† आध्यात्मिकविकासविषये निम्नाङ्किता ग्रन्था अवलोकनीया —

१—दासबोध , सन्त समर्थ गुरु रामदास ।
२—गीतारहस्य, लोकमान्य तिलक ।
३—विवेक और साधना, केदारनाथ ।
४—जीवनशोधन, किशोरलाल मशरूवाला ।
५—मनुष्य का विराट् रूप, } आनन्दकुमार ।
६—आत्मविकास, }
७—साधना, रवीन्द्रनाथ ठाकुर ।
८—अमृत मन्थन, डा० मङ्गलदेव शास्त्री ।
९—जीवनदर्शन, डा० मुशीराम शर्मा ।

पूर्णे संस्कृतसाहित्ये या विद्या या च संस्कृतिः ।
अध्यात्ममेव तस्यास्तु हृदयं निखिलैर्मतम् ॥३९॥
इदमेव परा विद्या इदमेव परो गुणः ।
इदमेव परा दृष्टिः सर्वेषां सुखशान्तिदा ॥४०॥
तदेव यदि शिक्षायामित्थं सर्वैरुपेक्षितम् ।
तदा हृदयहीनेयं शिक्षा जाता मृता यथा ॥४१॥
शिक्षणे वर्तमानेऽस्मिन् आन्वीक्षिक्या अभावतः ।
दृष्टिरेव विनष्टाऽसौ सर्वेषामीक्षणात्मिका ॥४२॥
किमिदं जीवनं, कोयमात्मा, कास्तस्य शक्तयः ।
कथं तासां विकासश्च, स्वयं वा, साधनेन वा ॥४३॥
विकाराश्च पुनर्मानाऽपमान-सुखदुःखजाः ।
शमनीयाः कथं, केन शोध्या वा चित्तवृत्तयः ॥४४॥
जीवनस्य विकासाय साफल्याय च पण्डितैः ।
सर्वैः सर्वमिदं ज्ञेयं ज्ञापनीयं च तत्त्वतः ॥४५॥
एतस्मिन् विषये केचिद् ग्रन्थाः संस्कृतभाषया ।
लेख्याः कैश्चिद्विपश्चिद्भिरिति मे प्रार्थना परा ॥४६॥
एवं मनोबलस्यापि ज्ञाने तत्साधने पुनः ।
विद्वद्भिः कृपया ध्यानं देयं तद्बोधने तथा ॥४७॥

आध्यात्मिकीं पुनरवाप्य निजां पुराणां
शक्तिं, प्रदर्श्य च बुधा व्यवहारतस्ताम् ।
सर्वैर्गुणैरुपचितो भवतां समाजो
भूयो जगद्गुरुपदं लभतां वरिष्ठम् ॥४८॥

एकादशः सन्देशः

(समाजव्यापिनीं दीनताया हीनतायाश्च भावनामुद्दिश्य)

अयं तु भवतां भावो मम दुःखातिदुःखदः ।
यद् भवन्तो बुधाः प्रायो दीनहीना इवासते ॥१॥

अन्यान्यभाषाभिज्ञेषु समवेतेषु सूरिषु ।
पण्डिता अवलोक्यन्ते भीता इव हता इव ॥२॥
न तेजो न समुत्साहो न मानो नाम्रगामिता ।
न प्रागल्भ्य न वाऽमर्प सस्कृतज्ञेषु दृश्यते ॥३॥
अदीना स्याम इत्येत मन्त्रजापजुपामपि ।
विदुषा वदनाद् याता न दैन्यदुरितच्छटा' ॥४॥
रूप देहि जय देहि यशो देहीति नित्यश ।
पठन्तोऽपि क्षुधा दृष्टा भिक्षुका इव कातरा ॥५॥
भूयो भूयोऽपि शोचन्ती परमेतस्य कारणम् ।
नावधारयितु किञ्चित् प्रभवामि कथञ्चन ॥६॥
को नाम दोषो भाषायां साहित्ये किन्नु कल्मषम् ।
तज्ज्ञाने कोऽपराधो वा येन यूय विषीदथ ॥७॥
कथ्यते देवभाषा या गीयते याऽखिलैर्जनै ।
जननी याऽन्यभाषाणां हीनास्तत्पाठका कथम् ॥८॥
दारिद्र्यादथ चेद् यूयमेतस्मिन्नाथिके युगे ।
आत्मानमनमन्यध्वे लज्जध्वे वाऽथ विभ्यथ ॥९॥
पर त्वेपाऽपि वो बुद्धिर्युक्ता भाति न मे यत —
स्वीकृत यत् स्वय कष्ट तत्र का परिदेवना ॥१०॥
इद तु खलु दारिद्र्य भवतामेव पूर्वजै ।
निधानमिव भूतीना स्वेच्छयैवोररीकृतम् ॥११॥
क्षत्रियेभ्यो भुव दत्वा वैश्येभ्यश्चाथ सम्पद ।
शूद्रेभ्य शिल्पसेवादि स्वय जातास्तपस्विन ॥१२॥
निवृत्ता लोकवृत्तेभ्य सुखसभोगनिस्पृहा ।
विद्याभ्यासरता भूत्वा तपस्तीव्र वितेनिरे ॥१३॥
ज्ञानविज्ञानचर्चायामन्तरायभयाद् द्विजै ।
भौतिक्य सम्पद सर्वा आगता अप्युपेक्षिता ॥१४॥
प्रार्थिता अपि विद्वासो भूयो भूयो नरेश्वरै ।
नस्वीचक्रुर्धन किञ्चिद् बहवो निर्धना अपि ॥१५॥

केवल न च विद्वांसस्तेषा प्रायोऽङ्गना अपि ।
परन्तु प्रज्ञाभिवृद्ध्यर्थं जाता भोगेषु निस्पृहा ॥१६॥ *
विद्या ब्राह्मणमागत्य ययाचे निजरक्षणम् । †
ब्राह्मणैश्च वचस्तस्या गृहीत परमादरात् ॥१७॥
तदिद व्रतमारम्भाद् बहुकालावधि द्विजै ।
नानाकष्टानि सोढ्वापि दार्ढ्यं न परिपालितम् ॥१८॥
ब्राह्मणेन तु निष्काम षडङ्गा श्रुतयोऽखिला ।
धर्मश्चाध्येय इत्येन स्वधर्म खलु निश्चित ॥१६॥ §
अहो निस्पृहता तेषा कीदृशी यत् स्वय नु ते ।
कुम्भीधान्यत्वमुद्दिष्ट शिष्टब्राह्मणलक्षणम् ॥२०॥ $
वेद एव पर वित्तं गायत्री देवता परा ।
ज्ञानमेव पर साध्य ब्राह्मणानामभूत् पुरा ॥२१॥
भग्ना भित्तिश्छदि शीर्णा समिधो गोमया कुशा ।
मन्त्रिणामपि विप्राणा गृहस्यासन् विभूतय ॥२२॥ £

---

* यथा नवद्वीपवासिन श्रीरामनाथ तर्कसिद्धान्तस्य पत्नी । (नवद्वीपमहिमा पृ० ३१३)
यथा च दार्शनिकशिरोमणे श्रीवाचस्पतिमिश्रस्य पत्नी भामती ।

† विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि ।
असूयकायाऽनृजवेऽयताय मा मा ब्रूया वीर्यवती तथा स्याम् ॥ निरुक्तम्

§ ब्राह्मणेन निष्कारणो धर्म षडङ्गो वेदोऽध्येयो ज्ञेयश्च । महाभाष्यम्

$ एतस्मिन्नार्यनिवासे ये ब्राह्मणा कुम्भीधान्या अलोलुपा अगृह्यमाणकारणा किञ्चिदन्तरेण कस्याश्चिद्विद्याया पारगास्तत्रभवन्त शिष्टा । महाभाष्यम् ६,३,१०६

£ यथा आर्यचाणक्यस्य गृहवर्णनम्—
उपलशकलमेतद् भेदक गोमयाना
वटुभिरुपहृताना बर्हिषा स्तोम एष । (अग्रेऽपि)

अधार्मिकाणां दत्तानां दुष्टानां धनिनां गृहे ।
धनार्थं विदुषा क्वापि नहि हस्तौ प्रसारितौ ॥२५॥ ॐ
अधुनाऽपि गताब्देषु नवद्वीपादिवासिभिः ।
पण्डितैर्विहितस्त्याग कस्य नो विस्मयावह ॥२४॥
तेषां तमद्भुत त्यागं दृष्ट्वा श्रुत्वा द्विजन्मनाम् ।
न केषां भारतीयानां शिरो गौरवमावहेत् ॥२५॥
तेषां त्यागादिना मुग्धैर्देश्यै र्विदेशिकैस्तथा ।
विविधेषु निबन्धेषु प्रशंसा महती कृता ॥२६॥†

शरणमपि समिद्भिः शुष्यमाणाभिराभि—
विनमितपटलान्त दृश्यते शीर्णकुड्यम् ॥
मुद्राराक्षसम् — —१५

ॐ यथाह वेदान्तदेशिकाचार्य —

ज्वलतु जलधिक्रोडक्रीडत्कृपीटभवप्रभा—
प्रतिभटपटुज्वालामालाकुलोजठरानल ।
तृणमपि वय सायं सफुल्लमल्लिमतल्लिका—
परिमलमुचा वाचा याचामहे न दुरीश्वरान् ॥
वैराग्यपञ्चकम्

† प्राचीनविदुषां त्यागविषये निम्नाकिता ग्रन्था अवलोकनीया —

१—नवद्वीप महिमा [वगीयविदुषां विशेषतश्च नवद्वीपवासिना वैशिष्ट्य परिचायको वगभाषामय ग्रन्थ, लेखक श्री कान्तिचन्द्र राढी]

२—संस्कृत विद्याचे पुनरुज्जीवन [दाक्षिणात्यविदुषां वैशिष्ट्यपरिचायको मराठीभाषाया ग्रन्थ । अस्मिन् ग्रन्थे अन्येपि अनेके ज्ञातव्यविषया चर्चिता सन्ति । लेखका अस्य श्री नरसिंह चिन्तामणि केलकर महोदया]

३—श्री रामलोचनशरण विहारी अभिनन्दन ग्रन्थ [अत्र मैथिलविदुषां वैशिष्ट्य बोधका लेखा द्रष्टव्या]

४—संस्कृत साहित्यम् [राजराजवर्म्म राजा विरचित मलयालमभाषाया पुस्तकमिदम् । अत्र केरलीय विद्वद्विषयको लेख केरलीयविदुषां सम्बन्धे द्रष्टव्य]

(अग्रेऽपि)

अस्मिन्नर्थप्रधानेऽपि युगे भारतभूतले ।
तादृशास्त्यागिनो धन्या विद्वांसो नैव दुर्लभा ।२७।।
पश्यन्तु कविराज त गोपीनाथ महामतिम् ।
येन लक्ष्मी स्वय विद्योपासनायै विवर्जिता ।।२८।।
सच धन्यो महामान्यस्त्यागमूर्तिर् "महाशय." ।
यस्य निस्पृहता विद्वत्समाजे सर्वविश्रुता ।।२६।।
अहो पश्यत त दिव्य काशीनाथ महाकविम् ।
यस्याऽपूर्व मनस्वित्व परा काष्ठामुपागतम् ।।३०।।
येनाऽभावशतै. शश्वत् पीडितेनापि भीषणै ।
प्रार्थितेनापि चाऽनेकैर्नहि याञ्चा कृता क्वचित् ।।३१।।
यदा तु सर्वमेवैतम् इतिहास द्विज मनाम् ।
चिन्तयामि तदा नेत्रे भवतो वारिविप्लुते ।।
अथैव स्वेच्छयैवेय वृता निर्धनता यदि ।
ब्राह्मणैर्लोकसेवायै तदा दैन्य किमर्थकम् ।।३२।।
अनेनैव तु वृत्तेन सर्वलोकातिशायिना ।
भवता नाम जातीनामितिहासेऽजराऽमरम् ।।३३।।
तदा किमिति सामान्यैर्निर्धनैरिव पण्डितै ।
मत्वा निर्धनमात्मान दैन्यमेव प्रदर्श्यते ।।३४।।
अथ चेदधुना पूर्वव्यवस्थाया अभावत ।
माहार्घ्येण च दारिद्र्य सञ्जात कष्टकारकम् ।।३५।।—
तदा सघटन कृत्वा प्रयतन्ता तथा दृढ ।
यथा जायेत भवतामपि सौख्यप्रदा स्थिति ।।३६।।
परन्तु सस्कृताधीतेर्दारिद्र्यादथवा पुन ।
हीनोऽस्मीति मतिस्तूर्ण हृदयादपसार्यताम् ।।३७।।

---

५ Contribution of kerala to sanskrit literture [श्रीकुञ्जीराजा लिखित केरलीयविद्वद्विषयको महत्त्वपूर्णो ग्रन्थ]
६—Pandits and Elephants (पण्डित और हाथी) By —lord laytton पृ० १२८—१३० ।

अथ संस्कृतभाषाया गौरवं कोऽपि शिक्षित ।
भारतीयो न मन्येत तज्ज्ञानुपहसेत्तथा ॥३८॥
अज्ञानमेव तत्तस्य मन्तव्य केवल तदा ।
दयनीय स च प्रीत्या बोधनीयश्च पण्डितै ॥३९॥
अथ चेद् भवतो केचिद् गौरवाऽनवधारणात् ।
भवमूल्य न मन्यन्ते हसा उपहसन्ति च ॥४०॥
तथापि भवतो चिन्ता तत्कृता नैव शोभते ।
यन्महत्त्व न यो वेत्ति श्रद्दधीत स तत् कथम् ॥४१॥
यो राष्ट्रस्य निधि रक्षेद् यश्च स्वमुदर भरेत् ।
उभयो कतर श्रेयान् इति नास्ति तिरोहितम् ॥४२॥
यदान्यैरवलाभाय स्वजातिरपि दूषिता ।
तदा कष्टेन निधाना रक्षण ब्राह्मण कृतम् ॥४३॥
अथ मत्सरिण. केचिद् ब्राह्मणानाक्षिपन्ति चेत् ।
दारिद्र्ययोपहास वा तेषा यदि वितन्वते ॥४४॥
तदा भवद्भिर्निर्भीकै शास्त्रयुक्तिपुरस्सरम् ।
तेभ्यस्तथोत्तर देयं यथा स्यान्मुखमुद्रणम् ॥४५॥
वीर कालीप्रसादोऽसौ नलिनीरञ्जनस्तथा ।
शर्म्मा कपिलदेवश्च चक्रदेवस्तथा सुधी. ॥४६॥
श्रीरामनालक शास्त्री वाजपेयी महोदय ।
स्वामी ऋषिकुमारश्च सोमयाजी महाशय ॥४७॥
शास्त्री विद्याधर पूर्णप्रसादो ब्राह्मणस्तथा ।
विद्वान् प्रकाशचन्द्रश्च वर्णेकरमहाशय ॥४८॥
यथैते निर्भया भूत्वा सर्वेषा पुरत. सदा ।
उत्तर ददते प्रौढ तथा सर्वैर्विधीयताम् ॥४९॥*

---

* एतेषा मनोरञ्जनानि दुर्जनमुखभञ्जनानि च वक्तव्यानि एतेषा पुस्तकेषु लेखेषु च अवलोकनीयानि ।

भारतीयनिधेरस्या भाषाया रक्षणं कृतम् ।
यथा न पूर्वजैस्तस्य तुलना नैव विद्यते ॥५०॥*
अद्यापि बहुविद्वांस इदं संस्कृतवाङ्मयम् ।
पूज्यं राष्ट्रधनं मत्वा सन्ति तद्रक्षणे पराः ॥५१॥
यो नैतान् बहु मन्येत यश्चैतानाक्षिपेत्तथा ।
ततो मूर्खः कृतघ्नो वा काऽन्यस्त्रिभुवने भवेत् ॥५२॥
अथवा संस्कृताधीति वैज्ञानिकयुगेऽधुना ।
मत्वा व्यर्थां भवन्तश्चेदन्तस्तापेन पीडिताः ॥५३॥
मतिरेषाऽपि युष्माकं महाविस्मयकारिणी ।
बुद्धिमान् को नु मन्येत संस्कृताध्ययनं वृथा ॥५४॥
यथा हिमाद्रिरुत्तुङ्गो गभीरः सागरो यथा ।
यथा वा व्यापकं व्योम संस्कृतं सार्थकं तथा ॥५५॥
शीतज्वरयापनं मन्ये मध्याह्ने तपता रवेः ।
यदेतत् कथनं नाम संस्कृताध्ययनं वृथा ॥५६॥
दिशः संकुचिताः स्युश्चेदमृतं गरलं भवेत् ।
तदापि सुरभाषाया वैयर्थ्यं नैव सम्भवम् ॥५७॥ †

---

* अस्मिन् विषये कार्यालयतः प्रकाश्यमाने "ब्राह्मण, देश और विदेश के विद्वानों की दृष्टि में" इति पुस्तके ब्राह्मणानां महत्त्वविषये महात्मा गान्धी, स्वामी विवेकानन्द, रवीन्द्रनाथ ठाकुर प्रभृतीनां तथा बहूनां वैदेशिकानाञ्च विचाराः पठनीयाः ।

† संस्कृतशिक्षायाः सार्थक्यविषये निम्नलिखितानि पुस्तकानि द्रष्टव्यानि—

१—Report of the Sanskrit Commission (संस्कृतायोग विवरणम्) पृ० ६६—६१

२—वाराणसेयसंस्कृतविश्वविद्यालयस्य प्रथमोपकुलपतिभिः श्रीमदादित्यनाथझामहोदयैर्विहितानां संस्कृतसम्बन्धिभाषणानां संग्रहः ।

३—संस्कृतगौरवगानम् (कार्यालयद्वारा प्रकाशितं संस्कृतोपयोगितासम्बन्धि हिन्दीकवितामयं पुस्तकम्) ।

४—संस्कृतसम्बन्धिनां भाषणानां लेखानां च संग्रहः (कार्यालयद्वारा अचिरादेव प्रकाशयिष्यमाणः) (अग्रेऽपि)

मन्ये विज्ञानमधुना चरमामुन्नतिं गतम् ।
महोपकारकञ्चेदं मन्ये मानवजीवने ॥५८॥
परं विज्ञानमात्रेण केवलं नहि मानवः ।
शक्तो मानवतां प्राप्तुं जीवितुं वा महीतले ॥५९॥
अत एवाऽधुना सर्वे देश्या वैदेशिकास्तथा ।
विचारका न मन्यन्ते विज्ञानं केवलं हितम् ॥६०॥†
धर्मोऽध्यात्मं सदाचारो रीतयो नीतयस्तथा ।
दर्शनञ्चेतिहासश्च काव्यं साहित्यमेव च ॥६१॥
सङ्गीतं नाटकं नृत्यं वैद्यकं विविधाः कलाः ।
अर्थशास्त्रं कामशास्त्रं मोक्षशास्त्रं तथैव च ॥६२॥
सामुद्रिकं ज्यौतिषं च तन्त्रं मन्त्रादिकं तथा ।
शिक्षा व्याकरणं छन्दो भाषाविज्ञानमेव च ॥६३॥
इमा अप्यपरा विद्या बह्व्यः सन्ति महीतले ।
नराणां जीवने तेषां विकासे च सहायिकाः ॥६४॥
सर्वासामपि चैतासां विद्यानां सहयोगतः ।
प्राप्नोति परमोत्कर्षं संस्कृतिः सभ्यता तथा ॥६५॥
अथेमा यदि विद्यन्ते विद्याः संस्कृतवाङ्मये ।
संस्कृताध्ययनं व्यर्थं तदा मन्येत वा कथम् ॥६६॥
पर्वोत्सवाः समारम्भा विविधा धार्मिकास्तथा ।
एतेऽप्यावश्यका नूनं ज्ञेया जातीयजीवने ॥६७॥
तदेषामपि सर्वेषां कर्मणां हितकारिणाम् ।
संसिद्धिः संस्कृतेनैव भारतेऽद्यापि जायते ॥६८॥

—अमरभारती (आन्ध्रभाषाया संस्कृतमहत्त्वसूचकं कवितामयं पुस्तकम्) ।
—संस्कृत संस्कृति का विश्व सन्देश श्री प्रो० विद्याधर शास्त्री, बीकानेर ।

एतद्विषये परिज्ञानाय डा० सर्वपल्ली राधाकृष्णन्, प० जवाहरलालनेहरू, के० एम० मुंशी, रवीन्द्रनाथ ठाकुर, स्वामी विवेकानन्द, हनुमान प्रसाद पोद्दार, सी० वी० रमणप्रभृतीनां लेखा अवलोकनीयाः ।

भावनाऽनुभव स्वाभिमानो राष्ट्रीयता तथा ।
मनुष्यता पञ्चशील विश्वबन्धुत्वमेव च ॥६९॥
एतेऽपि निखिला भावा सस्कृतस्यानुशीलनात् ।
यथा पुष्टि समायान्ति न तथाऽन्येन केनचित् ॥७०॥
अथ चेत् सस्कृताधीतिर्नष्टा स्यादद्य देशत ।
कथ सुरक्षिता तिष्ठेद् भारतीया नु सस्कृति ॥७१॥
सस्कृतेभरितीयाया ज्ञाने वा रक्षणेऽपि वा ।
प्रसादे वापि भाषेय साधन सर्वसम्मतम् ॥७२॥
अथ चेद्दीर्घदृष्टीना विदुषामनुभूतय ।
भवन्ति हितकारिण्यो मानवाना पदे पदे ॥७३॥
अध्येया तु तदा सर्वै सुरभाषैव केवलम् ।
नीतीनामनुभूतीना सूक्तीनाञ्चाद्भुतो निधि ॥७४॥
अथ वैदेशिकानाञ्चेल्लाभो भवति सस्कृतात् ।
तदा नु भारतीयाना कथ लाभो भवेन्नहि ॥७५॥

भारतीय भाषासाहित्य सस्कृतिसभ्यतानामध्ययनेन लाभविषये वैदेशिकै विद्वद्भि प्रकटीकृता सद्विचारा निम्नाङ्कितेभ्यो ग्रन्थेभ्य पठनीया —

The wonder, that was India (By A L Basham)
India, what can it teach us (By Max Mnller)
The Hidden teaching Beyond yoga (By Paut Brunton

Yoga vasistha and Modern thought (By B L Atreya

Hindu glory (शास्त्रधर्म प्रचार सभा, कलकत्ता)
Indian Inheritence (भारतीय विद्या भवन, मुम्बई)
कल्याण—हिन्दू सस्कृति अङ्क, गीता प्रेस गोरखपुर
भारतस्य सास्कृतिकनिधि डा० रामजी उपाध्याय, सागर विश्वविद्यालय
जगद्गुरु भारतवर्ष
अन्ये च वैदेशिकैर्लिखिता सस्कृतसाहित्येतिहासग्रन्था ।

प्राप्ता चोपनिपत्पाठै शान्तिर्वैदेशिकैर्यदि ।
भारतीयैस्तदा सेयं कथ लब्धु न शक्यते ॥७६॥
अथ सेक्सपियर शैली मिल्टन प्रभृतिनिर्मिते ।
यदि काव्यादिभिः कश्चिल्लाभ' पुसां प्रजायते ॥७७॥
तदा स एव लाभोऽत्र भारतीयैर्मनोहरै ।
काव्यैर्वा नाटकैर्वापि कथं लब्धु न शक्यते ॥७८॥
यदि शर्मण्यदेशीयो गेटेनामा महाकवि ।
निमज्जति मुदम्भोधौ अवलोक्य शकुन्तलाम् ॥७९॥
तदा भारतदेशीयै कालिदासकुलोद्भवैः ।
स्वल्पोऽपि किमु नान्द सम्प्राप्तु शक्यते तत ॥८०॥
गीतगोविन्दगीतेन आर्नोल्डो यदि मुह्यति ।
तदा किं न भवेन्मोदो भारतीयजनेष्वहो ॥८१॥
अथ पाणिनिसूत्राणां निरुक्तस्य च शीलनात् ।
यदि वैदेशिका जाता भाषाशास्त्रस्य पण्डिता ॥८२॥
तदा भारतदेशीयास्तत्तद्भाषाविदो बुधा ।
कथ लाभाऽन्विता न स्युरुभयोरनुशीलनात् ॥८३॥
लाभो विदेशिनां जातो यदि योगानुशीलनात् ।
तदा तद्भूमिजातानां जनानां न कथ भवेत् ॥ ८४॥
अथ व्यक्तित्वनिर्माणे तदुत्कर्षे च संस्कृतम् ।
पर साधनमित्येतदपि वैदेशिका जगु ॥८५॥
तदा किमिति तच्छिष्यम्मन्यैराङ्गलपण्डितै ।
इहलोकोपयोगित्व संस्कृतस्य न मन्यते ॥८६॥
सुलभा संस्कृताधीतेरेव लाभा अनेकश ।
तत् कथ ननु मन्तव्य ज्ञानमस्य निरर्थकम् ॥८७॥
अथ संस्कृतविद्येयं विज्ञान विरुणद्धि नो ।
आदौ तु संस्कृतादेव विज्ञानमुदपद्यत ॥८८॥

त्रिस्कन्ध ज्योतिष चायुर्वेदोऽप्यष्टाङ्ग एव च ।
नानाविषयसम्बद्धा शिल्पग्रन्था अनेकश ॥८६॥ॐ
नौकारथास्त्रशस्त्रादिरचना वस्त्रनिर्मिति' ।
प्रासादनगरीरथ्यानिर्माणादिकला अपि ॥६०॥
खनिविद्या धातुविद्या रत्नविद्या दगार्गलम् ।
पशूना पक्षिणा विद्या विषविद्या रसायनम् ॥६१॥
कृषिविद्या च वाणिज्य रङ्गविद्या च चित्रणम् ।
क्रीडा बहुविधा रम्याश्चतुरङ्गादयस्तथा ॥६२॥
एव बहुविधा विद्या भौतिक्योऽप्यभवन् पुरा ।†
तासा देशे प्रयोगश्च सर्वासामप्यजायत ॥६३॥

ॐ अवलोक्यता श्रीगोविन्दगजाननजोशीमहोदयै प्रकाशितो निखिलशिल्पकलाग्रन्थनिरूपणात्मको लेखसमुच्चय । प्राप्तिस्थानम्—पी० डब्ल्यू० डी० सेक्रेटरियेट, नागपुरम् । अय लेखसमुच्चयो दशभी रूप्यकैर्लभ्यते अवश्यमेव जिज्ञासुविद्वज्जनैरवलोकनीय ।

† विषयेऽस्मिन्नधस्तना ग्रन्था अवलोकनीया'—

१—वैज्ञानिक विकासकी भारतीय परम्परा (ले० डा० सत्यप्रकाश)
२—Positive sciences of the Hindus (by Brajendra nath seal)
३—Hindu Chemistry (by Prafull chandra Roy)
४—गोवर्द्धनपीठाधीश्वर श्रीभारतीकृष्णतीर्थमहोदयाना सस्कृतरत्नाकरे वेदाङ्के प्रकाशित कवितामयो महानिबन्ध ।
५—the Positive Back ground of Hindu Sociology Book I, II (Two Parts)
६—इन्द्रविजय (भारतवर्षायायोपाख्यानम्) श्रीमधुसूदनशर्मभामहोदयै प्रणीत सर्वैरपि पण्डितै सर्वथाऽवलोकनीयश्च ।
७—प्राचीनभारते उद्भिद्विद्या (बगला) शान्तिनिकेतन ।
८—भारतीय ज्योतिष का इतिहास डा० गोरखप्रसाद तथा दीक्षित ।
९—हिन्दुत्व श्रीरामदास गौड़ ।
१०—Hindu glory शास्त्रधर्मप्रचारसभा चौरंगी, कलकत्ता ।
११—प्राचीन भारत के कलात्मक विनोद । डा० हजारीप्रसाद द्विवेदी ।

अद्यापि भारतेऽपूर्वं स्थापत्ये यद्विलोक्यते ।
तत् किं सर्वं विदेशीये शिल्पाचार्यैविनिर्मितम् ॥६४॥
ततोऽधिकन्तु यत्किञ्चिद् विज्ञानं वर्द्धतेऽधुना ।
तस्य सर्वस्य सुप्रीत्या कुर्मः सुस्वागतं भृशम् ॥६५॥
परं तेनैव कल्याणं सम्पूर्णं भविता भुवः ।
व्यर्था विद्याः पराः सर्वा नैतन्मन्यामहे वयम् ॥६६॥
परलोकप्रधानेयं विद्या तत्रैव सौख्यदा ।
ऐहलौकिक उत्कर्षः सुलभो नाऽनया क्वचित् ॥९७॥
इत्येवं ये जना केचिदाक्षिपन्तीह संस्कृतम् ।
तैर्यथार्थतया ज्ञातं नैतत् कार्त्स्न्येन वाङ्मयम् ॥९८॥
धर्मार्थकाममोक्षाख्या पुरुषार्थाश्चतुर्विधा ।
एते सर्वेऽपि साम्येन सम्प्राप्ता अत्र वर्णिता ॥९९॥
यथा योगस्तथा भोगो यथा धर्मस्तथा धनम् ।
त्यागश्च समहश्चापि सर्वमत्र प्रतिष्ठितम् ॥१००॥
प्रासादश्च कुटीरं च कौपीनं शाटिका तथा ।
कुशासनं तूलिका च उपवासः सुभोजनम् ॥१०१॥
मैत्री वैरं, रणं शान्तिर्, दैन्यं मानो, रतिर्दमः ।
देशकालौ तथा पात्रं दृष्ट्वा सर्वं नियोजितम् ॥१०२॥
न तत् सुखं न तच्छ्रेयो न चानन्दः स भौतिकः ।
यः स्वीकृतो न चो दिष्टः पूर्वजैरार्यसत्कृतौ ॥१०३॥
यत् किञ्चिद् दूषितं पूर्वैर्वर्जितं वा विगर्हितम् ।
असंयमोऽविवेकश्च द्वयमेव न चाऽपरम् ॥१०४॥
अथाङ्गलभाषानिह्रास पाश्चात्याचारवर्जनात् ।
मत्वा प्रगतिहीनान् नो हसन्ति यदि केचन ॥१०५॥
तदा भवद्भिरप्येषा सप्रमाणं सयुक्तिकम् ।
सर्वेऽप्याचारगा दोषा उद्घुष्यन्ते कथं नहि ॥१०६॥
पाश्चात्यसभ्यतैवैका प्रगतेः परिचायिका ।
नैतत् साधयितुं शक्यं पाश्चात्यैः सकलैरपि ॥१०७॥

अन्धानुकरणस्यैतत् फल भारतवासिनाम् ।
यदेते पश्चिमाचारैर्मन्यन्ते प्रगतिं पराम् ॥१०८॥
धूमपान सुरापान नग्नस्नान तथैव च ।
आहारे च विहारे च परा सयमहीनता ॥१०९॥
चाकचिक्यमया वेषा आडम्बरमयी स्थिति ।
परानुकरणे प्रीति स्ववस्तूनामनादर ॥११०॥
एभिरेव गुणैर्नॄणा प्रगतिर्जायते किमु ।
मन्यध्वे यद्विना यूय प्रगते परिपन्थिन ? ॥१११॥
वस्तुत पश्चिमीयानामाचाराणा परीक्षणात् ।
तेषा गुणास्तथा दोषा विज्ञायन्ते यथार्थत ॥११२॥*
अतो भवद्भि स्वीयानामाचाराणा वरिष्ठता ।
साधनीया तथा स्थैय सतत स्वाभिमानिभि ॥११३॥
अत सस्कृतभाषाया विद्याया अपि वा बुधा ।
न कोऽपि तादृशो दोषो यथेय निन्दिता भवेत् ॥११४॥
अत एव तु देशस्य सर्वे मुख्या विचारका ।
स्पष्ट सस्कृतभाषाया रक्षामावश्यकीं विदु ॥११५॥†
अहो सस्कृतभाषायास्तज्ज्ञाना विदुषा तथा ।
महत्त्व को विना मूढान्न स्वीकुर्यात् सचेतन ॥११६॥

---

* अस्मिन् विषये स्वर्गीयशालिग्रामशास्त्रिणा "पाश्चात्यसभ्यता" नामक कवितामयो निबन्धोऽपि नितरा मनोरम ।

अस्मिन् विषये श्रीनरदेवशास्त्रिणा "सस्कृतके पण्डित और अग्रेजीके विद्वान्" इति लेखो नूनमवलोकनीय । कल्याण, अक्टूबर, १९५१ । तथैव "शान्तिनिकेतने ब्रह्मचर्याश्रम" इति नामक रवीन्द्रनाथठाकुरस्य वगभाषामय पुस्तकञ्च अवश्य पठनीयम् ।

† अवलोक्यता "सस्कृतशिक्षा के सम्बन्ध मे सुप्रसिद्ध नेताओं तथा विद्वानों के विचार" इति नामक सार्वभौम सस्कृत प्रचार कार्यालयेन प्रकाशित पुस्तक तथा सस्कृतायोगविवरण (Report of Sanskrit Commission) च ।

अथ ये केऽपि लभ्यन्ते दोषा पण्डितमण्डले ।
वर्णिता वा मया येऽपि केचित् कटुकया गिरा ॥११७॥
तेनाऽपि भवता हीनभावना नहि शोभते ।
अन्येष्वपि समाजेषु लभ्यन्ते दुर्गुणा न किम् ॥११८॥
भवता तु यथा भूयात् निर्दोषा सर्वथा स्थिति ।
सर्वोत्कृष्टं यशश्चेति मया सर्वं निवेदितम् ॥११९॥
सारल्यञ्च सदाचार शुचित्व पापभीरुता ।
शास्त्ररक्षणनिष्ठा च ईदृशी क नु लभ्यते ॥१२०॥
मम त्वेतदहो कष्ट यद् भवन्त स्वगौरवम् ।
स्वयमेव न जानन्ति नात्मान विश्वसन्ति च ॥१२१॥
अतोऽस्या खलु भाषाया विद्वाना विदुषा तथा ।
ज्ञात्वा पूर्णतया सर्वमितिहास पुरातनम् ॥१२२॥—
महत्त्वञ्चापि विज्ञाय लाभ तात्कालिक तथा ।
दैन्यमुत्सृज्यता तूर्णं हृष्टचित्ता भवन्तु च ॥१२३॥
आत्मनो गौरव ध्यात्वा तथा राष्ट्रोपकारिताम् ।
पूर्णविश्वाससम्पन्ना जायन्ता स्वाभिमानिन ॥१२४॥

विस्मृत्या निजयशसो दिगन्तदीप्ते—
रुद्भूत खलु मनसो विनीय दैन्यम् ।
विद्वास॰ खरतरतेजसा ज्वलन्तो
निर्भीका विचरत सर्वत समाजे ॥१२५॥

द्वादशः सन्देशः

(वाराणसेयसंस्कृतविश्वविद्यालयस्य सर्वाङ्गपूर्णता
सर्वोवयवानवद्यताञ्च उद्दिश्य)

अथ संस्कृतशिक्षाया पीठे वाराणसीपुरे ।
विश्वविद्यालयो योऽय नवीन स्थापितोऽधुना ॥१॥
तस्यापि खलु शिक्षाया व्यवस्थायास्तथा स्थितिम् ।
मनोऽनुकूला न दृष्ट्वा किञ्चित् कष्ट प्रजायते ॥२॥

इदन्तु परम मन्ये सौभाग्यमहमात्मन ।
यदय स्थापितो भव्यो विश्वविद्यालयो नव ॥३॥
धन्य स तु महावीर॰ सम्पूर्णानन्द एकल॰ ।
येनेद साहस कृत्वा महत्कार्यमनुष्ठितम् ॥४॥
स च मे धन्यवादार्हो गङ्गानाथात्मज कृती ।
विशालहृदयो धीमान् श्रीमानादित्यनाथका ॥५॥
येन स्वाप्रतिमप्रज्ञोत्साहशक्तिश्रमादिभि ।
सौजन्येन च सस्थेय नीता शीघ्र समुन्नतिम् ॥६॥
वृद्धायामपि सस्थायामेतस्या कालयोगत ।
चारुचिक्यमयी दिव्या दृश्यतेऽभिनवच्छटा ॥७॥
गोपुराणि सुरम्याणि प्राकारश्चातिशोभन ।
भवनानि विशालानि विचित्राणि वराणि च ॥८॥
कार्यालया अनेके च उद्यानञ्चातिशोभनम् ।
यज्ञशाला सुरुचिरा छात्रावासो मनोहर ॥९॥
चिकित्सासदन नाट्यशालाऽतिथिगृहन्तथा ।
वेदविद्यालय शिक्षाशास्त्रविद्यालयस्तथा ॥१०॥
अनुसन्धानशाला च विशाल पुस्तकालय ।
ग्रन्थानां पत्रिकायाश्च मनोहारि प्रकाशनम् ॥११॥
अन्ताराष्ट्रीयमत्य तोत्कृष्ट विद्यानिकेतनम् ।
तस्य छात्रालयश्चापि विभक्तोऽति मनोहर ॥१२॥
कोरिया चीन-जापान-श्याम सिंहलभूमिभि ।
विद्यार्थिनामागताना समवायो मनोहर ॥१३॥
आचार्याश्चापि भूयासो नानाशास्त्रविशारदा ।
शुक्लास्तेषा कृते मूर्द्धयो गदिकाश्चोपधानिका ॥१४॥
सर्वेषामपि शास्त्राणामध्यापनमनुत्तमम् ।
नव्यानामपि सर्वेषा विषयाणा सुशिक्षणम् ॥१५॥
वेतनञ्चापि सर्वेषा पर्याप्त तोषदायकम् ।
कार्यसम्पादने चापि प्रवीणा अधिकारिण ॥१६॥

साधनानि च सर्वाणि असंख्या कर्मचारिण ।
द्रष्टुश्चेतोहराऽपूर्वा सर्वत्र रमणीयता ॥१७॥
एतदादिकमालोक्य सर्वं दृश्य मनोहरम् ।
कस्य वा सुधियश्चेतो हर्षोत्फुल्ल न जायते ॥१८॥
परमत्रापि शिक्षाया विषये यादृगुन्नति ।
आसीदभीप्सिताऽस्माक तथा नैवावलोक्यते ॥१९॥
बाह्ये पक्षे पु सर्वेषु यथोत्कर्षोऽवलोक्यते ।
तथा कश्चित् समुत्कर्ष शिक्षादिष्वप्यपेक्षित ॥२०॥
मन्ये कृती कुलपतिस्तथान्ये चाधिकारिण ।
अचिरादेव कुर्वीरन् समीचीना व्यवस्थितिम् ॥२१॥
शुश्रूषया श्रवणतो ग्रहणाद् धारणादपि ।
ऊहाऽपोहादिभिश्च स्यात् शिक्षा सर्वगुणान्विता ॥२२॥
एतस्मिन्नूतने विश्वविद्यापीठेऽतिविश्रुते ।
आशाकेन्द्रे च भारत्या भारतीसेविना तथा ॥२३॥*—
यतितव्य तथा दत्वा प्राणानप्यधिकारिभि ।
यथा पीठमिद लोके गच्छेदादर्शरूपताम् ॥२४॥

तथाहि—

अत्राचार्या नियोक्तव्या आचार्यशतपूजिता ।
निष्णाता स्वीयशास्त्रेषु आदर्शाचारभूषिता ॥२५॥
आत्मीयोऽय सतीर्थ्योऽय सजातीयोऽथवा मम ।
अनेन महती सेवा कृता मे चाऽप्युपासना ॥२६॥

---

* यथा आशासित सन्देशवाहनेन—

हे हे सस्कृतभारति प्रियतमे व्याख्यानि शास्त्राणि न
भो भो दैन्यविपन्नपण्डितवराश्छात्राश्च चिन्तान्विता ।
धैर्यं धारयत क्षण सुरगिरोऽय विश्वविद्यालय
सर्वक्लेशनिवारणाय भवता यावत् समुज्जृम्भते ॥

इति मत्वाऽधिकारस्थैरयोग्यानधिकारिणाम् ।
न प्रवादकरी कार्या नियुक्तिः कृपया क्वचित् ॥२७॥
अस्मिन् संस्कृतविद्याया मन्दिरे विश्ववन्दिते ।
नहि मूर्ति प्रतिष्ठाप्या काचि माहात्म्यवर्जिता ॥२८॥
रूपयौवनसम्पन्ना विशालकुलजा अपि ।
स्वल्पविद्या न वै ग्राह्या सङ्कोचादथवा भयात् ॥२९॥
अस्मिन् दिव्ये सरस्वत्या लीलोद्याने मनोरमे ।
किंशुका इव निर्गन्धा रोपणीया न वै सुमा ॥३०॥
भारतीयार्यविद्याया एतन्निर्मलमम्बरम् ।
चन्द्रसूर्योपमै प्राज्ञैराकल्पान्त प्रकाशताम् ॥३१॥
आचार्यैरपि लब्ध्वाऽस्मिन् स्थाने सम्मानित पदम् ।
रक्षणीया प्रतिष्ठा सा वैदुष्येनातिशायिना ॥३२॥
विश्वविद्यालये गत्वा स्थित्वा वा भवने बुधै ।
स्वाध्यायाभ्यसनेष्वेव नेतव्या सकला कला ॥३३॥
विगतान्देष्विहस्थाना विख्याताना मनीषिणाम् ।
न कथाशेषता नेय वैदुष्य लोकविश्रुतम् ॥३४॥
पर्याप्तवेतनप्राप्त्या गृहचिन्ताविवर्जिता ।
शास्त्रावगाहने मग्ना विद्वांस सन्तु साम्प्रतम् ॥३५॥
अधुना खलु लब्धे तु सौविध्ये निखिले बुधै ।
आसक्तिरन्यकार्येषु महती स्यात् कृतघ्नता ॥३६॥
अध्याप्या सुचिर छात्रा कृत्वा पूर्ण परिश्रमम् ।
लेखनीयास्तथा लेखा ग्रन्थाश्चाप्युत्तमोत्तमा ॥३७॥
ग्रन्थाना सग्रहो भूयान् रक्षणीयो निजे गृहे ।
सकलाश्चान्यभाषीया ज्ञेया आलोचना नवा ॥३८॥
प्रत्ने नव्येऽपि सिद्धान्ते विज्ञातान्ता विपश्चित ।
देहलीदीपतुल्या स्युरुभयत्र प्रकाशका ॥३९॥
रामावतारसदृशा सुधाकरसमास्तथा ।
गणनाथसमाश्चापि गोपीनाथोपमा अपि ॥४०॥

मधुसूदनझातुल्या भवेयुर्विदुषो यदि ।
तदैवाऽस्य यशः, शोभा, प्रतिष्ठा, चरितार्थता ॥४१॥
अथ वृत्तिर्बुधैर्लब्धा पर्याप्ता यदि सम्प्रति ।
स्वरूपमपि तद् योग्यं सर्वेषामिष्यते तदा ॥४२॥
आये प्राध्यापकत्वं चेद् स्वल्पमपि न व्यये शुभम् ।
उभयो सङ्गतिः कार्या व्यवहारे मनीषिभिः ॥४३॥
एवञ्चेद् विद्यया वाचा स्वरूपेण च पण्डिता ।
सम्पन्नाः स्युस्तदा संस्था सुमहद् गौरवं वहेत् ॥४४॥
इदं प्रथमसोपानं विश्वविद्यालयोन्नते ।
यदाचार्यः, श्रमी, विद्वान्, व्याख्याता, शिष्यवत्सलः ॥४५॥*
अथेहस्थे सुविख्याते ग्रन्थागारे च तादृशः ।
अध्यक्षः कोऽपि निर्वाच्यो यस्तत्स्थानोचितो भवेत् ॥४६॥
विद्वान् विद्यानुरागी च शीलसौजन्यसागरः ।
पाठकानामुपेतानां सर्वसौविध्यकारकः ॥४७॥
प्रीत्या यो वचनं ब्रूयात् ज्ञेयं सर्वं निवेदयेत् ।
अपि दद्यात् स्वयं ग्रन्थान् गत्वा जिज्ञासवे मुदा ॥४८॥
एवंविधो यदि भवेदध्यक्षो ग्रन्थमन्दिरे ।
लाभो बहूनां जायेत कीर्तिश्चास्य गरीयसी ॥४९॥

---

* यथा प्राचीनैराचार्यविषये प्रतिपादितम्—
येषां तपः श्रीरनघा शरीरे विवेचिका चेतसि तत्त्वबुद्धिः ।
सरस्वती तिष्ठति वक्त्रपद्मे पुनन्तु तेऽध्यापकपुङ्गवा नः ॥
अमितगतिश्रावकाचार ।

ततोऽनन्तरमाचार्यं परीक्षेत । तद्यथा—पर्यवदातश्रुतं, परिदृष्टकर्माणं, दक्षं, दक्षिणं, शुचिं, जितहस्तम्, उपकरणवन्तं, सर्वेन्द्रियोपपन्नं, प्रकृतिज्ञं, प्रतिपत्तिज्ञम्, उपस्कृतविद्यम्, अनहङ्कृतम्, अनसूयकम्, अकोपनं, क्लेशक्षमं, शिष्यवत्सलमध्यापकं ज्ञापनसमर्थञ्चेति । एवं गुणो ह्याचार्यः सुक्षेत्रमार्तवो मेघ इव शस्यगुणैः सुशिष्यमाशु वैद्यगुणैः सम्पादयति ।
—चरकसंहिता, विमानस्थानम्, अष्टमोऽध्यायः ।
(अग्रेऽपि)

गत्वा गोयदकाम्रथागार पश्य तु, कीदृशम् ।
तत्र श्रीकृष्णपन्तेन सौविध्य दीयते मुदा ॥५०॥

अथ विद्यार्थिनोऽपि स्यु सत्यं विद्यार्थिनोऽखिला ।
पठने लेखने वादे वक्तृत्वे चोत्तमोत्तमा ॥५१॥
छात्राणा ये गुणा प्रोक्ता आदर्शाश्चोत्तमोत्तमा ।
तेषा सम्पादने दक्षैर्भाव्य विद्यार्थिभिर् सदा ॥५२॥
अत्रागत्य जना सर्वे दृष्ट्वा छात्रान् यथोत्तमान् ।
सुप्रीता विस्मिता स्युस्ते तथा यत्नो विधीयताम् ॥५३॥
छात्राणामल्पताहेतोर्विषीदन्ति विपश्चित ।
न तु योग्यान् प्रकुर्वन्ति यावन्त सन्ति तानपि ॥५४॥
अल्पीयासोऽपि चेच्छात्रा विद्याचारित्रशालिन ।
तावताऽपि कृतार्थोऽय विश्वविद्यालयो भवेत् ॥५५॥
अतो विद्यार्थिभि सर्वे सर्वैरध्यापकैस्तथा ।
किञ्चिद् वैशिष्ट्यमानेय महनीय महीतले ॥५६॥
अस्मिन् स्थाने निवसतो सकाशाद् गुरुशिष्ययो ।
स्व स्व चरित्र शिक्षेरन् शिष्या अध्यापका भुवि ॥५७॥

अथेयमपि वाञ्छा मे चिरादेका गरीयसी ।
यथेह कश्चिदादर्शो विशिष्ट स्थापितो भवेत् ॥५८॥
यथा गुरुकुले वापि यथा शान्तिनिकेतने ।
यथा दारुल् उलूमाख्ये अर्वीविद्यालये तथा ॥५९॥—
अपूर्वा दृश्यते काचित् संस्कृति स्वविशेषिका ।
तथैवात्रापि सस्कार कश्चिन्निर्मापिता नव ॥६०॥

श्लिष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता ।
यस्योभय साधु स शिक्षकाणा धुरि प्रतिष्ठापयितव्य एव ॥
लब्धास्पदोऽस्मीति विवादभीरोस्तितिक्षमाणस्य परेण निन्दाम् ।
यस्यागम केवलजीविकायै त ज्ञानपण्य वणिजं वदन्ति ॥

मालविकाग्निमित्रम्, १-१६-१७ ।

अधिकारिभिराचार्यैः सम्यक् कृत्वा विचारणाम् ।
विश्वविद्यालयादर्शः कश्चित् संस्थाप्यतां नव ॥६१॥
"सारल्यं वाऽथ सेवा वा, सौभ्रात्र, विनयोऽथ वा ।
चारित्र्यं, वाऽथवौदार्यं, दृष्टिकोणे विशालता ॥६२॥
संस्कृतेर्भारतीयाया सम्यग् ज्ञानं, श्रमोऽथवा ।
आदेशपालनं चापि, त्यागो वा संयमोऽपि वा ॥६३॥
अथ कष्टसहिष्णुत्वं, लोकसेवाऽथवा पुनः ।
आस्तिक्यं वा ऽथवा देशे धर्माचारप्रचारणम्" ॥६४॥
एकः कश्चिदिहादर्शो नूनं संस्थाप्यतां नवः ।
पाल्यतां चातियत्नेन सर्वैरत्र निवासिभिः ॥६५॥
दीक्षान्तस्य समारोहो वर्षान्ते जायते यथा ।
तथैवादौ प्रवेशस्यापि कर्तव्यो महोत्सवः ॥६६॥
तत्रैवादर्शसम्बन्धे कर्तव्यविषये तथा ।
कर्तव्या मार्मिकी चर्चा व्रतग्रहणपूर्वकम् ॥६७॥*

यथा शान्तिनिकेतनस्थे विश्वभारतीविश्वविद्यालये पठ्यते—

"श्रयेय विश्वभारती । यत्र विश्वं भवति एकनीडम् । प्रयोजनमस्या समाख्यास्याम । एष नः प्रत्ययः । सत्यं ह्येकम् । पन्था पुनरस्य नैकः । विचित्रैरेव हि पथिभिः पुरुषा नैकदेशगामिन एकं तीर्थमुपासर्पन्ति इति हि विज्ञायते । प्राची प्रतीची चेति द्वे धारे विद्यायाः । द्वाभ्यामप्येताभ्यामुपलब्धव्यमैक्यं सत्यस्याखिललोकाश्रयभूतस्य इति नः सङ्कल्पः ।

एतस्यैवैक्यस्य उपलब्धिः परमो लाभः परमा शान्तिः परमञ्च कल्याणं पुरुषस्य इति हि वयं विजानीमः ।

सेयमुपासनीया नो विश्वभारती विविधदेशप्रथिताभिर्विचित्रविद्याकुसुममालिकाभिरिति हि प्राच्याश्च प्रतीच्याश्चेति सर्वेऽप्युपासकाः सादरमाहूयन्ते । तदिदमनुज्ञायताम्, तदिदमनुमन्यताम्, तदिदमनुष्ठीयताम् ।

इदमस्माभिरनुज्ञायते । इदमस्माभिरनुमन्यते । इदञ्च वयमनुतिष्ठामो यावच्छक्यं यथाज्ञानं च । तदिदमृध्यतां तदिदं समृध्यताम् ।

—विश्वभारतीनियमावलीतः ।

अथ चोपनिषत्प्रोक्त शान्तिपाठो मनोहर ।
पाठारम्भे प्रतिदिन गुरुशिष्यैर्विधीयताम् ॥६८॥

वैदेशिकाना छात्राणा व्यवस्था क्रियता तथा ।
यथा तेऽध्ययन कुर्युर्नित्य शतसहस्रश ॥६९॥

अथ सस्कृतभाषाया पठने पाठनेऽपि वा ।
इदानीं विषया ये ये सर्वथा समुपेक्षिता ॥७०॥✪
तेषामपि विशेषज्ञ एकैकोऽपि यथा भवेत् ।
तथा सुनिश्चिता काचित् क्रियता योजना नवा ॥७१॥

सुशक प्रकटीकर्तु को रस केन छन्दसा ।
पद्याना च कथ पाठो भवेदति मनोहर ॥७२॥
एतस्य सम्यगभ्यास कृत्वा तज्ज्ञैर्मनीषिभि ।
पद्यपाठविधे किञ्चिच्छास्त्र निर्मीयता नवम् ॥७३॥
गीतानामथ नव्याना प्रत्नानाञ्चापि सग्रहे ।
कश्चिज्जनो नियोक्तव्यो तद्गाने चापि केचन ॥७४॥
नृत्याना नाटकाना च गायनानाञ्चापि भूयसाम् ।
मण्डल्यो निपुणा काश्चिन्निर्मातव्या पृथक् पृथक् ॥७५॥
इमा देशे विदेशेऽपि ग्राम ग्राम निरतरम् ।
प्रयोग सुरभाषाया दर्शयेयुर्नव नवम् ॥७६॥
योगविद्यालयश्चापि सस्थाप्यो यत्र पण्डितै ।
प्रथाना च क्रियायाश्च शिक्षा दीयेत शोभना ॥ ७७॥

✪ वर्तमानसस्कृतशिक्षणे उपेक्षिता विषयास्तथा ग्रन्था —

अर्थशास्त्रम्, नीतिग्रन्था, कामशास्त्रम्, सगीतशास्त्रम्, शिल्पशास्त्रम्, सामुद्रिकम्, फलाविषय, अश्वशास्त्रम्, गजशास्त्रम्, श्यैनिकशास्त्रम्, नाट्यशास्त्रम्, कृषिविद्या, चित्रविद्या, तन्त्रविद्या, इन्द्रजालम्, पाकशास्त्रम्, वास्तुशास्त्रमित्यादयो विषया ।

समराङ्गणसूत्रधार, युक्तिकल्पतरु, मानसोल्लास, गृहत्संहिता, शिल्परत्नाकर:, क्षेमेन्द्रकृतय अग्निपुराणञ्चेत्यादयो ग्रन्था ।

विद्यालय पृथक्कार्य साधुसंन्यासिनां कृते ।
पाठक्रमस्तथा भिन्नो योगाभ्यासादिसंयुत ॥७८॥

काव्यादीनामपि शिक्षा शृङ्गारबहुला भृशम् ।
कथं हितकरी मान्या यूना संन्यासिना कृते ॥७९॥

कन्याविद्यालयश्चापि दूरे स्थाप्यो विशेषत ।
स्त्रिय एव नियोक्तव्या सर्वा अध्यापिकास्तथा ॥८०॥

धर्मसंस्कृतिशिक्षाया व्यवस्था च दृढा भवेत् । ⊕
येन सांस्कृतिक ज्ञान सर्वेषामुत्तम भवेत् ॥८१॥

एकस्मिन् समये सर्वे छात्रा अध्यापकास्तथा ।
धर्मसंस्कृतिसम्बन्धे विचारान् शृणुयु शुभान् ॥८२॥

छात्राणामर्थहीनाना निर्वाहाय च कश्चन ।
सञ्चालनीय उद्योग सुकर स्वल्पकालिक ॥८३॥

अथ संस्कृतभाषाया प्रचाराय च कश्चन ।
विभागः स्थाप्यतामत्रावश्यमेवाधिकारिभि ॥८४॥

अस्य प्रचारको गत्वा ग्रामे ग्रामे गृहे गृहे ।
संस्कृतस्य महत्त्व च शिक्षारीति च बोधयेत् ॥८५॥

अथ सामान्यलोकानामपि ज्ञानाय शोभना ।
परीक्षा सरला काश्चित् चालनीया समन्तत ॥८६॥

नवसंस्कृतशब्दाना निर्मित्यै सग्रहाय च ।
निर्मेया समिति काचिद् विदुषामधिकारिणाम् ॥८७॥

भौगोलिकप्रसङ्गानामथ काव्यादिवर्तिनाम् ।
सम्यग् ज्ञानाय कर्तव्या मानचित्रादिनिर्मिति ॥८ ॥

सदाचारास्तथा के के शिष्टाचारास्तथैव च ।
प्राचीना वा नवीना वा पालनीया इहस्थितै ॥-९॥

⊕ अस्मिन् विषये "संस्कृत पाठशालाओं में वैदिक धर्मशिक्षा की आवश्यकता और उसकी योजना" इतिनामक कार्यालयात् प्रकाशित पुस्तक द्रष्टव्यम् ।

एका सूची विनिर्मेया तेषामप्यत्र पण्डितैः ।
प्रचारश्चापि कर्तव्यस्तेषामभ्यहिताय च ॥९०॥
विश्वविद्यालयस्थाश्च समस्ताः कर्मचारिणः ।
लेखकाः सेवका वापि युवानो बालकास्तथा ॥९१॥
त एवाऽत्र प्रवेष्टव्या ये स्वल्पमपि संस्कृतम् ।
अवश्यमेव जानीयुर्वक्तुं बोद्धुं च शक्नुयुः ॥९२॥
विश्वविद्यालयः सोऽयं तथा कार्योऽधिकारिभिः ।
यथाऽयं देवभाषाया नगरं घोषितो भवेत् ॥९३॥
इहस्था यदि विद्वांस इहस्थैः सकलैः सह ।
वदेयुः संस्कृते शश्वत्तदेदं सुकरं भृशम् ॥९४॥*
इहाऽऽगच्छ, जलं देहि, इदं पत्रं च कीदृशम् ।
एवं यदि बुधा ब्रूयुर्भूयात् तद्द् सदं नु किम् ॥९५॥
एषां कार्यकलापानां कुर्वीत यदि सिद्धये ।
विश्वविद्यालयो यत्नं तदाऽयं सफलो भवेत् ॥ ६॥
अतो विद्यालयस्यास्य मान्यान् कुलपतीनहम् ।
पूजनीयांस्तथाचार्यान् वरिष्ठांश्चाधिकारिणः ॥९७॥
भूत्वा बद्धाञ्जलिर्भक्त्या भूयो भूयो निवेदये ।
रक्षायै सुरभाषाया शास्त्राणां संस्कृतेस्तथा ॥९८॥
गौणमात्महितं कृत्वा सेवाभावेन भूयसा ।
आचारेण च सत्येन नेतव्याऽभ्युन्नतिं पराम् ॥९९॥

सकलगुणवरिष्ठैर्वर्तमानैरिदानीं—
मुपकुलपतिवर्यैर्विश्वविद्यालयोऽयम् ।†
समधिकशुचिसेवाराशिभिः सेव्यमानो
भवतु सकलविद्यासाधनासिद्धपीठम् ॥१००॥

* दैनिकव्यवहारोपयोगिनां वाक्यानां परिज्ञानाय कार्यालयद्वारा प्रकाशिता वाक्यसूची सम्पादनीया व्यवहर्तव्या च ।

† वर्तमानोपकुलपतयः मान्याः श्रीपण्डितसुरतिनारायणमणित्रिपाठिमहाभागाः ।

त्रयोदशः सन्देशः

(विदुषा कृते अन्यान्यपि कानिचिदावश्यकानि कार्याणि उद्दिश्य)

अथ संस्कृतशिक्षायाः, भवतां विदुषां तथा।
भवद्विधार्थिनाञ्चापि स्नातकानां यशस्विनाम् ॥१॥—
यथोचितप्रतिष्ठायै विकासाय हिताय च।
अन्येषामपि लोकानां कर्तव्यं भूरि विद्यते ॥२॥
अतस्तेऽपि जनाः सर्वे निजकर्तव्यपालने।
भवद्भिः सहृतैर्भूत्वा प्रेरणीया यथाबलम् ॥३॥
यथा हि भवतां केचिद्दोषा मे ह्रासहेतवः।
तेषामपि तथैवाह दोषैरुत्पीडिता भृशम् ॥४॥
अतः स्वीयहितं मत्वा पण्डितैरेव सहृतैः।
तेषामप्यखिला दोषाः सूचनीयाः स्वयत्नतः ॥५॥

तथाहि—

हिन्दूनामेव सर्वेषां प्रथमं दृश्यतां दशा।
प्रधानं निजकर्तव्यं कियदेतैर्नु विस्मृतम् ॥६॥
शिक्षितोऽशिक्षितो वाऽपि प्रत्येकं हिन्दुवंशजः।
संस्कृतं निजकर्तव्यं मत्वाऽवश्यं पठेद् यदि ॥७॥
संस्कृतस्यापि रक्षा स्यात् संस्कृतेश्चापि रक्षणम्।
विदुषां संस्कृतज्ञानां सम्मानश्चापि सर्वशः ॥८॥
परं संस्कृतविद्यायाः संस्कृतेर्विदुषां तथा।
रक्षायै वा प्रतिष्ठायै तेषां चिन्ता न विद्यते ॥९॥
हिन्दुभिर्बहुधा सक्तैः सदा स्वोदरपोषणे।
साहित्ये संस्कृतौ वापि न ध्यानमपि दीयते ॥१०॥
अवश्यं पठितुं तस्मात् यत्किञ्चिदपि संस्कृतम्।
प्रेरणीयोऽखिलो लोकः सामान्यो वा महत्तमः ॥११॥
विनष्टे संस्कृते धर्मः संस्कृतिः स्वाभिमानिता।
अथ राष्ट्रीयमैक्यं वा रक्षितुं शक्यते कथम् ॥१२॥

इद ज्ञात्वाऽपि यो तथ्य ध्यानमत्र ददाति नो ।
स महानपि दुर्बुद्धिर्गर्हणीयश्च सर्वथा ॥१३॥
विना वेद विना गीता विना रामायणीं कथाम् ।
कालिदास विना कश्चिद् भारतीय कथ भवेत् ॥१४॥
वृद्धैरपि जनैस्तस्माद् देशधर्माभिमानिभि ।
अवश्य पठनीयेय पुण्या सस्कृतभारती ॥१५॥
धन्य तस्य पटेलस्य जीवन येन वार्द्धके ।
कार्याऽधिक्येऽपि सुप्रीत्या सस्कृत पठित श्रमात् ॥१६॥*
तस्मात् सर्वे नरा नार्यो युवान स्थविरा अपि ।
पठन्तु शपथं कृत्वा दिव्या सस्कृतभारतीम् ॥१७॥†
चर्चा ज्ञानाय गीताया चाणक्यस्य च नीतय ।
सूक्तय कालिदासस्य सन्तु भूयो मुखे मुखे ॥१८॥
रचित्वाऽथ स्वसाहित्य सुचिराच्चिस्पृहैस्तु ये ।
देशसेवा कृताऽपूर्वा सस्कृतिश्चापि रक्षिता ॥१९॥
तेषा विद्वद्वराणाञ्च इदमीदृगुपेक्षणम् ।
कृतज्ञता वा न्याय्य वा वक्तु किं खलु शक्यते ॥२०॥
सर्वमेतत् सुविस्पष्ट वक्तव्य लोकससदि ।
बोधनीयोऽनुनेयश्च नरनारीगणोऽखिल ॥२१॥
नेतारोऽपि तथा सर्वं प्रष्टव्या निर्भय बुधै ।
यद् वदन्ति सभास्वेते तत् कथं पूरयन्ति नो ॥२२॥
सस्कृतस्य सभास्वेभि कृत्वा सुबहु कीर्तनम् ।
मन्त्रालये समागत्य मौनमालम्ब्यते कथम् ॥२३॥

---

* द्रश्यताम्—महादेव भाइ की डायरी पृ० ११६, २५, १५५ ।
अस्मिन् पुस्तके सरदार वल्लभ भाइ पटेलस्य सस्कृतशिक्षणविषये विस्तृता मोहावहा च चर्चा अस्ति ।

† अस्मिन् विषये कार्यालयात् प्रकाशितं "सस्कृत, क्यों पढ़ें, कैसे पढ़ें, कब पढ़ें" इति पुस्तकमवश्य द्रष्टव्य तदनुसारमेव च सर्वे शिक्षिता [illegible] संस्कृतपठनाय प्रेरणीया ।

राधाकृष्णन् महाभागस्तथा नेहरूमहोदय ।
विद्वान् जाकिर हुसैनश्च तथा देशमुख सुधी ॥२४॥
श्रीछागलामहाभागो विद्वान् श्रीभक्तदर्शन ।
गाडगिल् श्रीप्रकाशश्च के० सन्तानम् तथैव च ॥२५॥
श्रीमान् पणिक्करश्चापि श्रीमाली काटजूस्तथा ।
श्रीद्वारकाप्रसादश्च मिश्र पाटस्करस्तथा ॥२६॥
श्रीरामसुभग सिंह रामस्वामी महोदय ।
श्रीविश्वनाथदासश्च त्रिपाठी कमलापति ॥२७॥
एते संस्कृतशिक्षाया माहात्म्य बहुहेतुभि ।
कीर्तयन्ति निजां भक्ति दर्शयन्ति तथाऽसकृत् ॥२८॥
पर निजविचारेभ्य एव श्चेत् कार्यरूपताम् ।
लभेयु कति वा होरा संस्कृतस्य समुन्नतौ ॥२९॥
बोधयन्तु मनागेतान् लज्जयन्तु तथा सकृत् ।
चेतयन्तु पुन कर्तुं सार्थक निजभाषणम् ॥३०॥
भाषणान्यखिलान्येषा वक्तव्यानि तथैव च ।*
सगृह्य पुरतस्तेषा स्थापनीयानि पण्डितै ॥३१॥
अथ ये लोकसेवाया आयोगस्याधिकारिण ।
अन्ये नियुक्तिकर्तारो ये वा नानापदेषु च ॥३२॥
तेऽपि संस्कृतशिक्षाया स्नातकाना नियुक्तये ।
प्रोत्साह्या बोधनीयाश्च बाधनीयाश्च जातुचित् ॥३३॥
राज्यद्वारा प्रदत्तस्याधिकारस्यापि मुक्तये ।
किमेते संस्कृतज्ञेभ्यो ददतेऽवसर नहि ॥३४॥

---

* कार्यालयात्प्रकाशिते "संस्कृत शिक्षा के सम्बन्ध में सुप्रसिद्ध नेताओं तथा विद्वानों के विचार" इति नामके पुस्तके एतेषा भाषणानि वक्तव्यानि च पाठकै द्रष्टव्यानि ।

तथैव संस्कृतविश्वपरिषद् तथा अखिलभारतीयसंस्कृतसाहित्य-सम्मेलनस्य च वार्षिकेषु विवरणपुस्तकेषु संगृहीता सम्मतयश्च द्रष्टव्या ।

अहो भारतनिन्दाया शिक्षणं यद् विदेशिभि ।
प्रदत्त तस्य सरूढ प्रभावोऽद्यापि नो गत ॥५६॥❀
तदिमेऽपि जना केचित् प्रमत्ता इव मानना ।
न पश्यन्ति न शोचन्ति युक्तायुक्त हिताहितम् ॥५७॥
तदिमे दयया पूर्व बोधनीया समादरात् ।
भर्त्सनीयास्तथा केचित् सुभृश प्रौढया गिरा ॥५८॥
मातु स्तन्येन निक्षेप यथा कुर्वीत बालक ।
सस्कृतेन तथैवेय शिक्षितानां निरोधिता ॥५९॥
अथ प्रधानाचार्याश्च शिक्षासस्थासु तासु ये ।
संस्कृते तेऽपि सम्प्रार्थ्या ध्यान दातु विशेषत. ॥६०॥
कुर्वन्तु सस्कृते प्रीति सस्कृताध्यापके तथा ।
सम्माने वेतने वाऽपि भेदभाव भजन्तु नो ॥६१॥
श्रीमत्केशवचन्द्रेण विदुषा निजपौरुषात् ।
यथैका पाठशालाऽपि प्रीत्या सञ्चाल्यते चिरात् ॥६२॥
तथाऽन्येऽपि महीयास प्रधानाध्यापका बुधै ।
सम्प्रार्थ्या सस्कृते कर्तु सुप्रीतिमधिकाधिकाम् ॥६३॥

विद्यालयेषु सर्वेषु गेहे गेहे च शोभने ।
सम्प्रार्थ्या सूक्तिमन्त्राणा लेखनाय सुसज्जना ॥६४॥
सूक्तीनामथ मन्त्राणां तेषा ज्ञान भवेन्न चेत् ।
भवद्भिरेव देया स्युरन्विष्याऽन्विष्य शोभना ॥६५॥
एव स्वीयगृहस्याऽपि पुरत पृष्ठतस्तथा ।
बहिरन्तरतथा रम्या लेख्या आदर्शसूक्तय ॥६६॥

❀ चार्ल्स ग्रान्ट, वॉर्डन, मेकाले प्रभृतय प्राश्चात्यशासका भारत समाजस्य साहित्यस्य च परमनिन्दका आसन् तथा भारते पाश्चात्यशिक्ष प्रचारस्य प्रवलसमर्थका अभूवन् ।

History of Education in India under the … of the East India Company

(By B D Ba…

श्रीमत्परशुरामस्य गेहं गत्वा त्रिपाठिनः ।
दृश्यतां सूक्तिनिर्माणे कीदृशं चारु चर्चितम् ॥६७॥

अथ ये संस्कृताचार्याः संस्कृतज्ञास्तथैव च ।
विद्वांसः साम्प्रतं सन्ति भाषाक्षेत्रेऽतिविश्रुताः ॥६८॥
श्रीहजारीप्रसादाख्यो द्विवेदी विदुषां वरः ।
आचार्यः श्री चतुर्वेदी विद्वान् राजवली तथा ॥६९॥
जानकीवल्लभो विद्वान् श्यामनारायणस्तथा ।
श्री विश्वनाथमिश्रश्च श्री वियोगी हरिस्तथा ॥७०॥
भगवत्शरणो विद्वान् ख्यातो देशविदेशयोः ।
लक्ष्मीनारायणो मिश्रो वाजपेयिमहोदयः ॥७१॥
सेठो गोविन्ददासोऽसौ भाषासंग्रामकेशरी ।
मान्यो बनारसीदासश्चतुर्वेदी महारथः ॥७२॥
श्री सुधांशुश्चतुर्वेदी श्री नारायण एव च ।
कविवर्यो दिनकरः पन्तः काव्यकलानिधिः ॥७३॥
एते सर्वे कथं स्वीयं प्रभावं शक्तिमेव च ।
संस्कृतस्य समुन्नत्यै यथावन्नोपयुञ्जते ॥७४॥—
इति गत्वाऽन्तिके सर्वे प्रष्टव्याः सादरं बुधाः ।
किञ्चित् कर्तुं मदुन्नत्यै प्रार्थनीयास्तथाऽसकृत् ॥७५॥

अथ ये केऽपि विद्यन्ते महान्तो लघवोऽपि वा ।
विद्वांसो भारतीयानां भाषाणां सेवकास्तथा ॥७६॥
तेऽपि देवगिरं मत्वा निजभाषासहायिकाम् ।
तस्या अपि समुन्नत्यै किञ्चित् कुर्वन्तु निश्चितम् ॥७७॥
अनधीत्य तथोपेक्ष्य एते संस्कृतभारतीम् ।
लप्स्यन्ते किन्नु वैदुष्यं जीविष्यन्ति कथं नु वा ॥७८॥

अथ ये प्रत्नतत्त्वज्ञा भाषाशास्त्रानुशीलकाः ।
भारतीयेतिहासस्याऽध्येतारोऽध्यापकास्तथा ॥७९॥

* श्री प० किशोरीदास वाजपेयी, कनखल, हरिद्वार ।

न केवलमसौ विद्वान् स्वयं किन्त्वमुना पुनः ।
संस्कृतं पाठितौ सम्यक् द्वौ स्वकीयौ सुतावपि ॥९८॥
तस्मादेव तु तच्छिष्यैः पण्डितैर्ब्राह्मणैरपि ।
तस्य संस्कृतसेवायै गीयते सादरं यशः ॥९९॥*

अथैते वैदिका ज्योतिर्वेत्तारः कर्मकाण्डिनः ।
पुरोधसः पूजकाश्च तथा पण्डामहाशयाः ॥१०१॥
एतेष्वपि च ये पूर्णं संस्कृतं नैव जानते ।
पूजापाठाद्यनुष्ठानं कुर्वतेऽशुद्धमेव च ॥१०२॥
ते सर्वेऽपि सभां कृत्वा युष्माभिः स्वीयमण्डले ।
संस्कृतं शिक्षितुं योज्या लब्धुं तत्र च नैपुणम् ॥१०३॥
एते पुरोधसः शिक्षया स्वयं स्वप्रतिवेशिनः ।
पण्डानां चापि कर्तव्यः समुद्धारः सुशिक्षया ॥१०४॥
अनर्थं सुमहान्तेव यदेते वैदिकादयः ।
शुद्धया न गिरा प्रायः कुर्वते पूजनादिकम् ॥१०५॥†
एते यज्ञादिकार्येषु बहुधा यदि संस्कृतं ।
वदेयुस्तेन शोभा स्याद् धर्मरक्षा च भूयसी ॥१०६॥
यद्येते संस्कृतं ब्रूयुर्यजमानगृहं गताः ।
तेऽपि संस्कृतविज्ञाः स्युः प्रतिष्ठा च निजा भवेत् ॥१०७॥
अतः संस्कृतविद्वद्भिर्धर्मरक्षाभिलाषिभिः ।
प्रयत्नः कोऽपि कर्तव्यस्तदर्थमिति मे मतिः ॥१०८॥
उपवीतधरान् सर्वान् बोधयन्तु द्विजानपि ।
धनाढ्यानथवा दीनान् महतो वा लघूनथ ॥१०९॥

---

* कुरियाक्कुमहोदयस्य मलयालमभाषामय अभिनन्दनग्रन्थो द्रष्टव्यः ।

† नाऽसंस्कृतां वदेद् वाचं कर्म कुर्वन्नयज्ञियाम् ।
यज्ञेऽपशब्दतो जल्पन् प्रायश्चित्तीयते नरः ॥ गृह्यस्मृतिः ।
तस्माद् यज्ञे नाऽपभाषितवै न म्लेच्छितवै । म्लेच्छो ह वा एष यदपशब्दः ।
पातञ्जलमहाभाष्यम् ।

यस्या कस्यामपि स्थित्या जीविकायामिमे यथा ।
पठेयु सस्कृत नून वेदमन्त्रास्तथैव च ॥११०॥

अथ साधुमहान्ताश्च तथा सन्यासिनोऽसिलान् ।
सस्कृताऽध्ययन कर्तुं प्रेरयन्तु यथावलम् ॥१११॥
एतेषां जीवन दृष्ट्वा व्यर्थं देशनिवासिन ।
प्राय सर्वेऽपि कुप्यन्ति अपशब्दान् वदन्ति च ॥११२॥
यद्येते केवल कुर्यु सस्कृताऽध्ययने श्रमम् ।
उभयोरपि रक्षा स्यात् सम्मानश्चापि सर्वश ॥११३॥

शिक्षिता महिलाश्चापि विधवाश्च विशेषत ।
सस्कृताऽध्ययने प्रीत्या नियोज्यास्तद्वितैपिभि ॥११४॥
स्त्रियश्चेत् सस्कृतज्ञा स्युस्तदाऽनश्य गृहे गृहे ।
सस्कृतस्य प्रचार स्याद् विनोवावचा यथा ॥११५॥*
अथ सा पश्चिमीया लक्ष्मीदेवी कृतश्रमा ।
पुराणाचार्यवर्गे चेत् समुत्तीर्णा परिश्रमात् ॥११६॥
वाचस्पतिपदञ्चापि प्राप्तु प्रयततेऽधुना ।
तत्कथ न युवत्यस्तत्सामान्यज्ञानमाप्नुयु ॥११७॥
इदन्तु मे महत्कष्ट यद् बुधा प्रार्थिता अपि ।
पाठयन्ति नहि स्वीयामपि पत्नीं मनोरमाम् ॥११८॥
मेघदूतादिकाव्याना पठनाय रुदन्त्यपि ।
उपेक्षिता मया दृष्टा पत्नी लक्ष्मणशास्त्रिभि ॥११९॥
एवञ्चेद् विदुपामेव स्वय श्रद्धा न जायते ।
उदासते तथाऽत्यन्त स्त्रीणा दोषस्तदा नु क ॥१२०॥

---

* "पुरुष अगर कहेंगे कि हमे इतनी भाषायें सीखने के लिए समय नहीं, तो भोजन करते समय बहनें उनसे सस्कृत में बातें करें। बहनों को तीनों भाषायें सीखनी चाहिए। (मातृभाषा, हिन्दी और सस्कृत)

भाषा का प्रश्न पृ० ४६ ।

न केवलमसौ विद्वान् स्वय कि त्वमुना पुन ।
संस्कृत पाठितौ सम्यक् द्वौ स्वकीयौ सुतावपि ॥९८॥
तस्मादेव तु तच्छिष्यै॰ पण्डितैर्नालणैरपि ।
तस्य संस्कृतसेवायै गीयते सादर यश ॥९९॥*

अथैते वैदिका ज्योतिर्वेत्तार कर्मकाण्डिन ।
पुरोधस॰ पूजकाश्च तथा पण्डामहाशया ॥१०१॥
एतेष्वपि च ये पूर्ण संस्कृत नैव जानते ।
पूजापाठाद्यनुष्ठान कुर्वतेऽशुद्धमेव च ॥१०२॥
ते सर्वेऽपि सभा कृत्वा युष्माभि स्वीयमण्डले ।
संस्कृत शिक्षितु योज्या लब्धु तत्र च नैपुणम् ॥१०३॥
एते पुरोधस शिक्ष्या स्वय स्वप्रतिवेशिन ।
पण्डाना चापि कर्तव्य समुद्धार सुशिक्षया ॥१०४॥
अनर्थ सुमहानेष यदेते वैदिकादय ।
शुद्धया न गिरा प्राय कुर्वते पूजनादिकम् ॥१०५॥†
एते यज्ञादिकार्येषु बहुधा यदि संस्कृते ।
वदेयुस्तेन शोभा स्याद् धर्मरक्षा च भूयसी ॥१०६॥

यद्येते संस्कृत मूयुर्यजमानगृह गता ।
तेऽपि संस्कृतविज्ञा स्यु॰ प्रतिष्ठा च निजा भवेत् ॥१०७॥
अत संस्कृतविद्वद्भिर्धर्मरक्षाभिलाषिभि ।
प्रयत्न कोऽपि कर्तव्यस्तदर्थमिति मे मति ॥१०८॥

उपवीतधरान् सर्वान् बोधयन्तु द्विजानपि ।
धनाढ्यानथवा दीनान् महतो वा लघूनथ ॥१०९॥

---

* कुरियापक्कुमहोदयस्य मलयालमभाषामय॰ अभिनन्दनग्रन्थो द्रष्टव्य ।

† नाऽसंस्कृता वदेद् वाच कर्म कुर्वन्नयज्ञियाम् ।
यतोऽपशब्दतो जल्पन् प्रायश्चित्तीयते नर ॥ बृहस्पतिः ।
तस्माद् यज्ञे नाऽपभाषितवै न म्लेच्छितवै । म्लेच्छो ह वा एष यदपशब्द ।
पातञ्जलमहाभाष्ये ।

यस्या कस्यामपि स्थिरता जीविकायामिमे यथा ।
पठेयु संस्कृत नून वेदमन्त्रास्तथैव च ॥११०॥

अथ साधुमहान्ताश्च तथा सन्यासिनोऽखिलान् ।
संस्कृताऽध्ययन कर्तुं प्रेरयन्तु यथाबलम् ॥१११॥
एतेषा जीवन दृष्ट्वा व्यर्थं देशनिवासिन ।
प्राय सर्वेऽपि कुप्यन्ति अपशब्दान् वदन्ति च ॥११२॥
यद्येते केवल कुर्यु संस्कृताऽध्ययने श्रमम् ।
उभयोरपि रक्षा स्यात् सम्मानश्चापि सर्वश ॥११३॥

शिक्षिता महिलाश्चापि विधवाश्च विशेषत ।
संस्कृताऽध्ययने प्रीत्या नियोज्यास्तद्धितैषिभि ॥११४॥
स्त्रियश्चेत् संस्कृतज्ञा स्युस्तदाऽवश्य गृहे गृहे ।
संस्कृतस्य प्रचार स्याद् विनोबावचो यथा ॥११५॥*
अथ सा पष्ठिवर्षीया लक्ष्मीदेवी कृतश्रमा ।
पुराणाचार्यवर्गे चेत् समुत्तीर्णा परिश्रमात् ॥११६॥
वाचस्पतिपदञ्चापि प्राप्तु प्रयततेऽधुना ।
तत्कथ न युवत्यस्तत्सामान्यज्ञानमाप्नुयु ॥११७॥
इद तु मे महत्कष्ट यद् बुधा प्रार्थिता अपि ।
पाठयन्ति नहि स्वीयामपि पत्नीं मनोरमाम् ॥११८॥
मेघदूतादिकाव्याना पठनाय रुदन्त्यपि ।
उपेक्षिता मया दृष्टा पत्नी लक्ष्मणशास्त्रिभि ॥११९॥
एवञ्चेद् विदुषामेव स्वय श्रद्धा न जायते ।
उदासते तथाऽत्यन्त स्त्रीणा दोषस्तदा नु क ॥१२०॥

---

* "पुरुष अगर कहेंगे कि हमें इतनी भाषायें सीखने के लिए समय नहीं, तो भोजन करते समय बहनें उनसे संस्कृत में बातें करें। बहनों को तीनों भाषायें सीखनी चाहिए। (मातृभाषा, हिन्दी और संस्कृत)

भाषा का प्रश्न पृ० ४६।

धन्य श्रीनगरस्याऽसौ परमानन्दपण्डित ।
येन स्त्रीणां कृते विद्यापीठ संस्थापित महत् ॥१२१॥†
अथ केचित्तदज्ञानात् केचित् श्रद्धातिरेकत ।
मन्यन्ते संस्कृतां भाषां क्लिष्टात् क्लिष्टतरां भुवि ॥१२१॥
अत एव न तेऽध्येतु प्रवर्तन्ते स्वय भिया ।
भीषयित्वा तथा पाठाद् वारयन्त्यपरानपि ॥१२२॥
तस्मात् संस्कृतभाषाया प्रचारे बाधिकामिमाम् ।
नाशयन्तु बुधा भ्रान्ति स्वगेहे व्यवहारत ॥१२३॥
भवन्तो भवने स्वीये वदेयुर्यदि संस्कृतम् ।
द्रुतमेव कुटुम्बे स्यु सर्वे संस्कृतवेदिन ॥१२४॥
गेहं कपिलदेवस्य गत्वा पश्यन्तु बालकान् ।
बालिका बालभृत्य च वदत संस्कृत सदा ॥१२५॥
गोपालशास्त्रिणस्तेषा पुत्री पुत्रवधूस्तथा ।
स्वभावत सदा सर्वे वदन्ति सुरभारतीम् ॥१२६॥
सीतारामस्य विदुषस्तनया सुप्रशिक्षिता ।
लघवोऽपि सदा शूद्रा भवते संस्कृतां गिरम् ॥१२७॥
एषा तादृशमालाप संस्कृते सरल प्रियम् ।
पश्यत कस्य नो नश्यत् काठिन्यस्य भय द्रुतम् ॥१२८॥
तस्माद् य कोऽपि यत्रापि संस्कृतं कठिन वदेत् ।
मुखं तस्य निरोद्धव्य भवद्भिर्व्यवहारत ॥१२६॥
संस्कृतोन्नतये सर्वे प्रयतेरन् बुधा यदि ।
भोजविक्रमकालाऽसौ नून पुनरिहानयेत् ॥१३०॥
अथ ये राज्यकार्येषु नियुक्ता बहवो जना ।
संस्कृत ज्ञातवन्तोऽपि तत्प्रयोग न कुर्वते ॥१३१॥
तेऽपि सर्वे सदा किञ्चिन् संस्कृते वदितु मुदा ।
लेखितु चापि पत्रादि प्रेरणीया सगौरवात् ॥१३२॥

---

† श्रीनगरे स्थापित श्रीरूपादर्शशारदापाठनामक सुविशालं संस्कृतप्रधानं महिलाशिक्षणकेन्द्रम्

श्लाघ्योदेशमुखो विद्वान् यो महोच्चपदे स्थित ।
आंग्लविद्वत्समाजेन वेष्टितोऽपि दिवानिशम् ॥१३३॥
आलापे भाषणे लेखे कवित्वे चापि सादरम् ।
प्रयुक्ते संस्कृत ह्यं संस्कृतज्ञैर्जनै सह ॥१३४॥
गत्वा सुरेन्द्रनाथश्च द्रष्टव्योऽसौ बुधैर्बुध ।
आंग्लभाषाप्रवीणोऽपि राज्यकार्यरतोऽपि य ॥१३५॥—
गद्यपद्यमय पत्र सदा लिखति संस्कृते ।
भाषते चापि सानन्द संस्कृते विबुधै सह ॥१३६॥
एव सर्वेऽपि विद्वास शासका अधिकारिण ।
संस्कृत चेत् प्रयुञ्जीरन् आनन्द सुमहान् भवेत् ॥१३७॥
अथ संस्कृतशून्या ये सन्था तेऽपि पण्डितै ।
प्रोत्साह्या संस्कृते वक्तु दश पञ्च पदान्यपि ॥१३८॥*
लोकानामेव द्रव्यान्नदानादिसहयोगत ।
सर्वे संस्कृतविद्वद्भिरधीत खलु संस्कृतम् ॥१३९॥
तस्मात्तैरपि निष्काम काश्चिदध्याप्य संस्कृतम् ।
लोकसेवा विधातव्या आनृण्याय यथाबलम् ॥१४०॥ †
ये च संस्कृतसेवायां सलग्ना सन्ति केचन ।
प्रोत्साहनीयास्ते सर्वे दानसम्माननादिभि ॥१४१॥
केन्द्रे च संस्कृतोन्नत्यै समिति स्थापिता तु या ।
तयाऽपि निखिलोपाया सप्रपञ्च निरूपिता ॥१४२॥
तत् पुस्तकमपि प्राज्ञै राद्योपान्त विलोक्यताम् ।
तन्निदिष्टपथा चापि यत्न सर्वैर्विधीयताम् ॥१४३॥

---

* हिन्दी अग्रेजी विदुषा कृते दैनिकव्यवहाराय उपयुक्तपदावली कार्यालयत प्रकाशिता वर्तते । अभिलाषिभि सा तत एव ग्रहीतु शक्यते ।

† सामान्यजनाना संस्कृतशिक्षणाय कार्यालयात् सरला पद्धति सरलानि पुस्तक पुस्तिकादीनि पत्रकाणि (पोस्टर) च प्रकाशितानि सन्ति । तेषा साहाय्येन संस्कृतपण्डितै स्वसमीपवासिन केचन जना अवश्य संस्कृत शिक्षणीया ।

धन्य श्रीनगरस्याऽसौ परमानन्दपण्डित ।
येन स्त्रीणा कृते विद्यापीठ सस्थापित महत् ॥१२०॥†
अथ केचित्तदज्ञानात् केचित् श्रद्धातिरेकत ।
मन्यन्ते सस्कृतां भाषा क्लिष्टात् क्लिष्टतरां भुवि ॥१२१॥
अत एव न तेऽध्येतु प्रवर्तन्ते स्वय भिया ।
भीषयित्वा तथा पाठाद् वारयन्त्यपरानपि ॥१२२॥
तस्मात् सस्कृतभाषाया प्रचारे बाधिकामिमाम् ।
नाशयन्तु बुधा भ्रान्ति स्वगेहे व्यवहारत ॥१२३॥
भवन्तो भवने स्वाये वदयुर्यदि सस्कृतम् ।
द्रुतमेव कुटुम्बे स्यु सर्वे सस्कृतवेदिन ॥१२४॥
गेह कपिलदेवस्य गत्वा पश्यन्तु बालकान् ।
बालिका बालभृत्य च वदत सस्कृत सदा ॥१२५॥
गोपालशास्त्रिणस्तेषा पुत्रौ पुत्रवधूस्तथा ।
स्वभावत सदा सर्वे वदन्ति सुरभारतीम् ॥१२६॥
सीतारामस्य विदुषस्तनया सुप्रशिक्षिता ।
लघवोऽपि सदा शुद्धा भुवते सस्कृतां गिरम् ॥१२७॥
एषा तादृशमालाप सस्कृते सरल प्रियम् ।
पश्यत कस्य नो नश्येत् काठिन्यस्य भय द्रुतम् ॥१२८॥
तस्माद् य कोऽपि यत्रापि सस्कृत कठिन वदेत् ।
मुख तस्य निरोद्धव्य भवद्भिर्व्यवहारत ॥१२९॥
सस्कृतोन्नतये सर्वे प्रयतेरन् बुधा यदि ।
भोजविक्रमकालाऽसौ नून पुनरिहाभवेत् ॥१३०॥
अथ ये राज्यकार्येषु नियुक्ता बहवो जना ।
सस्कृत ज्ञातवन्तोऽपि तत्प्रयोग न कुर्वते ॥१३१॥
तेऽपि सर्वे सदा किञ्चित् सस्कृते वदितु मुदा ।
लेखितु चापि पत्रादि प्रेरणीया समादरात ॥१३२॥

† श्रीनगरे स्थापित श्रीरूपादर्शशारदापीठनामक सुविशाल संस्कृतप्रधान महिलाविद्यालयमेतत्

श्लाघ्योऽशमुखो विद्वान् यो महोच्चपदे स्थित ।
आंग्लविद्वत्समाजेन वेष्टितोऽपि दिवानिशम् ॥१३३॥
आलापे भाषणे लेखे कवित्ले चापि सादरम् ।
प्रयुक्ते सस्कृत ह्य सस्कृतज्ञैर्जने सह ॥१३४॥
गत्वा सुरेन्द्रनाथश्च द्रष्टव्योऽसौ बुधेषु च ।
आंग्लभाषाप्रवीणोऽपि राज्यकार्यरतोऽपि य ॥१३५॥—
गद्यपद्यमय पत्र सदा लिखति सस्कृते ।
भाषते चापि सानन्द सस्कृते विबुधै सह ॥१३६॥
एव सर्वेऽपि विद्वास शासका अधिकारिण ।
सस्कृत चेत् प्रयुञ्जीरन् आनन्द• सुमहान् भवेत् ॥१३७॥
अथ सस्कृतशून्या ये सवथा तेऽपि पण्डितै ।
प्रोत्साह्या सस्कृते वक्तु दश पञ्च पदान्यपि ॥१३८॥*
लोकानामेव द्रव्याप्रदानादिसहयोगत ।
सर्वे सस्कृतविद्वद्भिरधीत खलु सस्कृतम् ॥१३९॥
तस्मात्तैरपि निष्काम किञ्चिदध्याप्य सस्कृतम् ।
लोकसेवा विधातव्या आनृण्याय यथाबलम् ॥१४०॥ †
ये च सस्कृतसेवाया सलग्ना सन्ति केचन ।
प्रोत्साहनीयास्ते सर्वे दानसम्माननादिभि ॥१४१॥
केन्द्रे च सस्कृतोन्नत्यै समिति स्थापिता तु या ।
तयाऽपि निखिलोपाया सप्रपञ्च निरूपिता ॥१४२॥
तत् पुस्तकमपि प्राज्ञै राद्योपान्त विलोक्यताम् ।
तन्निर्दिष्टपथा चापि यत्न सर्वैर्विधीयताम् ॥१४३॥

---

* हिन्दी अग्रेजी विदुषा कृते दैनिकव्यवहाराय उपयुक्तपदावली कार्यालयत प्रकाशिता वर्तते । अभिलाषिभि सा तत एव ग्रहीतु शक्यते ।

† सामान्यजनाना सस्कृतशिक्षणाय कार्यालयात् सरला पद्धति सरलानि पुस्तक पुस्तिकादीनि पत्रकाणि (पोस्टर) च प्रकाशितानि सन्ति । तेषा साहाय्येन सस्कृतपण्डितै स्वसमीपवासिन केचन जना अवश्य सस्कृत शिक्षणीया ।

अथ तत्समिते सर्वे सदस्या कृतिशालिन ।
अध्यक्षाश्च महाप्राज्ञा पोतदारमहोदया ॥१४४॥—
एते सर्वे यथाकाल निर्दिशेयुर्यथा यथा ।
सर्वं तदपि कर्तव्य यावच्छन्न्य मनीषिभि ॥१४५॥
अथ वैदेशिका येऽपि सस्कृतज्ञा मनीषिण ।
पठने पाठने लग्ना लेखने वाऽथ शोधने ॥१४६॥
तेऽपि सर्वे बुधै सर्वैरादर्तव्या इहागता ।
पुस्तकादिप्रदानेन स्नेहसन्दर्शनेन च ॥१४७॥
एषु ये सस्कृते वक्तु, कविता लेखितु तथा ।
व्याख्यातु प्रयतन्ते वा प्रोत्साह्या सर्व एव ते ॥१४८॥*
तेषां सम्मेलन कार्य देय साहाय्यमेव च ।
शिक्षणीयाश्च ते प्रीत्या भाषितु लेखितु तथा ॥१४९॥
सश्लाघ्य श्रीजगन्नाथोपाध्यायो येन सर्वदा ।
वैदेशिकाना साहाय्य कर्तु सम्यक् प्रयत्यते ॥१५०॥
फडकेशास्त्रिणस्तेऽपि सम्मान्या यैर्विदेशिन ।
पत्राचारेण शिक्ष्यन्ते सस्कृत दूरदेशत ॥१५१॥

---

* अनेके सस्कृतज्ञा वैदेशिका विद्वास सस्कृते सम्यक्तया वक्तु लेखितु च कामयन्ते तथा तदर्थं प्रयतन्ते अपि । यथा—स्पेनदेशवासी श्री रेव० फा० ज्योर्ज जिस्पेर्त एस० जे० महोदय अस्मिन्नेव वत्सरे कानिचिद् दिनानि कार्यालये सस्कृते भाषाऽभ्यास कर्तुमागच्छति स्म। वैदेशिकै सस्कृतपण्डितैर्लिखितानि सस्कृतपद्यानि निम्नाङ्कितेषु निबन्धेषु द्रष्टव्यानि । यथा—

१— पाश्चात्यविदुषा सस्कृतपद्यानि (डा० वे राघव)
सस्कृतप्रतिभा, अक्टूबर, १९५९

२—रूसी संस्कृतज्ञ श्री कल्यायोव (श्रीमती कमलारत्नम्)
सरस्वती, नवम्बर, १९५७

३—सस्कृतरत्नाकर पत्रिकाया श्री मधुसूदनओझाअभिनन्दनाङ्के श्रीमता मोग्गमहोदयाना विदेशयात्राया वर्णनम् पृ० २३३ ।

अथ ये केऽपि विद्वांसो महान्तो लघवोऽपि वा ।
वर्तन्ते देवभाषाया प्रचारे निरता सदा ॥१५२॥
ये च पाण्डित्यरक्षायां संलग्ना सन्त्यहर्निशम् ।
पठने पाठनैर्लेखैरभ्यासे शास्त्रचिन्तने ॥१५३॥
यानि कानि च विद्यन्ते सभा-सम्मेलनानि च ।
प्रकारैर्विविधै स्तीयै. संलग्नानि मदुन्नतौ ॥१५४॥
येच केचन साहित्य लिखन्ति नवमुत्तमम् ।
संगीतेऽभिनये चापि वक्तृत्वे वा विशारदा ॥ १५५॥
एतेषामपि सर्वेषां कार्यं प्रोत्साहन बुधै ।
प्रेम्णा साहाय्यदानेन स्वागतेनाऽभिनन्दनै ॥१५६॥

अथ—

इतोऽधिक च यत्कार्यं देशकालानुसारत ।
कर्तव्य तत् स्वयं चिन्त्य बुद्धिमद्भिर्मनीषिभि ॥१५७॥†
ध्यात्वा श्रीशङ्कराचार्यं चाणक्य सायण तथा ।
तिलक मालवीय च कर्मिष्ठा सन्तु पण्डिता ॥१५८॥
इत्येव निजदोषा शासनदोषा समाजगतदोषा ।
सर्वे महात्रिदोषा शमनीया संस्कृतोन्नतये ॥१५९॥

एषा संस्कृतभारती विजयता भूयो यथा भूतले
देशे संस्कृतसेविन समुचित स्थान लभन्ता यथा ॥
श्रेय संस्कृतसंस्कृतिर्वितनुता विश्वस्य भूयो यथा
तत्सर्व क्रियता यथामतिबल सम्मिल्य सर्वैर्बुधै ॥१६०॥

---

† अस्मिन् विषये कार्यालयात् प्रकाशितानि निम्नाङ्कितपुस्तकानि द्रष्टव्यानि—

१—संस्कृतप्रचार के पचास रचनात्मक कार्यक्रम ।

२—संस्कृतविद्यालयों के लिए संस्कृतप्रचार का द्वादशसूत्री कार्यक्रम ।

३—हिन्दी-अंग्रेजी विद्यालयों के लिये संस्कृतसम्बन्धी सुझाव ।

४—संस्कृत और ब्राह्मण ।

उपसंहारः

इत्येते कथिता सर्वे सन्देशा ये हृदि स्थिता ।
प्राय सर्वेऽप्यभिप्राया समासेन निरूपिता ॥१॥
चिरेण हृदि या चिन्ता या व्यथा या च वेदना ।
आसीदन्दह्यमाना सा समस्ता प्रकटीकृता ॥२॥
निष्क्राम्य निखिलाश्चैमान् अन्त शल्यमिव स्थितान् ।
वेगान् मर्मभिद किञ्चिदिदानीं निर्वृति गता ॥३॥
अथ कश्मीरत कन्याकुमारीनगरावधि ।
जगन्नाथपुरीं यावद् द्वारकायास्तथैव च ॥४॥
सम्पूर्णे भारते खण्डे ग्रामेषु नगरेषु वा ।
यावन्त सन्ति विद्वासो भवन्त कृतिशालिन ॥५॥—
कृपया निखिलैरेते सन्देशा अखिला अपि ।
अध्येया मननीयाश्च पूरणीया यथाबलम् ॥६॥
अयं संस्कृतविद्याया सर्वेषा विदुषां तथा ।
छात्राणामुन्नतेश्चापि राजमार्ग प्रदर्शित ॥७॥
इम स्वस्त्ययनं धन्य यशस्य मानवर्धनम् ।
राजमार्ग समालम्ब्य सर्वतो विजय श्रिय ॥८॥

इति कतिपयशब्दैरप्रिये प्रीतिगर्भे
रचितमिह विशुद्धेनाऽऽत्मनाऽऽवेदन यत् ।
व्यथितहृदयदु खोद्गारमेत विदित्वा
बुधगणो न विधेय कोऽपि मन्यु ममाय ॥१०॥

इदमपि भगवन्त भूतभर्तारम् ते
भवदुदयनिमित्त भूरिशोऽभ्यर्थयेऽहम् ।
जगति सकलविघ्नघ्ना तपिष्णासपूत
रविमिव बुधवर्गा श्रा समभ्येतु भूय ॥११॥

परिशिष्टम्—क

पुस्तके चर्चितानां व्यक्तीनां संक्षिप्तपरिचयः

द्वितीयप्रकरणे, प्रथमसन्देशे—

श्री प० गिरिधर शर्मा चतुर्वेद (महामहोपाध्याय) जयपुराभिजन, सम्प्रति वाराणस्यां दुर्गाकुण्डस्थिते धर्मसंघभवने निवास । श्रा० भा० संस्कृत-साहित्यसम्मेलनस्य जन्मदाता, प्रधानकार्यवाह, अध्यक्ष तथा मार्गनिर्देशकश्च । संस्कृतभाषायां भारतीयसंस्कृतेश्च सुमहान् प्रवक्ता संरक्षकश्च । संस्कृतशिक्षा-पद्धतौ परिवर्तनस्य पुरस्कर्ता पथप्रदर्शकश्च । संस्कृतजगत सर्वमान्य क्रियानिष्ठो चरित्रश्च नेता ।

तृतीयप्रकरणे, द्वितीयसन्देशे—

श्रीयुधिष्ठिरमीमांसक —प्राच्यविद्याप्रतिष्ठान, अजमेर । कृति — संस्कृत व्याकरण शास्त्र का इतिहास (दो भाग), दशपाद्युणादिवृत्ति, वैदिकस्वरमीमांसा, क्षीरतरङ्गिणी ।

डा० कपिलदेव—कुरुक्षेत्र विश्वविद्यालये संस्कृताध्यापक । कृति —संस्कृत व्याकरण में गणपाठ की परम्परा और आचार्य पाणिनि ।

डा० राम अवध पाण्डेय —वाराणसेय संस्कृत विश्वविद्यालयस्य अन्ताराष्ट्रीयविभागे अध्यापक । कृति —उणादिसूत्रों का तुलनात्मक अध्ययन, उज्ज्वलदत्त की वृत्ति का सम्पादन, उणादिकोश (Unadi Derivatives) इत्यादि ।

तृतीयप्रकरणे, पञ्चमसन्देशे—

श्रीदेवकृष्ण केशव पण्डित—स्थानम् ग्रा०प० कुकुरमुण्डा जि० पश्चिम खानदेश । कृति —धर्मादर्श (धार्मिक विवेचनेन सह नीतिशास्त्रीयविवेचन-स्यापि विशालो ग्रन्थ) ।

श्रीलक्ष्मण शास्त्री जोशी—स्था० प्राज्ञपाठशाला, वाई, जि० सतारा । (महाराष्ट्र) कृति —धर्मकोश, हिन्दूधर्म की समीक्षा, वैदिकसंस्कृति का विकास ।

श्री रघुनाथ शास्त्री कोकजे—स्था० लोनावले जि० पूना (महाराष्ट्र)। कृति —धर्मस्वरूपनिर्णय, भारतीय तर्कशास्त्र। (मराठी)।

श्रीपाद दामोदर सातवलेकर.—स्था० स्वाध्याय मण्डल, पारडी, जि० सूरत (गुजरात)। कृति —स्पर्शास्पर्श (मराठी) महाभारतमीमांसा (हिन्दी, द्वा भाग) अन्ये च बहव ग्रन्था।

म० म० डा० पाण्डुरंग वामन काणे—बम्बई विद्यापीठ, बम्बई। कृतिः धर्मशास्त्र विचार (मराठी) धर्मशास्त्रेतिहास. (आंग्लभाषाया धर्मशास्त्रेतिहासस्य अनेकभागात्मक महान् ग्रन्थ)।

डा० केशव लक्ष्मण दफ्तरी—स्था० विदर्भसंशोधन मण्डल, नागपूर। कृति —औपनिषदिक जीवनसौख्य (मराठी)।

म० म० श्रीधर शास्त्री पाठक —(स्वर्गीय) स्थानम् महाराष्ट्रम्। कृति अस्पृश्यतेचा शास्त्रार्थ (मराठी)।

श्री महादेवशास्त्री दिवेकर —मिरज, (महाराष्ट्र) कृति—नवा हिन्दूधर्म, हिन्दुसमाज समर्थ कसा होईल? धर्मशास्त्रमन्थन, आर्यसंस्कृति (मराठी)।

श्री गोविन्द महादेव जोशी—पूना। कृति —सनातनधर्मांचे भूमिका, हिन्दूचे समाजरचना शास्त्र (मराठी) अस्मिन् पुस्तकद्वये श्रीजोशीमहाभागै धर्म परिवर्तनवादिना सर्वे पक्षा आलोचिता प्राचीनतायाश्च प्रबल समर्थनं कृतम्।

श्री दीनानाथ शास्त्री सारस्वत —रामदल, दरीबाकला, दिल्ली। कृति - सनातन धर्मालोक (अनेक भाग) सनातनधर्मनाम्ना प्रचलितानां सर्वेषामाचाराणां सिद्धान्ताना च वैदिकत्वसाधक सुमहान् पाण्डित्यपूर्णं ग्रन्थ.।

महामहोपदेशक माधवाचार्यशास्त्री—धर्मधाम, सब्जी मण्डी, दिल्ली। कृति —पुराणदिग्दर्शन, स्वौ, सनातनधर्म प्रभृतय सनातनधर्मविरोधिना आशङ्काना समाधानकर्तारो भूयास ग्रन्था पुस्तिकाश्च।

श्रीवसन्तकुमार चट्टोपाध्याय —कलकत्ता। कृति —धर्म प्रसङ्ग (बंगला भाषाया पुस्तकद्वयम्) सनातनधर्मसम्बन्धे क्रियमाणानामाक्षेपाणां समाधानाय लिखितौ विवेचनापूर्णौ ग्रन्थौ।

श्रीप० मोतीलाल शास्त्री—(स्वर्गीय) मानवाश्रम, दुर्गापुरा, जयपुर। कृति —वैदिकधर्म भारतीयसंस्कृतिसम्बन्धिनोऽनेके शताधिका अनुसन्धानपूर्णा विशालकाया अद्वितीया ग्रन्था।

श्री स्वामी करपात्री जी महाराज—धर्मसंघ, दुर्गाकुण्ड, वाराणसी। कृति—रामराज्य और मार्क्सवाद। (पृष्ठेषु मार्क्सवादस्य पाण्डित्यपूर्णा आलोचना)।

श्रीस्वामी दयानन्द'—(स्वर्गीय) भारतधर्म महामण्डलम्, जगतगञ्ज, वाराणसी। कृति—धर्मविज्ञान। (धर्मस्य वैज्ञानिकत्वसमर्थक अत्युत्तम ग्रन्थ)

प०उमापतिद्विवेद—'नकछेदराम इति लोकप्रसिद्ध नाम,गोरखपुर जनपदवास्तव्यो महाविद्वान्, स्वर्गीय)। कृति—सनातनधर्मोद्धारनामकश्चतुर्भागात्मको विशालो वैदुष्यपूर्णश्च ग्रन्थ। काशी हिन्दूविश्वविद्यालयात् प्रकाशित'।

डा० सर राधाकृष्णन्—(राष्ट्रपति महोदय) कृति—हिन्दुओं का जीवन दर्शन। अन्ये च अनेके दर्शन धर्म-सस्कृतिसम्बन्धिन प्रायेण प्राचीनतापोषका ग्रन्था लेखाश्च।

सूचना—उपरिचर्चिता परिवर्तनवादिन प्राचीनमतपोषकाश्च सर्वे ग्रन्था धर्मस्य यथार्थस्वरूप जिज्ञासमानैरवश्यमवलोकनीया।

तृतीयप्रकरणे, पञ्चमन्देशे—

डा० भीषण लाल आत्रेय: एम० ए०, लिट्० डी०—आत्रेयनिवास, लक्सा, वाराणसी। कृति—योगवाशिष्ठ और उसका सिद्धान्त, Yogavasistha and Modern thoughts।

राजेश्वर शास्त्री द्राविड—वाराणसेयसाङ्गवेदविद्यालयस्य सञ्चालको भारतप्रसिद्ध प्रकाण्डो विद्वान्। दर्शनधर्मशास्त्रादिभि सह नीतिशास्त्रस्याऽपि महीयान् ज्ञाता व्याख्याता च। कृति—शान्ति का अग्रदूत।

भट्टमथुरानाथ शर्मा—जयपुर। कृति—साहित्यवैभवम्, जयपुरवैभवम्, गोविन्दवैभवम् इत्यादय। हिन्दी उर्दू वृत्तेषु रचिता अद्भुता काव्यग्रन्था।

श्रीमदुमापतिद्विवेद' कविपति—ग्राम पकड़ी पो०पयरवेवा जि०देवरिया। कृति—पारिजातहरणम् (महाकाव्यम्) शिवास्तुति (शतकम्) स्फुटा हिन्दी-संस्कृतकविताश्च। वर्तमानसकेत—तुलसीमहाविद्यालय, पडरौना, देवरिया।

श्रीपादशास्त्री हसूरकर—(स्वर्गीय) इन्दौर। कृति—अनेकानि चरितपुस्तकानि।

बदरीनाथ झा—(स्वर्गीय) मुजफ्फरपुर। कृति—गुणेश्वरचरितचम्पू, अन्योक्तिसाहस्री।

विद्यावाचस्पति श्रीमधुसूदन ओझा—(स्वर्गीय) जयपुर। कृति—इन्द्रविजय। विशेषपरिचय अग्र।

म० म० रामावतार शर्मा—(स्वर्गीय) छपरा (विहार) कृ०—मुद्गरदूतम्। धीरनैषधम्। भारतगीतिका।

श्रीनिवास शास्त्री वैद्य—कलकत्ता। कृ०—चन्द्रमहीपति, वैभवपिशाच।

म० म० मथुरानाथ दीक्षित —अस्सी, वाराणसी । कृ०—अनेकानि नाटकानि ।

डा० मङ्गलदेव शास्त्री—प्राच्य अनुसन्धान परिषद्, इण्डिया लाइन, वाराणसी । कृ०—जीवनज्योति । नवनिर्मितानां जीवन सन्देशदायिनीनां सरसललितसूक्तीनामनुपमो ग्रन्थ ।

प्र० अण्णङ्गराचार्य—काञ्चीपुरम्, मद्रास । कृ०—गद्यपद्यमया अनेके वैदुष्यपूर्णा ग्रन्था दण्डकानि च ।

पण्डितराज श्री स्वामि भगवदाचार्य —राजनगर सोसाइटी, अहमदाबाद ७ । कृ०—भारतपारिजातम्, पारिजातापहार, पारिजातसौरभम् (काव्यानि) । स्तुतिकविताश्च ।

के० एस० श्री कृष्णमूर्ति शास्त्री—अन्नामलैपुरम्, मद्रास । कृति —वैदेहीविवाहम् (गद्यकाव्यम्) प्रकृतिविलासकाव्यम्, त्रिपुराभरणम्, शचीचरितम्, गोपीगोविन्दम् (नाटकम्), रामायणगीतम् (गीतम्) इ० ।

सौभाग्यवती क्षमा राव —(स्व०) बम्बई । कृतिः—मीरालहरी, सत्याग्रहगीता, श्रीतुका रामचरितम्, श्री रामदासचरितम्, कथापञ्चकम्, कथामुक्तावली इ० । नारीविरचिता अत्यद्भुता कृतय ।

श्रीचन्द्रशेखर मिश्र शर्मा—सम्भलपुर (उत्कल) । कृति —नीतिदर्पण (उत्कलभाषानुवाद सहित) । नीतिशिष्टाचारविषयकमत्युत्तम पुस्तकम् । ।

डा० वी० राघवन्—७ श्रीकृष्णपुरम् मद्रास १४ । मद्रासविश्वविद्यालये संस्कृतविभागाध्यक्ष । "संस्कृतप्रतिभा" नाम्न्या साहित्य अकादमी, दिल्लीत प्रकाश्यमानाया षाण्मासिकपत्रिकाया सम्पादक । सरसललितकवितानिर्माण हेतो कविकोकिलेति विरुदशाली । बहूनां लघुकाव्यानां विविधानि नाटकानां च लेखक । केन्द्रीयसंस्कृतसमिते वरिष्ठ सदस्य ।

सत्यदेव वाशिष्ठ भिषक्केसरी—ग्रा० [illegible], जि० [illegible], पञ्जाब । कृति —सत्याग्रहनीतिकाव्यम् ।

राजपण्डित श्रीसोमनाथ शर्मा—[illegible], नेपाल । कृति —[illegible]पुष्पाञ्जलि (अत्युत्तमा स्तुतय), प्रतिसंस्कृता सिद्धान्तकौमुदी च ।

श्री जीवन्यायतीर्थ एम० ए०—भाटपाडा, चौबीस परगना, [illegible] । कृति — अनेकानि अत्युत्तमानि नाटकानि प्रहसनानि च ।

श्रीभगवानन्त 'राकेश' —[illegible] । कृति —[illegible] हिन्दीभाषायां [illegible] ।

श्रीगोपेन्दुभूषणसांख्यतीर्थ —श्रीधाम नवद्वीप, पश्चिमबंगाल । कृति —सम्पूर्णतुलसीकृतरामायणस्य संस्कृतपद्यानुवादमयो महान् ग्रन्थः ।

पं० विष्णुकान्त झा ज्योतिषाचार्य —चौहट्टा, बाँकीपुर, पटना । कृति —राष्ट्रपतिराजेन्द्रयशप्रशस्ति । (कार्श्येऽप्यस्यापि विपुलवृत्तान्तसूचिका विविधछन्दोमयी रमणीयतमा कृति) ।

सन्निधान सूर्यनारायण शास्त्री शिरोमणिः—४४ जीरा सिकन्दराबाद, (आन्ध्र) । कृतय —पूर्णपात्रम्, रामदासम्, विवेकानन्दम्, कचदेवयानीयम्, काव्यविकम्, तेनालिरामलिङ्गकथा ।

गणेशरामशर्मा—मगलपुरा, झालावाड, राजस्थान । कृतय —अनेकानि काव्यानि १३८ लेखाश्च ।

रामकुबेर मालवीय —वाराणसेयसंस्कृतविश्वविद्यालये साहित्यविभागाध्यक्ष । कृति —मालवीयमहाकाव्यम् ।

तृतीयप्रकरणे अष्टमसन्देशे—

श्री वीरराघवाचार्य —चामराजेन्द्र संस्कृत महाविद्यालये (बैंग्लोर) विशिष्टाद्वैताऽध्यापक ।

श्री के० लक्ष्मण शास्त्री आन्ध्रविद्वलय —आन्ध्रप्रदेशे संस्कृतशिक्षाविशेषाधिकारी, हैदराबाद । निवासस्थानम्—१६ तुलजागुडा, मोअज्जमजाही मार्केट, हैदराबाद ।

आचार्य श्री त्रिनाथदास शर्मा एम० ए०—उत्कलाभिजन । वर्तमान सकेत —उत्कलभवनम्, दुर्गाकुण्ड, वाराणसी ।

श्री प० आनन्द झा न्यायाचार्य —लखनऊ विश्वविद्यालयस्थे संस्कृत महाविद्यालये प्राध्यापक ।

श्री रामानन्द शास्त्री "आनन्द"—आनन्द औषधालय, सीवान, सारन ।

(एतेषा मनोहरा पद्यपाठशैली सर्वैरपि श्रोतव्या अनुकरणीया च)

भारतेन्दु हरिश्चन्द्र (स्वर्गीय) कृति —स्फुटानि कजलीगीतानि ।

श्री कमलेश मिश्र —(स्वर्गीय) वासा टॉड जि० गया (बिहार) कृति —कमलेशविलास ।

श्री भट्टमथुरानाथ शास्त्री—(पूर्वोक्त) जयपुर । कृ०—गोविन्दवैभवम् ।

श्री जानकीवल्लभशास्त्री —मुजफ्फरपुर (बिहार) कृ०—काकली ।

श्री प० कालीप्रसादशास्त्री—"संस्कृतम्" सम्पादक अयोध्या । कृति —कवितानिकुञ्ज । स्फुटानि गीतानि च ।

श्री रामनाथ पाठक "प्रणयी"—आरा (विहार)। कृति —गन्धगला।

श्री प० बदरीनाथ काशीनाथ शास्त्री—बडौदास्थ-विद्वत्समाजप्रवर, द्वारकाधीशमन्दिरम्, नरसिंहजी नी पोल, बड़ौदा (गुजरात)। कृति — रत्नावली, मालिनी प्रभृतया नाटिका बहुविधानि गीतानि च।

श्री ईशदत्तशास्त्री "श्रीश"—(स्वर्गीय) कृति —स्फुटानि गीतानि, प्रतापविजय खण्डकाव्य च।

श्री रुद्रदेव त्रिपाठी "मालवमयूर" सम्पादक —मन्दसौर, मध्यप्रदेश। कृति —प्रेरणा (गीतानि), डिण्डिम (हास्यव्यङ्ग्यविनोदपूर्णकविता)।

श्री काशीनाथ पाण्डेय "चन्द्रमौलि"—ग्रा० शाहपुर, जि० देवरिया (उत्तर प्रदेश)। बीकानेरस्थशार्दूल ब्रह्मचर्याश्रम व्यवस्थापक। कृति —संस्कृत गीताञ्जलि।

आचार्य श्री विनायकदास शर्मा—(पूर्वोक्त) कृति —मुकुन्दविरुदावली, गीतिकाव्यञ्च।

बी० शे० श्री चिदम्बरेश्वरदीक्षितार —चिदम्बरम्, मद्रासप्रदेश। कृति —सङ्गीतकुसुमाञ्जलि।

श्री काशीकृष्णाचार्य —गुण्टूर, आन्ध्रप्रदेश। विविधशास्त्रीयवैदुष्येन सह गीतशास्त्रविशारदोऽपि। विशेषपरिचय "संस्कृतसाम्राज्यम्" इत्याख्ये अभिनन्दनग्रन्थे द्रष्टव्य।

(उपर्युक्तानि गीतपुस्तकानि सर्वैरपि संस्कृतज्ञै द्रष्टव्यानि मननीयानि च)

तृतीयप्रकरणे नवमसन्देशे—

रवीन्द्रनाथ ठाकुर—(स्वर्गीय) शान्तिनिकेतनम्, बोलपुर, पश्चिम बंगाल कृति —प्राचीन साहित्य (बंगला) (रामायण-मेघदूत-कुमारसम्भव-शकुन्तला-कादम्बरी-प्रभृतिग्रन्थानां रहस्यमाहिणी चर्चा)।

म० म० हरप्रसाद शास्त्री—(स्वर्गीय) कृति —कालिदासादयस्तादृश-विदग्धा भूयासो विद्या "वसुमती" प्रभृतिपत्रिकासु ... प्रकाशिता।

गुरुपद हालदार —(स्वर्गीय) कालीघाट, कलकत्ता। कृति —व्याकरण दर्शनेर इतिहास (बंगला), वैयाकरणैरनन्यतमो गौडीयो महामना।

चतुर्थप्रकरणे प्रथमसन्देशे—

म० म० श्री रामावतार शर्मा—(पूर्वोक्त) कृति —... हिन्दीसंस्कृतयो अनेकानि व्याख्यानानि लेखाश्च। हिन्दीभाषायां ...

"श्री रामावतार शर्मा निबन्धावली" नामके ग्रन्थे तथा संस्कृतनिबन्धाना सङ्ग्रहे "रामावतार शर्म प्रकीर्ण प्रबन्धा" इति ग्रन्थे द्रष्टव्य ।

श्री मणिशङ्कर वसन्तराम उपाध्याय—बडौदा । कृति—ईश्वरदर्शनम् (दार्शनिकविषये वर्तमानकालीनधर्मसमाजव्यवस्थाविषये च निर्भीकतया तदीयदोषाणामुद्घाटक क्रान्तिकारि पुस्तकम्) ।

श्री मोतीलाल शर्मा—(पूर्वोक्त) एतेषामद्वितीये विशालतमे च साहित्ये अनेकेषु स्थलेषु क्रान्तिकारिणो नूतना विचारा उपलभ्यन्ते ।

पण्डितराज श्री स्वामिभगवदाचार्य —(पूर्वोक्त) गुजरातीभाषापुस्तके भक्तिशास्त्रे, संस्कृतभाषाया लिखितेषु वेदोपनिषद्भाष्येषु, वेदान्तदर्शनस्य वैदिकभाष्ये, श्रीजानकीकृपाभाष्यसङ्क्षिप्तसारे, भगवद्गीताव्याख्याया, धार्मिकेषु प्रवचनेषु च एतेषा नूतना उद्बोधका विचारा पठनीया ।

लक्ष्मण शास्त्री जोशी—(पूर्वोक्त) पूर्वोक्तग्रन्थद्वये "तथा जडवाद और अनीश्वरवाद" इति पुस्तके च एतेषा कठोरा दृढाश्च परिवर्तनवादिनो विचारा पठनीया ।

श्री स्वामिकेवलानन्दसरस्वती—वाई जि० सतारा । प्राज्ञपाठशालाया सस्थापक । एषा नाम भ्रमवशात् पुस्तके न चर्चितम् । धर्माचार्यो युगानुरूपपरिवर्तनवादिन पक्षस्य प्रवर्तका समर्थकाश्च महापण्डिता ।

पञ्चमप्रकरणे पञ्चमसन्देशे—

श्री हरिशंकर पाण्डेय —(स्वर्गीय) मीठापुर, पटना । कृति —आर्ष पाणिनीय व्याकरणम् ।

श्री गोपालशास्त्री दर्शनकेशरी—डी० ५६।३१ गार्डनकालनी, सीगरा वाराणसी । कृति —पाणिनीयप्रबोध (भागद्वयम्) लघुपाणिनीयम् , संस्कृत प्रबोध , पाणिनिनाटक, नारीजागरणनाटक च । अष्टाध्यायीपद्धत्या संस्कृतशिक्षाया प्रसारे प्रयोगे च समर्पितजीवन । सम्प्रति उत्तराखण्डे जोशी मठस्थवेदवेदाङ्गसस्कृतमहाविद्यालये प्रधानाचार्य ।

श्री ब्रह्मदत्त जिज्ञासु —मोतीझील, वाराणसी । कृति —संस्कृत पठन-पाठन की अनुभूत सरलतम विधि । मासिकी पत्रिका "वेदवाणी" (हिन्दी) ।

पञ्चमप्रकरणे सप्तमसन्देशे—

डा० रामशंकर भट्टाचार्य —अस्सीघाट, वाराणसी । अल्पीयस्येव वयसि व्याकरण-दर्शन-भाषाशास्त्र-पुराणेतिहासादिविविधविषयेषु द्विशताधिकाना गवेषणापूर्णाना निबन्धाना लेखक प्रवक्ता च । सर्वेऽपि तत्तद्विषयका निबन्धा ग्रन्थरूपेण शनै शनै प्रकाश्यमाना वर्तन्ते ।

पञ्चमप्रकरणे एकादशसन्देशे—

सेक्सपियर-शेली मिल्टनप्रभृतयः—सुप्रसिद्धा आङ्गलीयादिकवयः ।

गेटे (Goethe) जर्मनदेशीयो महाकविर्येन अभिज्ञानशाकुन्तलं पठित्वा तस्य महती प्रशस्तिः कृता सुमहांश्च आनन्दोद्गारः प्रकटीकृतः ।

आर्नोल्ड —(सर एडविन आर्नोल्ड Sir Edwin Arnold, गीत गोविन्दग्रन्थस्य पद्यानुवादकर्ता आङ्ग्लकविः । सुचिरं भारतवासी, भारतस्य प्रशंसकश्च ।

म० म० गोपीनाथ कविराज महोदयः—स्वेच्छया वाराणसेय राजकीय संस्कृत महाविद्यालयस्य अध्यक्षपदं परित्यज्य सारस्वतसाधनायां निरतस्त्याग-मूर्तिर्महाविद्वान् ।

महाशयः—"महाशय" नाम्ना पण्डितसमाजे प्रसिद्धः श्री रामयशस्त्रिपाठिमहाभागः । धर्मसंघ, वाराणसी । व्याकरण धर्मशास्त्रयोः विद्वान् पण्डितशिरोमणिः । सर्वदा यथालाभसन्तुष्टः अपरिग्रही च । सम्प्रति [illegible] साश्रमावलम्बी ।

श्री पं० काशीनाथ द्विवेदी—अस्सी, वाराणसी । अद्भुतप्रतिभाशाली महाकविः । रुक्मिणीहरणमहाकाव्यप्रणेता । लोकसम्पर्केभ्यः सर्वथा पराङ्मुखो महामनस्वी च । सर्वदा गृह एव एकस्यां खट्वायां समासीनः शास्त्रचिन्तनपरायणो लेखनिरतश्च ।

श्री प० काली प्रसाद शास्त्री—"संस्कृतम्"—सम्पादकः अयोध्या । "अस्यामेव शताब्द्यां संस्कृतं राष्ट्रभाषा भवेत्" इति मन्त्रस्य द्रष्टा प्रचारकश्च ।

डा० नलिनी रञ्जन सेन—६१, चौरंगी, कलकत्ता । अ० भा० संस्कृत राष्ट्रभाषासम्मेलनस्य तथा शास्त्रधर्मप्रचारसभायाः संस्थापक सञ्चालकश्च । संस्कृतभाषायाः, शास्त्राणां, सनातनधर्मस्य च प्रबल पक्षपाती प्रचारकश्च ।

श्री प० कपिलदेव शर्मा—लोकमान्यागारम्, छपरा (बिहार) । अ० भा० देवभाषापरिषदोऽध्यक्षः सञ्चालकः । "आशुबोध" व्याकरणस्य प्रणेता । विशिष्टव्यक्तित्वसम्पन्नः प्रभावशाली वक्ता लेखकश्च ।

श्री लक्ष्मीकान्त महादेव पाण्डेय—११८, [illegible], बम्बई । [illegible] राष्ट्रभाषाकरणसमितेः कार्यवाहः । संस्कृतराष्ट्रभाषायाः प्रबल [illegible] ।

श्री प० किशोरी दास वाजपेयी—कनखल, हरिद्वार । "हिन्दी शब्दानुशासन"—लेखकः । हिन्दुस्तान, संस्कृते [illegible] ।

श्री प० रामनारायण शास्त्री—[illegible], वाराणसी । [illegible] सम्पादकः ।

श्री स्वामी ऋषिकुमार —ऋषिकुञ्जाश्रम, पचमठा, रीवाँ (मध्यप्रदेश) मध्यप्रदेशे संस्कृतशिक्षाया महत्त्वरक्षायै प्रयत्नशील । "मध्यप्रदेश में संस्कृत भाषा और उसके आचार्यों पर घोर संकट" इति पुस्तकस्य लेखक ।

सोमयाजी—(कि० कृष्ण सोमयाजी) मन्त्री, संस्कृत सेवक समाज, गुन्टूर, आन्ध्र। A plea for Sanskrit, Sanskrit or India Bi-Lingual, Sanskrit and the Brahman, प्रभृति पुस्तिकाना लेखक. तथा "भाषा" संस्कृतपत्रिकाया प्रकाशक सम्पादकश्च ।

श्री विद्याधर शास्त्री—एम०ए०,नागरी भण्डार, बीकानेर (राजस्थान) राजस्थान संस्कृत साहित्य सम्मेलनस्य कार्यवाहक । अ० भा० संस्कृत साहित्य सम्मेलनस्य भूतपूर्वो मन्त्री। "संस्कृत संस्कृति का विश्वसन्देश" इति पुस्तकस्य लेखक ।

श्री पूर्ण प्रसाद ब्राह्मण—काठमाडु, नेपाल। "शिक्षा आयोग के रिपोर्टों मे" इति पुस्तकस्य लेखक । नेपाले नियुक्तस्य शिक्षायोगस्य सदस्यै संस्कृतस्य उपरि कृतानामाक्षेपाणा निराकरणाय लिखितमिद पुस्तकम् ।

श्री प्रकाशचन्द्र गौड एम०ए०व्याकरणाचार्य —उत्तरप्रदेशीय संस्कृत-पाठशालाना प्रधाननिरीक्षक, इलाहाबाद। प्रभावशाली वक्ता, प्रबल संस्कृतपक्षपोषक सरसललितकवितानिर्माणकुशलश्च । सर्वविधै संस्कृत-शिक्षाविषयकै प्रश्नै समाधानैश्च समन्वितस्य "संस्कृत क्यों" इति पुस्तकस्य लेखक ।

श्रीधर भास्कर वर्णेकर —संस्कृत प्रचारिणी सभा, नागपुर। "संस्कृत-भवितव्यम्" पत्रिकाया सम्पादक । महाराष्ट्रप्रदेशे संस्कृतभाषाया महान् प्रचारक, प्रभावशाली वक्ता, बहूना गद्यपद्यात्मकपुस्तकाना लेखकश्च ।

पञ्चमप्रकरणे द्वादशसन्देशे

म० म० रामावतार शर्मा—(पूर्वोक्त)

म० म० सुधाकर द्विवेदी—(स्वर्गीय) खजुरा, वाराणसी। वाराणसेय-राजकीयसंस्कृतमहाविद्यालयस्य ज्यौतिषविभागाध्यक्ष । ज्यौतिषशास्त्रस्य गणितस्य च उद्भटो विद्वान्। सूर्यसिद्धान्तादिग्रन्थानामभिनवव्याख्याकार । पञ्चाशत्तोऽप्यधिकाना ग्रन्थाना लेखक सम्पादकश्च। अद्भुतप्रतिभाशाली विद्वान ।

म० म० आचार्य गणनाथ सेन —कलकत्ता। अष्टाङ्ग महाविद्यालयस्य संस्थापक । "प्रत्यक्षशारीरम्" ग्रन्थस्य लेखक । आयुर्वेदशास्त्रस्य समुद्धारक समर्थक प्रचारकश्च ।

म० म० गोपीनाथ कविराज'—वाराणसी। वाराणसेय राजकीय संस्कृत महाविद्यालयस्य भूतपूर्व अध्यक्ष। तन्त्रशास्त्रस्य पारङ्गमो विद्वान्। बहूनां महनीयग्रन्थाना लेखक साधकश्च।

श्रीकृष्णपन्त साहित्याचार्य'—गोयनका महाविद्यालयान्तर्गतस्य विराज तमस्य श्रीविश्वनाथपुस्तकालयस्य प्रधान पुस्तकालयाध्यक्ष। पाठकानां कृते सौविध्यप्रदाने साहाय्यकरणे च वाराणस्या विश्रुतकीर्ति।

उपकुलपति—एतत् पुस्तकप्रकाशनकाले वाराणसेयसंस्कृतविश्वविद्यालयस्य उपकुलपति माननीय श्री पण्डितसुरतिनारायणमणित्रिपाठिमहोदय। देवरिया जनपदस्य 'वरपार' नामके ग्रामे, सुप्रतिष्ठिते सुसम्पन्ने च परिवारे १६०४ ई० संवत्सरे जन्म। शिक्षा एम ए (संस्कृत), एल एल बी पर्यन्तम्। आरम्भे वाक्कीलरूपेण कार्यक्षेत्रे प्रवेश। अनन्तरं डिप्टी कलक्टर, कलक्टर, डिप्टी कमिश्नर प्रभृतिपदेषु अवस्थिति। तत्पश्चात् लोकसेवायोगस्य शासननिका (पब्लिक सर्विस कमीशन एडामनिस्ट्रेटिव सर्विस) सदस्यरूपेण स्थिती। तत्र ब्रिटिश इण्डिया कार्पोरेशन (कानपुर) संस्थाने प्रबन्धनिदेशकपदस्य (मैनेजिंग डाइरेक्टर) कार्यभारग्रहणम्। अन्ते १९६२ ई० वत्सरे वाराणसेय संस्कृत विश्वविद्यालयस्य उपकुलपतिपदे प्रतिष्ठिति।

आरम्भत एव समाजसेवानिष्ठ शिक्षानुरागी च। गोरखपुर विश्वविद्यालयस्य संस्थापकः, सम्प्रति कोशाध्यक्षश्च। बहूनां सुप्रतिष्ठितसंस्थानाम् सदस्य सहायकश्च। सार्वभौमसंस्कृतप्रचारकार्यालयस्य अध्यक्षः। संस्कृतसंस्कृत्योर्विशिष्टाभिमानी, वार्द्धक्येऽपि अप्रतिमो साहसपक्ष, प्रतिभावान्, कार्यकुशल, संस्कृतविश्वविद्यालयस्य सुव्यवस्थायामुन्नयने च सर्वात्मना संलग्न।

मधुसूदन ओझा—विद्यावाचस्पति, समीक्षाचक्रवर्ती, महामहोपदेशक, जयपुरराजपण्डित। वैदिकसाहित्यस्य अद्वितीयो विद्वान्। वैदिकविज्ञानरहस्योद्घाटकानां पर शतानामद्भुतग्रन्थानां लेखकः।

पचमप्रकरणे त्रयोदशनिर्देशे

श्री केशवचन्द्र मिश्र एम ए, साहित्यरत्न, बी टी —मदनमोहन मालवीयमहाविद्यालयस्य (भाटपाररानी, देवरिया) प्रधानाचार्य, महामना संस्कृत विद्यालयस्य संचालक, सार्वभौमसंस्कृतप्रचारक संघस्य प्रधानमन्त्री च।

श्री प परशुरामतिवारी, एडवोकेट देवरिया। [illegible] संस्कृतस्य महान् पोषक, समर्थक, संस्कृतविद्वत्सम्मानपरायणाश्च। सार्वभौमसंस्कृत प्रचारकार्यालयस्य विशिष्ट सदस्य।

लक्ष्मीदेवी पेण्डर, छायायां कालाती ढि पारवाट (फ्रांस)। [illegible]

वाग्पत्या अग्रगता स्थाननिवासिनी, वृद्धावस्थायामपि पुराणाचार्यपरीक्षामुत्तीर्य विद्यावारिधिपदवीप्राप्तये निवन्धलेखनपरायणा।

के. लक्ष्मणशास्त्रिणः पत्नी १६ तुलजागुडा, मोअज्जमजाही मार्केट, हैदराबाद। आन्ध्रप्रदेशे संस्कृतशिक्षाया विशेषाधिकारिणः श्री के लक्ष्मण-शास्त्रिणः धर्मपत्नी अन्नपूर्णानाम्नी संस्कृतज्ञा, सदा संस्कृतभाषणे प्रयत्नशीला च। एषा मेघदूत शकुन्तलादिग्रन्थानां सम्यग्रूपेण पठनाय आकुलापि नाद्यावधि शान्तिमहोदयैः पाठिता।

परमानन्द पण्डित एम. ए वसन्तबाग, श्रीनगर, कश्मीर। 'कश्मीर-राज्यस्य निवृत्त महागणनाधिकारी (Retired Accauntant General) श्री रूपा देवी शारदापीठस्य संस्थापक सञ्चालकश्च। सप्ततिपर्ववयस्को वृद्धोऽपि कश्मीरे पुन संस्कृतशिक्षाया व्यापकप्रचाराय व्याकुल, समर्पितसकलजीवनधनश्च स्मृहणीयचरितो महापुरुष।

कपिलदेवशर्मा लोकमान्यनगरम् छपरा (बिहार)। एतेषा गृहे सर्वोऽपि परिवार, बालका, बालिका, बालको भृत्यश्चेति सर्वेऽपि सर्वदा संस्कृतमेव भाषन्ते। बालिकाया बालभृत्यस्यस्य च संस्कृतसम्भाषण विस्मयकरम्। तथैव एतन्नगर-निवासिनः श्री प भरतमिश्रमहोदयस्यापि स्थिति।

गोपालशास्त्री दर्शनकेशरी (पूर्वोक्त) अष्टाध्यायीपद्धत्या संस्कृत-शिक्षाया प्रसारक। उत्तराखण्डे जोशीमठस्य संस्कृत महाविद्यालयस्य प्रधाना-चार्य। एतेषा द्वौ पुत्रौ, द्वितीया 'संस्कृता' नाम्नी पुत्रवधूश्च अष्टाध्याय्या कृत-श्रमा। एषा सर्वेषामपि सदा संस्कृतभाषणस्य समीचीनोऽभ्यास।

डा० सीताराम शास्त्री एम ए, पी एच डी व्याकरणाचार्य, साहित्या-चार्य, शिक्षणशास्त्राचार्य, राजशास्त्राचार्यश्च, हिन्दूविश्वविद्यालये व्याकरण-विभागाध्यक्ष। एतस्य विद्वद्वरस्य ललिताशास्त्री (१३ वर्षीया), बालशास्त्री (१० वर्षीय) सरलाशास्त्री (६ वर्षीया) मालशास्त्री (४ वर्षीय) एते सर्वेऽपि बालका बालिकाश्च संस्कृते वार्तालाप कुर्वन्ति। द्विवर्षीयो विशालशास्त्री शिशुरपि संस्कृतमवगच्छति तथा सकेतेन उत्तर च ददाति। निवासस्थानम्— श्री राजस्थान संस्कृत कालेज, मीरघाट, वाराणसी–१।

(एतेषां सर्वेषा गृहे गत्वा पण्डितै स्वयमेव सर्वमवलोकनीयम्)

श्रीदेशमुख (श्री चिन्तामणि द्वारकानाथ देशमुख) केन्द्रस्य भूतपूर्व वित्तमन्त्री। विश्वविद्यालयीयसहायतायोगस्य अध्यक्ष। सम्प्रति दिल्ली विश्व विद्यालयस्य उपकुलपति। अ भा संस्कृत साहित्यसम्मेलनस्य दिल्ली–अधिवेशने अध्यक्ष। संस्कृतस्य आशुकवि, संस्कृतभाषया भाषणे, सम्भाषणे, लेखे च सुतरा

कुशल । विद्यमाने राजनायकवृन्दे सर्वातिशायी संस्कृतमनीषी, शान्तिप्रिय सौजन्यमूर्तिश्च ।

श्रीसुरेन्द्रनाथतिवारी एम ए, साहित्यशास्त्री–देवरियाजनपदनिवासी। केन्द्रीय रेलवे बोर्ड वित्तविभागे उपनिदेशक । संस्कृतया गिरा सम्भाषणे संस्कृतयैव गिरा पद्यमये पत्रलेखने च स्वाभाविकी प्रवृत्ति साधीयसी कुशलता च ।

महामहोपाध्याय श्री दत्तो वामन पोतदारमहोदय -४९८ शनिवार पेठ, पूना । पूनाविश्वविद्यालयस्य उपकुलपति, केन्द्रीयसंस्कृतसमितेरध्यक्ष, भाषा-साहित्य-संस्कृति शिक्षण पुरातत्त्व–प्रभृतिविषयेषु बहूना ग्रन्थानां लेखक, वार्द्धक्येऽपि युवजनोचितोत्साहसम्पन्नो भारतप्रसिद्ध कर्मवीरो विद्वान् व्याख्याता च।

जगन्नाथोपाध्याय. वेदान्ताचार्य बौद्धदर्शनाचार्य वाराणसेयसंस्कृतविश्व विद्यालये बौद्धविभागाध्यक्ष, अन्ताराष्ट्रीयविभागस्य तथा एतद्विभागेऽध्ययनं कुर्वतां विदेशिनां छात्राणां च परमसहायक प्रोत्साहक कष्टनिवारकश्च ।

फडकेशास्त्री (श्री पं० अनन्त शास्त्री फडके) वाराणसेय संस्कृत विश्व विद्यालयस्य भूतपूर्व पुराणविभागप्राध्यापक, बहूना निबन्धानां लेखक सम्पादकश्च, संस्कृतविश्वपरिषदो भूतपूर्व सम्मानितप्राध्यापक । पत्रव्यवहारद्वारा बहूनां विविध देशवासिनां विदुषां संस्कृतशिक्षक । प्रौढसंस्कृतशिक्षाया विशेषज्ञ ।

सूचना—अस्मिन् परिचयप्रसङ्गे विशेषरूपेण प्रसिद्धानां विदुषां नेतॄणां च परिचयो ग्रन्थविस्तरभयात् न प्रदत्त इति ते क्षमा विधेया ।

परिशिष्टम्–ख

पुस्तके चर्चितानां संस्थानां तथा स्थानानां परिचय

द्वितीयप्रकरणे प्रथमसन्देशे

अ० भा० संस्कृत साहित्य सम्मेलनम्—१९७० वर्षे देहलीनगरे स्वर्गीय श्रीमदनमोहनमालवीयमहोदयै संस्थापितम्। वर्तमानपत्रम् —१७२ बी कमलानगर, दिल्ली, ६ ।

द्वितीयप्रकरणे चतुर्थसन्देशे

विश्व संस्कृत परिषद्—स्वर्गीय श्री सरदार वल्लभ भाई पटेल महोदय सभापतित्वे श्री कन्हैयालाल माणिकलाल मुन्शी महोदयै श्री सोमनाथ ज्योतिर्लिङ्ग प्रतिष्ठा महोत्सवावसरे ११-५-१९५१ दिनाङ्के संस्थापिता । वर्तमान पत्रम्— भारतीय विद्याभवन, चौपाटी, बम्बई ।

तृतीयप्रकरणे अष्टमसन्देशे

मदुरा—दक्षिणभारतस्य सुप्रसिद्धं तीर्थस्थानं यत्र भगवती मीनाक्षी विराजते। अत्रैव एका बालिकानां संस्कृतपाठशाला प्रचलति यत्र अधीयमाना बालिका अत्यन्तमधुरेण स्वरेण गद्यानि, पद्यानि, दण्डकानि च गायन्ति।

संस्कृतच्छात्रनिलयम्, बेंग्लोर—मैसूर राज्यस्य प्रसिद्धे बेंग्लोर नगरे विद्यमानाया श्री चामराजेन्द्रसंस्कृतकलाशालाया. छात्रावासस्य नाम संस्कृत-छात्र-निलयमिति।

चिदम्बरम्—दक्षिणभारतस्य प्रसिद्ध तीर्थस्थानं यत्रत्ये मन्दिरे भगवतो नटराजस्य मूर्तिर्विराजते।

शिमला पाठशाला—सुप्रसिद्धे शिमलानगरे प्रचलन्ती ब्राह्मणसभासंस्कृत-महाविद्यालयनाम्नी प्रतिष्ठिता शिक्षासंस्था।

तृतीयप्रकरणे पञ्चमसन्देशे

धर्मनिर्णयमण्डलम्—अस्या संस्थाया "तत्त्वनिष्ठ परिवर्तनवादी परिषद्" इति नामान्तरं वर्तते येनाऽस्या सिद्धान्तस्य परिज्ञानं भवति। १९३४तमे इशवीये सम्वत्सरे महाराष्ट्रस्य लोणावले नामके स्थाने समयोपयोगिधर्माचारप्रवर्तनद्वारा क्षीयमाणस्य हिन्दुसमाजस्य सङ्घटनार्थं संरक्षणार्थं च महाराष्ट्रीयैः परिवर्तनवादिभिर्विद्वत्प्रवरैः संस्थापितमिदं मण्डलम्। सम्प्रति एतस्य प्रधानकार्यवाहा श्री रघुनाथ शास्त्री कोकजे महोदया वर्तन्ते। स्थानं पो० लोणावले जि० पूना(महाराष्ट्र) वर्तते। एतन्मण्डलस्य प्रमुखैः संस्थापकैः मराठीभाषाया बहूनि पुस्तकान्यपि प्रकाशितानि सन्ति। उपर्युक्तसङ्केतेन तत् सर्वं ज्ञातुं लब्धुं च शक्यते। कोकजे महोदयैरेकं नूतनं पञ्चाङ्गमपि प्रकाश्यते।

ब्राह्मणसभा, मुम्बई—२२ जनवरी १८८८ दिनाङ्के मुम्बईनगरस्थितैः महाराष्ट्रीयैः स्वजातिधर्माभिमानिभिर्ब्राह्मणप्रवरैः स्थापिता। वर्तमान सङ्केत—१९०, चना रोड, मुम्बई ४।

वटपत्तनम्—गुजरात प्रदेशस्य 'बडौदा' नामकं भारतप्रसिद्धं विद्याकेन्द्र-भूतं नगरम्। अत्रत्या विद्वांसः श्री बदरीनाथ काशीनाथ शास्त्रि महोदया, श्री मणिशङ्कर वसन्तराम उपाध्याया तथा श्री जयनारायण रामकृष्ण पाठक प्रभृतयश्च न केवलं गीतिनिर्मातारः प्रत्युत गायका अपि। एतेषां प्रयासादस्मिन् नगरे भूयांसो बालका बालिकाश्च संस्कृतगीतिकुशला सञ्जाता सन्ति।

तृतीयप्रकरणे दशमसन्देशे

कार्यालयं—वाराणसेयं सार्वभौमसंस्कृतप्रचारकार्यालयं।

पञ्चमप्रकरणे एकादशसन्देशे

नवद्वीपादि—पश्चिमवङ्गस्थितस्य नदियामण्डलस्य 'श्रीधाम नवद्वीप'नाम्ना भारतप्रसिद्ध स्थानम्। इद खलु महाप्रभोश्चैतन्यस्य जन्मभूमिः न्यायशास्त्रस्य सुप्रसिद्ध विद्यापीठञ्च। 'नवद्वीपमहिमा' 'नदियाकाहिनी' इति वङ्गभाषायां लिखिते पुस्तकद्वये एतत्स्थानस्य महत्त्व ज्ञातव्यम्।

पञ्चमप्रकरणे द्वादशसन्देशे

गुरुकुलम्—गुरुकुल कांगडी विश्वविद्यालय हरिद्वारम्

शान्तिनिकेतनम्—शान्तिनिकेतनस्थभारतीविश्वविद्यालय बोलपुर (प०बं)

दारुल उलूम—शाहजहाँपुरमण्डले देवबन्दनगरस्थितं सुप्रसिद्ध अरबी भाषाया विद्यापीठम्।

परिशिष्टम्—ग

साम्प्रतमुपलभ्यमाना संस्कृतपत्रपत्रिका

वार्षिक मूल्यम्

दैनिकी

संस्कृत'—श्री शारदा मुद्रणालय २८१, बुधवार पेठ, पूना	१५.००

साप्ताहिकी

संस्कृतम्—संस्कृत कार्यालय, अयोध्या	८.००
संस्कृतभवितव्यम्—संस्कृतप्रचारिणी सभा, नागपुर	५.००

पाक्षिकी

भारतवाणी—संस्कृतसभा, पूना, २	५.००
संस्कृतसाकेत—अयोध्या	६.००

मासिकी

उद्यानपत्रिका—तिरुपति (आन्ध्र)	३.००
गुरुकुलपत्रिका—गुरुकुल कांगडी विश्वविद्यालय, हरिद्वारम्	४.००
जयतु संस्कृतम्—१०।१५८ मोगारिगी, वाराणसी, नेपाल	६.००
देववाणी—सत्यधीविद्यापीठ मु गेर (बिहार)	५.००
दिव्यज्योति'—आनन्द लॉज, जाखू, शिमला—१	६.००
प्रणवपारिजात—श्री सीतारान वैदिक महाविद्यालय ७१, जी० डब्लु० सी० रोड, कलकत्ता—१५	२.००

बालसस्कृतम्—आगरा रोड, घाट कोपर, बम्बई ७७ — ६ ००

विज्ञानज्योति —खुरजा, जि० बुलन्दशहर (ज्योतिषप्रधान हिन्दी समन्वितं च) — ८ ००

भारती—भारती भवन, गोपालजी का रास्ता, जयपुर (राजस्थान) — ५ ००

मालवमयूर —मन्दसौर (मध्यप्रदेश) हास्यविनोदप्रधान पत्रम् — ४ ००

वैदिकमनोहरा—काञ्जीवरम्, मद्रास स्टेट (वैष्णवसाहित्यप्रधाना) — ५ ००

शारदा—द्वारा श्री म म दत्तोवामन पोतदार, लोक कल्याण ७७ शनिवार पेठ पूना २ — ५ ००

सस्कृतसाहित्यपरिषत्पत्रिका— १६८।१ राजा धनेन्द्र स्ट्रीट, श्यामबाजार, कलकत्ता — ६ ००

सस्कृतरत्नाकर—१७२ डी० कमलानगर, देहली–६ — ५ ००

सस्कृतसञ्जीवनम्—बिहारसस्कृतसञ्जीवनसमाज, बारीपथ, पटना ४ — ६ ००

सूर्योदय —श्रीभारतधर्म महामण्डल, जगतगज, वाराणसी कैण्ट — ५ ००

त्रैमासिकी

गैर्वाणी—सस्कृतभाषा प्रचारिणी सभा, चित्तूर (आन्ध्रप्रदेश) — १ ५०

त्रैमासिक सस्कृतम्, स्वाध्यायमण्डल, पारडी जि सूरत

विश्व सस्कृतम्—विश्वेश्वरानन्द वैदिक शोधसस्थान, होशियारपुर — ८ ००

सारस्वती सुषमा—अनुसधान विभाग, सस्कृत विश्वविद्यालय, वाराणसी कैन्ट — ७ ००

सागरिका—सस्कृत परिषद्, सागर विश्वविद्यालय, सागर — ६ ००

पाण्मासिकी

सस्कृतप्रतिभा—साहित्य अकादेमी, नई दिल्ली — ४ ००

अनियतकालिकी

सस्कृतसौरभम्—सस्कृत विद्वत्सभा, द्वारकाधीशमन्दिरम्, नरसिंहजी नी पोल, बडौदा। इय पत्रिकाऽपि अचिरादेव मासिकी भविष्यतीति तत्सम्पादकैर्निवेदितम्।

परिशिष्टम्—घ

सस्कृतविषयप्रधानाः शोधपत्रिकाः

Annals of the Bhandarkar oriental Reasearch Institute, Poona

Adyar library Bulletin (ब्रह्मविद्या) Adyar, Madras.

Annals of oriental reaserch, Madras university,
Bharatiya Vidya Bharatiy vidya Bhavan, Bombay,
Journal of Ganga nath jha Reaserch Institute, Allahabad.
Journal of the shri venkateswar oriental Institute, Tirupati
Journal of the Tanjore Saraswati Mahal library, Tanjore
Our Heritage, Sanskrit Collage, Calcutta
Poona orintalist, oriental Book Agency Poona
Vac (वाक्) Deccan Collage Reaserch Institute, Poona
Journal of the oriental Institute Baroda
Prachyavani Calcutta

परिशिष्टम्—ड

भारतीयमहत्ताया विषये अध्ययनीया केचन महत्त्वपूर्णग्रन्थाः

भारतशतकम्—श्री महादेवशास्त्री कवितार्किकचक्रवर्ती
भारतस्य सांस्कृतिकनिधि —डा० रामजी उपाध्याय १२.००
भारतीय संस्कृति, महाकाव्यों के आलोक में—डा० देवराज ४.००
भारतीय संस्कृति के आधार—श्री अरविन्द १.००
भारत भारती—श्री मैथिलीशरण गुप्त
भारतीय गौरव—वासुदेव उपाध्याय ३.००
प्राचीन भारत में रसायन का विकास—डा० सत्यप्रकाश १५.००
नवीन दृष्टि में प्रवीण भारत—स्वामी दयानन्द १.०५
प्राचीन भारत की सामाजिकता—रामजी पाण्डेय ६.००
हिन्दू भारत का उत्कर्ष—चिंतामणि विनायक वैद्य ३.७५
भारतीय ज्योतिष—श्री शंकर बालकृष्ण दीक्षित ८.००

(अन्य महत्त्वपूर्ण ग्रन्थाः पूर्वोक्तेषु तत्तत्समाहे परिशिष्टे सन्ति। ते जिज्ञासुभिः तत्रैव द्रष्टव्याः)

शुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
११	१३	विकटा सन्धी	निकटान् सन्धीन्
१६	६	कश्मीरे पु	कश्मीरपु
४१	२	तात्विक	तात्त्विक
४६	२६	गहे	गृहे
४८	६	तपाञ्चापि	तेपाञ्चापि
५१	१४	यमाच्छ्रेष्ठो	यमाच्छ्रेष्ठो
६१	२२	रक्षति	रक्षित
७०	१	आसाञ्च	एपाञ्च
७०	१७	श्रतानि	श्रुतानि
७२	१५	कृती	कृती
७५	८	लिखितु	लेखितु
,,	,,	हिन्या	हिन्द्या
७७	१०	सामार्थ्य	सामर्थ्य
८०	२७	गालिभिश्चपि	गालिभिश्चापि
८३	१	तस्मादध्यापक	तस्मादध्यापके
१०६	१५	मिथ	मिथ -
१११	१६	तथा	तदा
११५	७	सुनिमलित	सुनिमीलित
१२९	५	एषा	एपा
१३०	१२	यनि	यदि
		पुधेन	बुधेन
		विपुलादशे	निपुलादशे

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१३५	१३	दत्रभापा	देत्रभापा
१३८	२१	द्दढ	द्दढम्
१३९	१२	माम्रण	माम्रणे
१४२	७	संस्टनेभरितीयाया	राष्ट्नेर्भारतीयाया
१४३	२०	पर	परं
१४६	७	गुरोर्नणां	गुरोर्नृणां
,,	८	यनिना	येनिना
१४६	१७	पूजिता	पूजिता.
१५२	१	गोयन्दका	गोयनका
१५८	६	जानीतु	जानीयु
१६०	४	यस्य	यस्यं
,,	१८	फारकम्	फारक
१६७	१६	रुदत्यपि	रुदत्यपि
१६९	१	श्लाघ्योदेशमुरो	श्लाघ्या देशमुगो
१७०	१४	अपत्यो	अपत्यो
,,	१६	दूरदशत	दूरदेशत
१७२	१८	नेत	नेतर
१७४	३१	नहागाज	महाराज
,,	३२	पृष्ठेषु	८१० पृष्ठेषु
१७५	१२	लिट्० डी०	डी० लिट्

पुस्तकप्रकाशने आर्थिकसाहाय्यकारिणां चिरस्मरणीया शुभनामावलिः

श्री प० जगन्नाथोपाध्याय —वेदान्ताचार्य बौद्धदर्शनाचार्य बौद्ध-
विभागाध्यक्ष, सस्कृतविश्वविद्यालय, वाराणसी १००.००

श्री प० गोपालशास्त्री दर्शनकेशरी—प्रधानाचार्य -श्रीबदरीनाथ
वेदवेदाङ्गसंस्कृतमहाविद्यालय जोशीमठ, उत्तराखण्ड १०१ ००

पण्डितराज श्री स्वामि भगवदाचार्य —राजनगर सोसाइटी,
अहमदाबाद ७ १२५.००

श्रीमती अध्यापिका चन्दनदेवी—कश्मीर सोसाइटी, अहमदाबाद७ १०० ००

डी ए वी बहुद्देशीय विद्यालय —सीवान, सारन १०० ००

श्री प० बदरीनाथ काशीनाथ शास्त्री—बडोदास्थ - विद्वत्सभाध्यक्ष,
सरस्वतीसौरभम् सम्पादक, द्वारकाधीशमन्दिरम्, नृसिंहवोथा, बडौदा ।५०—००

श्री के० लक्ष्मण शास्त्री—संस्कृतशिक्षाविशेषाधिकारी, आन्ध्रप्रदेश,
१६ तुलजागुडा, मोअज्जमजाही मार्केट, हैदराबाद । २५—००

हैदराबाद संस्कृतसाहित्यपरिषद् – हैदराबाद । २५—००

श्री आचार्य त्रिनाथदास शर्मा एम ए —उत्कलभवनम्, दुर्गाकुण्ड,
वाराणसी २५ ००

श्री प० ताराशकर मिश्र वैद्य —प्रधानाचाय -अर्जुन आयुर्वेद-
महाविद्यालय, अध्यक्ष -सस्कृत विश्वपरिषद् शाखा, वाराणसी २५ ००

श्री प० रामनाथ शर्मा—ज्यौतिष कार्यालय, हौजकटोरा, वाराणसी २५ ००

श्री डा० सीताराम शास्त्री—व्याकरणविभागाध्यक्ष, हिन्दू विश्वविद्या-
लय, वाराणसी २५ ००

Bhikkhu Aggarata TOR ANN Shastry—c/o Buddhist Association 'Sangha Raja Temple' Unnalom Temple
Phnom Penh, Cambodia 25 00

Rev Rewatadhamma Shastry—c/o Buddha Sasana
Council, Kaba Aye Rangoon, Burma 25 00

सस्कृतपरिषद्, श्रीमदनमोहन मालवीय डिग्री कालेज, भाटपार रानी,
देवरिया २१ ००

श्री प० विश्वनाथ मिश्र —प्रधानाचार्य -शार्दूल ब्रह्मचर्याश्रम,
बीकानेर २१ ००

श्री डा० कपिलदेव.—व्याख्याता कुरुक्षेत्रविश्वविद्यालय, कुरुक्षेत्र २१ ००

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१३५	१३	दशभाषा	देशभाषा
१३८	२१	दृढ	दृढम्
१३९	१२	मालए	मालऐ
१४२	७	संस्कृतेभरितीयाया	संस्कृतेर्भारतीयाय
१४३	२०	पर	परं
१४६	७	गुणैर्नया	गुणैर्नृणां
,,	८	यनिना	येनिना
१४९	१७	पूजिता	पूजिना
१५२	१	गोयन्दका	गोयाका
१५६	६	जानीनु	जानीयु
१६०	४	वमा	वर्षा
,,	१८	कारकम्	कारक
१६७	१९	रदत्यपि	रुदत्यपि
१६९	१	श्लाघ्योदेशमुनो	श्लाघ्यो दशमुनी
१७०	१४	प्रपराने	प्रपरा
,,	१६	दूरदशत	दूरदेशा
१७२	१८	नेत	नाद
१७४	३१	महाराज	महाराय
,,	३२	एच्युं	डा० एच्युं
१७५	१२	लिट्० डी०	डी० लिट्

पुस्तकप्रकाशने आर्थिकसाहाय्यकारिणां चिरस्मरणीया शुभनामावलिः

श्री प० जगन्नाथोपाध्याय —वेदान्ताचार्य बौद्धदर्शनाचार्य बौद्ध-
विभागाध्यक्ष, संस्कृतविश्वविद्यालय, वाराणसी १००.००

श्री प० गोपालशास्त्री दर्शनकेशरी—प्रधानाचार्य –श्रीबदरीनाथ
वेदवेदाङ्गसंस्कृतमहाविद्यालय जोशीमठ, उत्तराखण्ड १०१ ००

पण्डितराज श्री स्वामि भगवदाचार्य —राजनगर सोसाइटी,
अहमदाबाद ७ १२५.००

श्रीमती अध्यापिका चन्दनदेवी—कश्मीर सोसाइटी, अहमदाबाद७ १०० ००

डी ए वी बहूद्देशीय विद्यालय—सीवान, सारन १०० ००

श्री प० बदरीनाथ काशीनाथ शास्त्री—बडौदास्थ - विद्वत्सभाध्यक्ष,
सरस्वतीसौरभम् सम्पादक, द्वारकाधीशमन्दिरम्, नृसिंहपोथा, बडोदा ।५०-००

श्री के० लक्ष्मण शास्त्री—संस्कृतशिक्षाविशेषाधिकारी, आन्ध्रप्रदेश,
१६ तुलजागुड़ा, मोअज्जमजाही मार्केट, हैदराबाद। २५-००

हैदराबाद संस्कृतसाहित्यपरिषद् – हैदराबाद। २५-००

श्री आचार्य त्रिनाथदास शर्मा एम ए —उत्कलभवनम्, टुगाकुण्ड,
वाराणसी २५ ००

श्री प० ताराशंकर मिश्र वैद्य —प्रधानाचार्य –अर्जुन आयुर्वेद-
महाविद्यालय, अध्यक्ष -संस्कृत विश्वपरिषद् शाखा, वाराणसी २५ ००

श्री प० रामनाथ शर्मा—ज्यौतिष कार्यालय, हौजकटोरा, वाराणसी २५ ००

श्री डा० सीताराम शास्त्री—व्याकरणविभागाध्यक्ष, हिन्दू विश्वविद्या-
लय, वाराणसी २५ ००

Bhikkhu Aggarata TOR ANN Shastry—c/o Buddhist Association 'Sangha Raja Temple' Unnalom Temple
Phnom Penh, Cambodia 25 00

Rev Rewatadhamma Shastry—c/o Buddha Sasana Council, Kaba Aye Rangoon, Burma 25 00

संस्कृतपरिषद्, श्रीमदनमोहन मालवीय डिग्री कालेज, भाटपार रानी,
देवरिया २१ ००

श्री प० विश्वनाथ मिश्र —प्रधानाचार्य –शार्दूल ब्रह्मचर्याश्रम,
बीकानेर २१ ००

श्री डा० कपिलदेव —व्याख्याता कुरुक्षेत्रविश्वविद्यालय, कुरुक्षेत्र २१ ००